**२.४० नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥**

ने (इ)हा (अ)भिक्क्रमनाशो (अ)स्ति- -,
प्रत्यवायो न विद्यते
स्वल्पम् अप्य् अस्य धर्मस्य- -
त्रायते महतो भयात्

न इहं अभिक्रमनाशः अस्ति प्रत्यवायः न विद्यते
स्वल्पम् अपि अस्य धर्मस्य त्रायते महतः भयात्

इस (योग) में जो भी प्रयत्न किए जाँय, नष्ट नहीं होते, न विघ्न आते हैं । इस धर्म का अल्प मात्र (पालन) भी रक्षा करता है, महाभय से ।

**२.४१ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥**

व्यवसायात्मिका बुद्धिर्
एके (इ)ह कुरुनन्दन - -
बहुशाखा हय् अनन्ताश् च - -
बुद्धयो (अ)व्यवसायिनाम्

व्यवसायात्मिका बुद्धिः एका इह कुरुनन्दन
बहुशाखाः हि अनन्ताः च बुद्धयः अव्यवसायिनाम्

निश्चयात्मिका बुद्धि एक ही है, कुरुनन्दन ! और, अनेक शाखाओं वाली, अनन्त बुद्धियां हैं,- डाँवाडोल विचार वालों की ।

२.४२ यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥

याम् इमां पुष्पितां वाचं
प्रवदन्त्य् अविपश्चितः
वेदवादरताः, पार्थ - -
ना (अ)न्यद् अस्ती (इ)ति वादिनः

याम् इमाम् पुष्पिताम् वाचम् प्रवदन्ति अविपश्चितः
वेदवादरताः पार्थ न अन्यत् अस्ति इति वादिनः

वेद वाक्य में रत, पार्थ ' जो अज्ञानी इस भांति की आलंकारिक बातें करते हैं कि (प्रत्यक्ष जगत् के अतिरिक्त) "और कुछ नहीं है," (उन) -

२.४३ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥

कामात्मानः स्वर्गपरा
जन्मकर्मफलप् प्रदाम्
क्रियाविशेषबहुलां
भोगैश्वर्यगतिं प्रति- -

कामात्मानः स्वर्गपराः जन्मकर्मफलप्रदाम्
क्रियाविशेषबहुलाम् भोगैश्वर्यगतिम् प्रति

कामना वाले पुरुषों के लिए स्वर्ग सर्वोच्च है, कर्मफल (पुनर) जन्म देने वाला है । नाना प्रकार की विशेष- क्रियाएं हैं, भोग और ऐश्वर्य प्राप्ति के लिए ।

२.४४ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥

भोगैश्वर्यप् प्रसक्तानां,
तया (अ)पहृत चेतसाम्
व्यवसायात्मिका बुद्धिः
समाधौ न विधीयते

भोगैश्वर्यप्रसक्तानाम् तया अपहृतचेतसाम्
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते

(ऐसी बातों से) भोग और ऐश्वर्य में आसक्त रहने वालों का चित्त उन्मत्त हो जाता है । निश्चयात्मिका बुद्धि समाधिमें स्थिर नहीं रहती ।

२.४५ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥

त्रैगुण्यविषया वेदा
निस्त्रैगुण्यो भवा (अ)र्जुन- -
निर्द्वन्द्वो नित्य सत्त्वस्थो
निर्योगक्क्षेम आत्मवान्

त्रैगुण्यविषयाः वेदाः निस्त्रैगुण्यः भव अर्जुन
निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेमः आत्मवान्

तीनों गुण, वेदों के विषय हैं । तू तीनों गुणों से परे हो, अर्जुन । द्वंद्वों से रहित, नित्य सत्त्व में स्थित हो । योगक्षेम[३] से मुक्त, तू आत्मनिष्ठ बन ।

३. जो नहीं है उसे उपलब्ध करना "योग" है, और, जो है, उसका संरक्षण "क्षेम" है ।

२.४६ यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥

यावान् अर्थ उद्पाने
सर्वतः संप्लुतोद्के
तावान् सर्वेषु वेदेषु- -
ब्राह्मणस्य विजानतः

यावान् अर्थः उदपाने सर्वतः संप्लुतोदके
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः

सब ओर से जल मग्न स्थान में, जितना उपयोग पोखरे का है, उतना ही सब वेदों का है, ब्राह्मण के लिए, जो ज्ञान सम्पन्न है।

२.४७ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥

कर्मण्य् एवा (अ)धिकारस् ते,
मा फलेषु कदाचन- -
मा कर्मफलहेतुर् भूर्,
मा ते संगो (अ)स्त्व् अकर्मणि- -

कर्मणि एव अधिकारः ते मा फलेषु कदाचन
मा कर्मफलहेतुः भूः मा ते संगः अस्तु अकर्मणि

तेरा अधिकार है एकमात्र कर्म करने में; उसके फल में, कभी नहीं। न कर्मफल तेरा उद्देश्य हो और न अकर्म में तेरी आसक्ति हो।

२.४८ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥

योगस्थः कुरु कर्माणि- -
संगं त्यक्त्वा, धनंजय- -
सिद्ध्य् असिद्ध्योः समो भूत्वा
समत्वं योग उच्यते

यो गस्थः कु रु कर्मा णि सं गम् त्यक्त्वा धनं जय
सिद्ध्यसिद्ध्योः समः भूत्वा समत्वम् योगः उच्यते

योग में स्थित तू कर्म कर, आसक्ति को त्याग कर, धनंजय । सफलता और असफलता में एक सा रह कर । (इस) समता को ही योग कहते हैं ।

२.४९ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥

दूरेण ह्य् अवरं कर्म- -
बुद्धियोगाद्, धनंजय- -
बुद्धौ शरणम् अन्विच्छ- - ;
कृपणाः फलहेतवः

दूरेण हि अवरम् कर्म बुद्धियोगात् धनं जय
बुद्धौ शरणम् अन्विच्छ कृपणाः फलहे तवः

सचमुच, कर्म कहीं निकृष्ट है, बुद्धियोग से, धनंजय । तू बुद्धि (योग) की शरण ले । वे दया के पात्र हैं, जो फल की आकांक्षा करते हैं ।

२.५० बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥

बुद्धियुक्तो जहाती (इ)ह - -
उभे सुकृत दुष्कृते
तस्माद् योगाय युज्यस्व - -
योगः कर्मसु कौशलम्

बुद्धियुक्तः जहाति इह उभे सुकृतदुष्कृते
तस्मात् योगाय युज्यस्व योगः कर्मसु कौशलम्

जो बुद्धिसे सम्पन्न है, वह अच्छे और बुरे दोनों कर्म यहीं छोड़ देता है । अतएव, तू योग के लिए प्रयत्न कर । कर्म में कुशलता, योग है ।

२.५१ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥

कर्मजं बुद्धियुक्ता हि - -
फलं त्यक्त्वा, मनीषिणः
जन्मबन्ध विनिर् मुक्ताः,
पदं गच्छन्त्य् अनामयम्

कर्मजम् बुद्धियुक्ताः हि फलम् त्यक्त्वा मनीषिणः
जन्मबन्धविनिर्मुक्ताः पदम् गच्छन्ति अनामयम्

विवेकी पुरुष, बुद्धि में रत, कर्म से उत्पन्न फल को त्याग कर, जन्मबन्धन से मुक्त हुए, प्राप्त होते हैं पीड़ा-रहित स्थिति को ।

२.५२ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥

यदा ते मोहकलिलं
बुद्धिर् व्यति तरिष्यति - -
तदा गन्तासि निर्वेदं
श्रोतव्यस्य श्रुतस्य च - -

यदा ते मोहकलिलम् बुद्धिः व्यतितरिष्यति
तदा गन्तासि निर्वेदम् श्रोतव्यस्य श्रुतस्य च

जब तेरी बुद्धि मोह के गँदले से पार उतर जाएगी तब, तू विरत हो जाएगा, जो सुना है और जो सुनना चाहिए, (दोनो) से ।[४]

२.५३ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥

श्रुतिविप् प्रतिपन्ना ते
यदा स्थास्यति निश्चला
समाधाव् अचला बुद्धिस्
तदा योगम् अवाप्स्यसि - -

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधौ अचला बुद्धिः तदा योगम् अवाप्स्यसि

श्रुतियों द्वारा विचलित तेरी बुद्धि, जब समाधिमें, अचल, निश्चल भाव से स्थित होगी, तब तू योग को पा जाएगा ।

४. उसके लिए सम्पूर्ण वाङ्मय निरर्थक हो जाता है।

अर्जुन उवाच -

२.५४ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥

स्थितप् प्रज्ञस्य का भाषा
समाधिस् थस्य, केशव - - -
स्थितधीः किं प्रभाषेत,- -,
किम् आसीतव् व्रजेत किम्

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव
स्थितधीः किम् प्रभाषेत किम् आसीत व्रजेत किम्

अर्जुन उवाच -

हे केशव ! क्या परिभाषा है स्थित बुद्धिवाले की, जो समाधिमें स्थित है । स्थित बुद्धिवाला कैसे बोलता है, कैसे बैठता है, किस प्रकार चलता है ?

२.५५ श्री भगवानुवाच -

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

प्रजहाति यदा कामान्
सर्वान्, पार्थ, मनोगतान्
आत्मन्य् एवा (आ)त्मना तुष्टः ;
स्थितप्प्रज्ञस् तदो (उ)च्यते

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्
आत्मनि एव आत्मना तुष्टः स्थितप्रज्ञः तदा उच्यते

श्री भगवानुवाच-

हे पार्थ ! जब मनुष्य, मन में आई सब कामनाओं को त्याग देता है और अपने में अपने से ही संतुष्ट रहता है, तब उसे, स्थित बुद्धि वाला कहते हैं ।

२.५६ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

दुःखेष्व् अनुद्द्विग्नमनाः,
सुखेषु विगतस्स्पृहः
वीतराग भयक् क्रोधः
स्थितधीर् मुनिर् उच्यते

दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः
वीतरागभयक्रोधः स्थितधीः मुनिः उच्यते

जिसका मन दुःखों में अकुलाता नहीं , सुखों में जो लालसा से मुक्त है, प्रीति भय और क्रोध जिसके छूट गए हैं, वह मुनि स्थित बुद्धि वाला कहलाता है ।

२.५७ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥

यः सर्वत्रा (अ)नभिस् स्नेहस्
तत् तत् प्राप्य शुभाशुभम्
ना (अ)भिनन्दति नद् द्वेष्टि – – ,
तस्यप् प्रज्ञा प्रतिष्ठिता

यः सर्वत्र अनभिस्नेहः तत् तत् प्राप्य शुभाशुम्
न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता

जो सब ओर से राग रहित है, शुभ और अशुभ को पाकर, न हर्षित होता है न द्वेष करता है, उसकी बुद्धि स्थित है ।

**२.५८ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥**

यदा संहरते चा (अ)यं,
कूर्मो (अ)ङ्गानी (इ)व, सर्वशः
इन्द्रियाणी (इ)न्द्रियार्थेभ्यस्
तस्यप् प्रज्ञा प्रतिष्ठिता

यदा संहरते च अयम् कूर्मः अंगानि इव सर्वशः
इन्द्रियाणि इन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

और जब यह (पुरुष) इन्द्रियों को इन्द्रियों के विषयों से समेट लेता है, जैसे कछुआ अंगों को, सब ओर से, तब उसकी बुद्धि स्थित है ।

**२.५९ विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥**

विषया विनिवर्तन्ते
निराहारस्य देहिनः
रसवर्जं, रसो (अ)प्य् अस्य – –,
परं दृष्ट्वा निवर्तते

विषयाः विनिवर्तन्ते निराहारस्य देहिनः
रसवर्ज रसः अपि अस्य परम् दृष्ट्वा निवर्तते

देहधारी के, जो निराहारी है, विषय छूट जाते हैं, रुचि नहीं । परमात्मा को देखकर उसकी, रुचि भी छूट जाती है ।

२.६० यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥

यततो हृय् अपि, कौन्तेय - - ,
पुरुषस्य विपश्चितः
इन्द्रियाणिप् प्रमाथीनि - -
हरन्तिप् प्रसभं मनः

यततः हि अपि कौन्तेय पुरुषस्य विपश्चितः
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभम् मनः

वास्तव में, कौन्तेय, यत्न करते हुए भी बुद्धिमान् पुरुष की इन्द्रियां, जो प्रमथन कारिणी हैं, उसके मन को बरबस हर लेती हैं ।

२.६१ तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

तानि सर्वाणि संयम्य - -
युक्त आसीत मत्परः
वशे हि यस्ये (इ)न्द्रियाणि - -
तस्यप् प्रज्ञा प्रतिष्ठिता

तानि सर्वाणि संयस्य युक्तः आसीत मत्परः
वशे हि यस्य इन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता

उन सब (इन्द्रियों) को नियन्त्रण में करके, (उसे) मुझ सर्वोच्च में लीन, एकाग्र चित्त हुए बैठना चाहिए । सच में, जिसकी इन्द्रियां वश में हैं, उसकी बुद्धि स्थित है ।

**२.६२ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥**

ध्यायतो विषयान् पुंसः
संगस् तेषू (उ)पजायते
संगात् संजायते कामः,
कामात् क्रोधो (अ)भिजायते

ध्यायतः विषयान् पुंसः संगः तेषु उपजायते
संगात् संजायते कामः कामात् क्रोधः अभिजायते

विषयों का चिन्तन करने वाले पुरुष की, उन (विषयों) में आसक्ति हो जाती है। आसक्ति से कामना उत्पन्न होती है और कामना से क्रोध की उत्पत्ति होती है।

**२.६३ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥**

क्रोधाद् भवति संमोहः,
संमोहात् स्मृति विभ्रमः
स्मृतिम् भ्रंशाद् बुद्धिनाशो,
बुद्धिनाशात् प्रणश्यति - -

क्रोधात् भवति संमोहः संमोहात् स्मृतिविभ्रमः
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति

क्रोध से भ्रम होता है, भ्रम से स्मृति में भ्रान्ति हो जाती है, स्मृतिभ्रम से बुद्धिनाश, बुद्धिनाश से वह (स्वयं) नष्ट हो जाता है।

२.६४ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

रागद् द्वेषवियुक्तैस् तु --
विषयान् इन्द्रियैश् चरन्
आत्मवश्यैर् विधेयात्मा,
प्रसादम् अधिगच्छति --

रागद्वेषवियुक्तैः तु विषयान् इन्द्रियैः चरन्
आत्मवश्यैः विधेयात्मा प्रसादम् -अधिगच्छति

परन्तु रागद्वेष से हटाई गई, (और) वश में की हुई इन्द्रियों से विषयों में विचरता हुआ वह, जिसका मन अपने वश में है, शान्ति को प्राप्त करता है ।

२.६५ प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

प्रसादे सर्वदुःखानां
हानिर् अस्यो (उ)पजायते
प्रसन्नचेतसो ह्य् आशु --
बुद्धिः पर्यवतिष्ठते

प्रसादे सर्वदुःखानाम् हानिः अस्य उपजायते
प्रसन्नचेतसः हि आशु बुद्धिः पर्यवतिष्ठते

उस शान्ति में उसके सम्पूर्ण दुःखों का अन्त हो जाता है । वास्तव में, जिसका मन शान्त है उसकी बुद्धि शीघ्र ही स्थित हो जाती है ।

२.६६ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

ना (अ)स्ति बुद्धिर् अयुक्तस्य - -
न चा (अ)युक्तस्य भावना
न चा (अ)भावयतः शान्तिर्
अशान्तस्य कुतः सुखम्

न अस्ति बुद्धिः अयुक्तस्य न च अयुक्तस्य भावना
न च अभावयतः शान्तिः अशान्तस्य कुतः सुखम्

असंतुलित (व्यक्ति) के न बुद्धि होती है और, न असंतुलित की कोई विचार-धारा । और, विचार-धारा के बिना शान्ति नहीं । अशान्त को सुख कहां ?

२.६७ इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥

इन्द्रियाणां हि चरतां
यन् मनो (अ)नुविधीयते
तद् अस्य हरतिप् प्रज्ञां
वायुर् नावम् इवा (अ)म्भसि - -

इन्द्रियाणाम् हि चरताम् यत् मनः अनु विधीयते
तत् अस्य हरति प्रज्ञाम् वायुः नावम् इव अम्भसि

जो मन, वास्तव में, भटकती इन्द्रियों के पीछे चलता है, वह उस (पुरुष) की बुद्धि को ऐसे भगा ले जाता है, जैसे वायु नाव को, जल में ।

२.६८ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

तस्माद् यस्य महाबाहो
निगृहीतानि सर्वशः
इन्द्रियाणी (इ)न्द्रियार्थेभ्यस्
तस्यप् प्रज्ञा प्रतिष्ठिता

तस्मात् यस्य महाबाहो निगृहीतानि सर्वशः
इन्द्रियाणि इन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता

अतएव, हे महाबाहो । जिसकी इन्द्रियां सम्पूर्ण रूप से इन्द्रियों के विषयों से खिंची हुई हैं, उसकी बुद्धि स्थित है ।

२.६९ या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

या निशा सर्वभूतानां
तस्यां जागर्ति संयमी
यस्यां जाग्रति भूतानि - -
सा निशा पश्यतो मुनेः

या निशा सर्वभूतानाम् तस्याम् जागर्ति संयमी
यस्याम् जाग्रति भूतानि सा निशा पश्यतः मुनेः

जो प्राणिमात्र की रात है, स्थित बुद्धि वाला उसमें, जागता है । जिस (समय) में सब प्राणी जागते हैं, वह उस मुनि के लिए रात है, जो देखता है, (तत्त्व को जानता है)[५]

५. यह श्लोक ज्ञानी और अज्ञानी के विपरीत-दर्शी स्वभाव का वर्णन अति सुन्दर ढंग से कर रहा है।

२.७० आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥

आपूर्यमाणम् अचलप् प्रतिष्ठम्
समुद्रम् आपः प्रविशन्ति यद्वत्
तद्वत् कामा यं प्रविशन्ति सर्वे
स शान्तिम् आप्नोति न कामकामी

आपूर्यमाणम् अचलप्रतिष्ठम् समुद्रम् आपः प्रविशन्ति यद्वत्
तद्वत् कामाः यम् प्रविशन्ति सर्वे सः शान्तिम् आप्नोति न कामकामी

(निरन्तर) नदी नालों से भरते रहने पर भी जैसे समुद्र की मर्यादा अचल रहती है, वैसे ही वह पुरुष जिसमें सब कामनाएं समा जाती हैं शान्ति को प्राप्त होता है। वह नहीं, जो कामनाओं की लालसा करता है।

२.७१ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥

विहाय कामान् यः सर्वान्
पुमांश् चरति निःस्पृहः
निर्ममो निरहंकारः
स शान्तिम् अधिगच्छति - -

विहाय कामान् यः सर्वान् पुमान् चरति निःस्पृहः
निर्ममः निरहंकारः सः शान्तिम् अधिगच्छति

जो पुरुष सब कामनाओं को त्यागकर, इच्छा रहित, ममत्वरहित, अहंकार रहित, हो कर विचरता है, वह शान्ति को पा जाता है।

२.७२ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

एषा ब्राह्मी स्थितिः, पार्थ – – ,
नै (ए)नाम् प्राप्य विमुह्यति – –
स्थित्वा (अ)स्याम् अन्तकाले (अ)पि – –
ब्रह्मनिर्वाणम् ऋच्छति – –

एषा ब्राह्मी स्थितिः पार्थ न एनाम् प्राप्य विमुह्यति
स्थित्वा अस्याम् अन्तकाले अपि ब्रह्मनिर्वाणम् ऋच्छति

हे पार्थ । यह ब्राह्मी अवस्था है । इसे पाकर कोई भ्रम में नहीं पड़ता । जो अन्त समय में भी इसमें स्थित हो जाता है, वह प्राप्त करता है–ब्रह्म को, निर्वाण को ।

श्री कृष्णार्जुनसंवादे सांख्ययोगोनाम द्वितीयोऽध्यायः समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे
हरे राम हरे राम राम राम हरे हरे

परिचय-३

स्थित बुद्धि की सराहना सुन कर अर्जुन ने प्रश्न किया कि यदि बुद्धि कर्म से श्रेष्ठ है, तो केशव, आप मुझे घोर कर्म करने के लिए क्यों कहते हैं ?

भगवन् कहते हैं कर्म करने ही पड़ते हैं, उनसे छुटकारा नहीं पाया जा सकता।

अकर्म से कर्म श्रेष्ठ है। यज्ञ[१] कर्म के अतिरिक्त अन्य सब कर्म मनुष्य को बांधते हैं। अतः ये अनासक्त रह कर, करना चाहिए।

यही "कर्म योग" है जो अध्याय ३ का नाम है।

१. इस संदर्भ में, "यज्ञ" का अर्थ जगद्गुरु शंकराचार्य ने विष्णु (परमेश्वर), रामानुज ने बलिदान और महात्मा गांधी ने परोपकार किया है।

श्रीमद्भगवद्गीता

अथ तृतीयोऽध्यायः

(श्री कृष्णार्जुनसंवादे कर्मयोगः)

३.१ **अर्जुन उवाच–**
ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥

ज्यायसी चेत् कर्मणस् ते
मता बुद्धिर् जनार्दन – –
तत् किं कर्मणि घोरे मां
नियोजयसि, केशव – –

ज्यायसी चेत् कर्मणः ते मता बुद्धिः जनार्दन
तत् किम् कर्मणि घोरे माम् नियोजयसि केशव

अर्जुन उवाच –
यदि आपके विचार में बुद्धि कर्म से श्रेष्ठ है जनार्दन, तब आप, मुझे (ऐसे) भयानक कर्म में क्यों लगाते हैं, केशव ?

३.२ **व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।**
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥

व्यामिश्श्रेणे (इ)व वाक्येन - -
बुद्धिं मोहयसी (इ)व मे
तद् एकं वद निश्चित्य - -
येन श्रेयो (अ)हम् आप्नुयाम्

व्यामिश्रेण इव वाक्येन बुद्धिम् मोहयसि इव मे
तत् एकम् वद निश्चित्य येन श्रेयः अहम् आप्नुयाम्

उलझे हुए से वचन कह कर आप मेरी बुद्धि को मानों भ्रम में डालते हैं । इसलिए निश्चय करके एक बात कहिए जो मेरे लिए शुभ है ।

३.३ **श्री भगवानुवाच-**
लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

लोके (अ)स्मिन् द्विविधा निष्ठा
पुरा प्रोक्ता मया (अ)नघ - -
ज्ञानयोगेन सांख्यानां,
कर्मयोगेन योगिनाम्

लोके अस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया अनघ
ज्ञानयोगेन सांख्यानाम् कर्मयोगेन योगिनाम्

श्री भगवान् उवाच -
इस लोक में दो प्रकार की आस्थाएं हैं, मैंने पहले कहा है, अनघ । (एक) सांख्यों की ज्ञानयोग द्वारा, (दूसरी) योगियों की कर्मयोग द्वारा ।

३.४ न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥

न कर्मणाम् अनारम्भान्
नैष्कर्म्यम् पुरुषो (अ)श्नुते
न च संन्यसनाद् एव - -
सिद्धिं समधिगच्छति - -

न कर्मणाम् अनारम्भात् नैष्कर्म्यम् पुरुषः अश्नुते
न च संन्यसनात् एव सिद्धिम् समधिगच्छति

न तो कर्मों को आरम्भ न करने से ही मनुष्य, कर्मों (के बन्धनों) से मुक्ति पाता है;[१] और न केवल (कर्मों के) संन्यास द्वारा ही, सिद्धि प्राप्त करता है;-(कारण)

३.५ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥

न हि कश्चित् क्षणम् अपि - -
जातु तिष्ठत्य् अकर्मकृत्
कार्यते ह्य् अवशः कर्म - -
सर्वः प्रकृतिजैर् गुणैः

न हि कश्चित् क्षणम् अपि जातु तिष्ठति अकर्मकृत्
कार्यते हि अवशः कर्म सर्वः प्रकृतिजैः गुणैः

न कभी कोई एक पल भी, बिना कर्म किये, रह सकता है । प्रकृति से उत्पन्न गुण सब किसी से सचमुच बरबस कर्म कराते हैं ।

१. नैष्कर्म्यम् क्या है ? देखिए "गीता कोश"

३.६ **कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।**
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

कर्मेन्द्रियाणि संयम्य – –,
य आस्ते मनसा स्मरन्
इन्द्रियार्थान्, विमूढात्मा,
मिथ्याचारः स उच्यते

कर्मेन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन्
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः सः उच्यते

कर्मेन्द्रियों को नियन्त्रण में रखकर जो बैठता है, मन से इन्द्रियों के विषयों का चिन्तन करता हुआ, उस विमूढ पुरुष को ढोंगी कहते हैं ।

३.७ **यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।**
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥

यस् त्व् इन्द्रियाणि मनसा
नियम्या (आ)रभते (अ)र्जुन – –
कर्मेन्द्रियैः कर्मयोगम्
असक्तः, स विशिष्यते

यः तु इन्द्रियाणि मनसा नियम्य आरभते अर्जुन
कर्मेन्द्रियैः कर्मयोगम् असक्तः सः विशिष्यते

परन्तु अर्जुन । जो मन से इन्द्रियों को वश में करके कर्मेन्द्रियों द्वारा कर्मयोग आरम्भ करता है–अनासक्त होकर, वह श्रेष्ठ है ।[२]

२. "कर्मयोग" क्या है ? देखिए २.४७, ४८

३.८ **नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।**
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥

नियतं कुरु कर्मत् त्वं,
कर्मज् ज्यायो ह्य् अकर्मणः
शरीरयात्रा (अ)पि च ते
न प्रसिद्द ध्येद् अकर्मणः

नियतम् कुरु कर्म त्वम् कर्म ज्यायः हि अकर्मणः
शरीरयात्रा अपि च ते न प्रसिद्ध्येत् अकर्मणः

तू निर्धारित कर्म कर । कर्म सचमुच श्रेष्ठ है, अकर्म से । और फिर, तेरे शरीर का निर्वाह भी तो, हो नहीं सकता, अकर्म से ।

३.९ **यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।**
तदर्थं कर्म कौन्तेय मुक्तसंगः समाचर ॥

यज्ञार्थात् कर्मणो (अ)न्यत्र – –
लोको (अ)यं कर्मबन्धनः
तदर्थं कर्म, कौन्तेय – –,
मुक्तसंगः समाचर – –

यज्ञार्थात् कर्मणः अन्यत्र लोकः अयम् कर्मबन्धनः
तदर्थम् कर्म कौन्तेय मुक्तसंगः समाचर

यज्ञार्थ कर्म को छोड़कर, यह संसार (अन्य) कर्म से बँधा है । इस कारण कौन्तेय ! तू अनासक्त रह कर, कर्म कर ।[३]

३. यहां 'यज्ञ' का अर्थ जगद्गुरु शंकराचार्य ने विष्णु (परमेश्वर), रामानुज ने बलिदान, और महात्मा गांधी ने परोपकार किया है।

३.१० **सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।**
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

सहयज्ञाः प्रजाः सृष्ट्वा
पुरो (उ)वाचप् प्रजापतिः
अनेन प्रसविष्यध्ध्वम्
एष वो (अ)स्त्व् इष्टकामधुक्

सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच प्रजापतिः
अनेन प्रसविष्यध्वम् एषः वः अस्तु इष्टकामधुक्

आदि में यज्ञ के साथ साथ मानव जाति को उत्पन्न करके प्रजापति ने कहाः "इससे तुम लोग फलो फूलो । यह तुम्हारी इच्छित कामनाओं को देने वाला होवे", (काम धेनु के सदृश)

३.११ **देवान्भावयतानेन ते देवा भावयन्तु वः ।**
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

देवान् भावयता (अ)नेन – –,
ते देवा भावयन्तु वः
परस्परं भावयन्तः
श्रेयः परम् अवाप्स्यथ – –

देवान् भावयत अनेन ते देवाः भावयन्तु वः
परस्परम् भावयन्तः श्रेयः परम् अवाप्स्यथ

तुम लोग इसके द्वारा देवताओं का पोषण करो, वे देवता तुम्हारा पोषण करें । एक दूसरे का पोषण करते हुए तुम उच्चतम कल्याण प्राप्त करोगे ।

३.१२ इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥

इष्टान् भोगान् हि वो देवा
दास्यन्ते यज्ञभाविताः
तैर् दत्तान् अपप्रदायै (ए)भ्यो
यो भुङ्क्ते स्तेन एव सः

इष्टान् भोगान् हि वः देवाः दास्यन्ते यज्ञभाविताः
तैः दत्तान् अप्रदाय एभ्यः यः भुङ्क्ते स्तेनः एव सः

यज्ञ से पोषित देवता, सचमुच तुम्हें इच्छित भोग पदार्थों को देंगे । उनके द्वारा दिए हुए इन (पदार्थों) को, जो बदले में बिना कुछ दिए भोगता है,वह वास्तव में, चोर है ।

३.१३ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

यज्ञशिष्टाशिनः सन्तो
मुच्यन्ते सर्वकिल्बिषैः
भुञ्जते ते त्व् अघं पापा
ये पचन्त्य् आत्मकारणात्

यज्ञशिष्टाशिनः सन्तः मुच्यन्ते सर्वकिल्बिषैः
भुञ्जते ते तु अघं पापाः ये पचन्ति आत्मकारणात्

जो सन्त यज्ञ से बचा हुआ खाते हैं, वे सब पापों से मुक्त हो जाते हैं । वे पापी, वास्तव में, पाप भक्षण करते हैं जो अपने लिए ही, भोजन बनाते हैं ।

३.१४ अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥

अन्नाद् भवन्ति, भूतानि – –,
पर्जन्याद् अन्नसम्भवः
यज्ञाद् भवति पर्जन्यो,
यज्ञः कर्मसमुद्भवः

अन्नात् भवन्ति भूतानि पर्जन्यात् अन्नसम्भवः
यज्ञात् भवति पर्जन्यः यज्ञः कर्मसमुद्भवः

प्राणिमात्र की उत्पत्ति अन्न से है, अन्न वर्षा से उपजता है । वर्षा यज्ञ से होती है, यज्ञ, कर्म से उदय होता है ।

३.१५ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

कर्म ब्रह्मोद्भवं विद्धि – –,
ब्रह्मा (अ)क्षरसमुद्भवम्
तस्मात् सर्वगतं ब्रह्म – –
नित्यं यज्ञे प्रतिष्ठितम्

कर्म ब्रह्मोद्भवम् विद्धि ब्रह्म अक्षरसमुद्भवम्
तस्मात् सर्वगतम् ब्रह्म नित्यम् यज्ञे प्रतिष्ठितम्

कर्म का उद्गम ब्रह्म (अर्थात् वेद) है, तू समझ । (वेद) ब्रह्म अक्षर (अव्यक्त प्रकृति) से उत्पन्न है । इसलिए सर्व व्यापी ब्रह्म सदा यज्ञ में (पूर्णरूप से) स्थित है ।[४]

४. उपर्युक्त दो श्लोकों में वर्णित- यह सृष्टि चक्र है- (प्राणिमात्र-बादल-यज्ञ-कर्म-वेद-अव्यक्त प्रकृति,सर्वव्यापी शुद्ध ब्रह्म) यह ब्रह्म कारणों का परम कारण और स्वयं अकारण है। अतः यज्ञ में सदैव प्रतिष्ठित है, प्रत्येक का मूल कारण होने से।

३.१६ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥

एवं प्रवर्तितं चक्रं
ना (अ)नुवर्तयती (इ)ह यः
अघायुर् इन्द्रियारामो
मोघं, पार्थ, स जीवति - -

एवम् प्रवर्तितम् चक्रम् न अनुवर्तयति इह यः
अघायुः इन्द्रियारामः मोघम् पार्थ सः जीवति

इस प्रकार से चलाए हुए चक्र का, इस लोक में जो अनुसरण नहीं करता, वह पापजीवी इन्द्रियों के सुख में पड़ा हुआ, हे पार्थ, व्यर्थ जीता है ।

३.१७ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥

यस् त्व् आत्मरतिर् एवस् स्याद्
आत्मतृप्तश् च मानवः
आत्मन्य् एव च संतुष्टस्
तस्यं कार्यं न विद्यते

यः तु आत्मरतिः एव स्यात् आत्मतृप्तः च मानवः
आत्मनि एव च संतुष्टः तस्य कार्यम् न विद्यते

वास्तव में, जिस मनुष्य का अपने आप[५] से अनुराग है,जो अपने में तृप्त है, और फिर अपने से ही संतुष्ट है, उसके करने के लिए, कुछ नहीं रहता ।

५ भीतरी प्रकाश देखिए प्रवेशिका II

३.१८ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥

नै (ए)व तस्य कृतेना (अ)र्थो,
ना (अ)कृतेने (इ)ह कश्चन – –
न चा (अ)स्य सर्वभूतेषु – –
कश्चिद् अर्थव्‌व्यपाश्रयः

न एवं तस्य कृतेन अर्थः न अकृतेन इह कश्चन
न च अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः

इस लोक में किए कर्मों से उसका कोई प्रयोजन नहीं, और न किए कर्मों से भी । और, न सम्पूर्ण प्राणियों में (किसी से) उसका कोई स्वार्थ सम्बन्ध है ।

३.१९ तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥

तस्माद् असक्तः सततं
कार्यम् कर्म समाचर – –
असक्तो ह्य् आचरन् कर्म – –
परम् आप्नोति पूरुषः

तस्मात् असक्तः सततम् कार्यम् कर्म समाचर
असक्तः हि आचरन् कर्म परम् आप्नोति पूरुषः

अतः तू अनासक्त रह कर सदा कर्तव्य कर्म कर । वास्तव में, अनासक्त कर्म करते हुए ही सर्वोच्च को प्राप्त होता है, मनुष्य ।

**३.२० कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥**

कर्मणै (ए)व हि संसिद्धम्
आस्थिता जनकादयः
लोकसंग्रहम् एवा (अ)पि – –
संपश्यन् कर्तुम् अर्हसि – –

कर्मणा एव हि संसिद्धिम् आस्थिताः जनकादयः
लोकसंग्रहम् एव अपि संपश्यन् कर्तुम् अर्हसि

सचमुच, केवल कर्म से ही जनक इत्यादि ने पूर्ण सिद्धि को प्राप्त किया । एकमात्र, लोक कल्याण को देखते हुए भी, तुझे कर्म करना चाहिए ।

**३.२१ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥**

यद् यद् आचरतिश् श्रेष्ठस्
तत् तद् एवे (इ)तरो जनः
स यत् प्रमाणं कुरुते
लोकस् तद् अनुवर्तते

यत् यत् आचरति श्रेष्ठः तत् तत् एव इतरः जनः
सः यत् प्रमाणम् कुरुते लोकः तत् अनुवर्तते

जो जो श्रेष्ठ पुरुष करता है, दूसरे लोग केवल वही (करते हैं), जो मापदण्ड वह बना देता है, संसार उसका अनुसरण करता है ।

३.२२ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥

न मे पार्था (अ)स्ति कर्तव्यं
त्रिषु लोकेषु किंचन - -
ना (अ)नवाप्तम् अवाप्तव्यं
वर्त एव च कर्मणि - -

न मे पार्थ अस्ति कर्तव्यम् त्रिषु लोकेषु किंचन
न अनवाप्तम् अवाप्तव्यम् वर्ते एव च कर्मणि

हे पार्थ ! तीनों लोकों में ऐसा कुछ नहीं है जो मेरे करने के लिए हो । और, न (ऐसा कुछ) अप्राप्य है, जो प्राप्त करने के योग्य हो, फिर भी, मैं कर्म करता रहता हूँ ।

३.२३ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

यदि ह्य् अहं न वर्तेयं
जातु कर्मण्य् अतन्द्रितः
मम वर्त्मा (अ)नुवर्तन्ते
मनुष्याः पार्थ सर्वशः

यदि हि अहम् न वर्तेयम् जातु कर्मणि अतन्द्रितः
मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

सचमुच, यदि मैं सदा काम में, बिना अलसाए न लगा रहूँ , तो मेरे ही पथ का अनुसरण करने लग जाएंगे मनुष्य, पार्थ, हर कहीं ।

**३.२४ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥**

उत्सीदेयुर् इमे लोका
न कुर्यां कर्म चेद् अहम्
संकरस्य च कर्ता स्याम्,
उपहन्याम् इमाः प्रजाः

उत्सीदेयुः इमे लोकाः न कुर्याम् कर्म चेत् अहम्
संकरस्य च कर्ता स्याम् उपहन्याम् इमाः प्रजाः

यदि मैं कर्म न करूं तो ये लोक नष्ट भ्रष्ट हो जाएं, और, मैं सारी अव्यवस्था का कर्ता, और इन (सब) लोगों का नाश करने वाला होऊं ।

**३.२५ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥**

सक्ताः कर्मण्य् अविद्वांसो
यथा कुर्वन्ति, भारत - -
कुर्याद् विद्वांस् तथा (अ)सक्तश्
चिकीर्षुर् लोकसंग्रहम्

सक्ताः कर्मणि अविद्वांसः यथा कुर्वन्ति भारत
कुर्यात् विद्वान् तथा असक्तः चिकीर्षुः लोकसंग्रहम्

जिस प्रकार अज्ञानी (जन) कर्म में आसक्त होकर व्यवहार करते हैं, भारत ! उसी प्रकार ज्ञानी (पुरुष) को (कर्म) करना चाहिए,- अनासक्त रहकर, लोक कल्याण की इच्छा से ।

**३.२६ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥**

न बुद्धिभेदं जनयेद्
अज्ञानां कर्मसंगिनाम्
जोषयेत् सर्वकर्माणि - -
विद्वान् युक्तः समाचरन्

न बुद्धिभेदम् जनयेत् अज्ञानाम् कर्मसंगिनाम्
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्

कर्म में आसक्त अज्ञानियों की बुद्धि को भ्रम में नहीं डालना चाहिए । विद्वान् पुरुष को चाहिए, सब कर्मों में (उनकी) रूचि कराए, (स्वयं) सन्तुलित कर्म करते हुए ।

**३.२७ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥**

प्रकृतेः क्रियमाणानि - -
गुणैः कर्माणि सर्वशः
अहंकार विमूढात्मा
कर्ता (अ)हम् इति मन्यते

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः
अहंकारविमूढात्मा कर्ता अहम् इति मन्यते

प्रकृति के गुणों द्वारा कर्म, सब कहीं किए जाते हैं । (पर) अहंकार से मोहित (व्यक्ति) ऐसा मानता है कि "कर्ता मैं हूं ।"

३.२८ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥

तत्त्ववित् तु, महाबाहो
गुणकर्म विभागयोः
गुणा गुणेषु वर्तन्त – –
इति मत्वा न सज्जते

तत्त्ववित् तु महाबाहो गुणकर्मविभागयोः
गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते

हे महाबाहो । गुण और कर्म के विभाजन को ठीक-ठीक जानने वाला, ऐसा मान कर कि गुण गुणों में रहते हैं,[६] आसक्त नहीं होता ।

३.२९ प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥

प्रकृतेर् गुणसंमूढाः
सज्जन्ते गुणकर्मसु – –
तान् अकृत्स्नविदो मन्दान्
कृत्स्नविन् न विचालयेत्

प्रकृतेः गुणसंमूढाः सज्जन्ते गुणकर्मसु
तान् अकृत्स्नविदः मन्दान् कृत्स्नवित् न विचालयेत्

प्रकृति के गुणों से मोहित (पुरुष) गुणों द्वारा उत्पन्न कर्मों में आसक्त रहते हैं । ये मन्द बुद्धि लोग सारी बात नहीं जानते । सर्वज्ञानी को चाहिए, इन्हें विचलित न करे ।

६. अर्थात् इन्द्रियां अपने-अपने विषयों में रमती हैं ।

३.३० मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥

मयि सर्वाणि कर्माणि - -
संन्यस्या (अ)ध्यात्मचेतसा
निराशीर् निर्म्ममो भूत्वा
युध्यस्व विगतजूज्वरः

मयि सर्वाणि कर्माणि संन्यस्य अध्यात्मचेतसा
निराशीः निर्ममः भूत्वा युध्यस्व विगतज्वरः

अध्यात्म बुद्धि से सर्व कर्मों को मुझ में अर्पण करके, आशा और ममत्व रहित होकर, तू युद्ध कर, बिना किसी शोक-संताप के ।

३.३१ ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥

ये मे मतम् इदं नित्यम्
अनुतिष्ठन्ति मानवाः
श्रद्धावन्तो (अ)नसूयन्तो,
मुच्यन्ते ते (अ)पि कर्म्मभिः

ये मे मतम् इदम् नित्यम् अनुतिष्ठन्ति मानवाः
श्रद्धावन्तः अनसूयन्तः मुच्यन्ते ते अपि कर्मभिः

जो मनुष्य मेरे इस मत का नित्य अनुसरण करते हैं, श्रद्धावान् हैं, छिद्रान्वेषण नहीं करते, वे भी कर्मों से मुक्त हो जाते हैं ।

३.३२ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥

ये त्व् एतद् अभ्यसूयन्तो,
ना (अ)नुतिष्ठन्ति मे मतम्
सर्वज्ञानविमूढांस् तान्
विद्धि नष्टान् अचेतसः

ये तु एतत् अभ्यसूयन्तः न अनुतिष्ठन्ति मे मतम्
सर्वज्ञानविमूढान् तान् विद्धि नष्टान् अचेतसः

इसके विपरीत, जो मेरे मत का अनुसरण नहीं करते, इस में छिद्रान्वेषण करते हैं, जो हर ज्ञान से विमूढ हैं, तू नष्ट हुआ समझ, उन अज्ञानियों को।

३.३३ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥

सदृशं चेष्टते स्वस्याः
प्रकृतेर् ज्ञानवान् अपि - -
प्रकृतिं यान्ति भूतानि - -
निग्रहः किं करिष्यति - -

सदृशम् चेष्टते स्वस्याः प्रकृतेः ज्ञानवान् अपि
प्रकृतिम् यान्ति भूतानि निग्रहः किम् करिष्यति

ज्ञानी पुरुष भी अपनी प्रकृति के अनुसार ही व्यवहार करता है। सब प्राणी अपने स्वभाव का अनुसरण करते हैं। (ऐसी स्थिति में बलपूर्वक किया निरोध-) निग्रह क्या करेगा ?

३.३४ इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥

इन्द्रियस्ये (इ)न्द्रियस्या (अ)र्थे
रागद्द्वेषौ व्यवस्थितौ
तयोर् न वशम् आगच्छेत्
तौ हय् अस्य परिपन्थिनौ

इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ
तयोः न वशम् आगच्छेत् तौ हि अस्य परिपन्थिनौ

प्रत्येक इन्द्रिय की विषयवस्तु में राग और द्वेष बैठे हुए हैं । इनके वश में नहीं आना चाहिए । ये दोनों वास्तव में उसके (मनुष्य के) पथ के बाधक हैं ।

३.३५ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

श्रेयान् स्वधर्मो विगुणः
परधर्मात् स्वनुष्ठितात्
स्वधर्मे निधनं श्रेयः ,
परधर्मो भयावहः

श्रेयान् स्वधर्मः विगुणः परधर्मात् स्वनुष्ठितात्
स्वधर्मे निधनम् श्रेयः परधर्मः भयावहः

भले ही गुणरहित हो, अपना धर्म श्रेष्ठ है पराये धर्म की अपेक्षा, जो भली भांति निभाया जाए । अपने धर्म में मरना भला है, परधर्म भय प्रद है ।

३.३६ **अर्जुन उवाच -**
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

अथ केनप् प्रयुक्तो (अ)यं
पापं चरति पूरुषः
अनिच्छन्न् अपि, वार्ष्णेय - -,
बलाद् इव नियोजितः

अथ केन प्रयुक्तः अयम् पापम् चरति पूरुषः
अनिच्छन् अपि वार्ष्णेय बलात् इव नियोजितः

अर्जुन उवाच -
फिर यह मनुष्य, किससे प्रेरित होकर पाप का आचरण करता है, इच्छा न रहते हुए भी । हे वार्ष्णेय ! मानों बलपूर्वक विवश किया गया हो ।

३.३७ **श्री भगवानुवाच -**
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

काम एष्क् क्रोध एष - -
रजो गुण समुद्भवः
महाशनो महापाप्मा,
विद्ध्य् एनम् इह वैरिणम्

कामः एष क्रोधः एषः रजोगुणसमुद्भवः
महाशनः महापाप्मा विद्धि एनम् इह वैरिणम्

श्री भगवान् उवाच -
यह काम, यह क्रोध, रजोगुण से उत्पन्न है । यह (काम) सब कुछ निगलने वाला है, महापापी है । इस संसार में, तू इसे शत्रु जान ।

३.३८ **धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।**
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥

धूमेना (आ)व्रियते वह्निर्
यथा (आ)दर्शो मलेन च --
यथो (उ)ल्बेना (आ)वृतो गर्भस्
तथा तेने (इ)दम् आवृतम्

धूमेन आव्रियते वह्निः यथा आदर्शः मलेन च
यथा उल्बेन आवृतः गर्भः तथा तेन इदम् आवृतम्

धुएं से जैसे, अग्नि ढकी रहती है और धूल से दर्पण; जैसे गर्भ झिल्ली से घिरा रहता है, वैसे ही इस (काम) ७ से यह (ज्ञान) ८ ढका है ।

३.३९ **आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।**
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥

आवृतं ज्ञानम् एतेन --
ज्ञानिनो नित्यवैरिणा
कामरूपेण, कौन्तेय --,
दुष्पूरेणा (अ)नलेन च --

आवृतम् ज्ञानम् एतेन ज्ञानिनः नित्यवैरिणा
कामरूपेण कौन्तेय दुष्पूरेण अनलेन च

इस (काम) द्वारा ज्ञान ढका रहता है । यह ज्ञानी पुरुष का नित्य का वैरी है । और कौन्तेय कभी तृप्त न होने वाली कामनाएं ज्वाला हैं ।

७ और ८ देखिए नीचे श्लोक ३.३९

३.४० इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥

इन्द्रियाणि मनो बुद्धिर्
अस्या (अ)धिष्ठानम् उच्यते
एतैर् विमोहयत्य् एष - -
ज्ञानम् आवृत्य देहिनम्

इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानम् उच्यते
एतैः विमोहयति एषः ज्ञानम् आवृत्य देहिनम्

इन्द्रियाँ, मन, बुद्धि इसके आधार स्थान कहे जाते हैं। इनके द्वारा ज्ञान को ढककर, यह मोह में डाल देता है, देहधारी को।

३.४१ तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

तस्मात् त्वम् इन्द्रियाण्य् आदौ
नियम्य, भरतर्षभ - -,
पाप्मानं प्रजहि ह्य् एनं
ज्ञानविज्ञाननाशनम्

तस्मात् त्वम् इन्द्रियाणि आदौ नियम्य भरतर्षभ
पाप्मानम् प्रजहि हि एनम् ज्ञानविज्ञाननाशनम्

अतः पहले तू इन्द्रियों को नियंत्रण में करके, भरतर्षभ! इस पापी को निश्चय ही मार डाल। यह ज्ञान विज्ञान का नाश करने वाला है।

३.४२ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥

इन्द्रियाणि पराण्य् आहुर्
इन्द्रियेभ्यः परं मनः
मनसस् तु परा बुद्धिर्
यो बुद्धेः परतस् तु सः

इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परम् मनः
मनसः तु परा बुद्धिः यः बुद्धेः परतः तु सः

कहते हैं, इन्द्रियां श्रेष्ठ हैं, इन्द्रियों से श्रेष्ठ मन है । फिर, मन से श्रेष्ठ बुद्धि है, परन्तु जो वास्तव में, बुद्धि से भी परे है, वह "वह" है ।

३.४३ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥

एवं बुद्धेः परं बुद्ध्वा,
संस्तभ्या (आ)त्मानम् आत्मना
जहि शत्रुं, महाबाहो,
कामरूपम् दुरासदम्

एवम् बुद्धेः परम् बुद्ध्वा संस्तभ्य आत्मानम् आत्मना
जहि शत्रुम् महाबाहो कामरूपम् दुरासदम्

इस प्रकार "उसे" बुद्धि से श्रेष्ठ जानते हुए, अपने को अपने द्वारा स्थिर करके, तू शत्रु को मार डाल महाबाहो, जो काम के रूप में है, (जिसे) पकड़ पाना कठिन है ।

श्री कृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे
हरे राम हरे राम राम राम हरे हरे

परिचय-४

अध्याय ३ में "कर्म योग" क्या है, बतलाया गया है। अध्याय ४ में भगवान् , कर्म योग का इतिहास बतलाते हैं। कर्म, अकर्म और विकर्म के भेद समझाते हैं। कर्म जो करने ही पड़ते हैं, कैसे करना चाहिएं ?

कर्मों का आरम्भ किसी कामना से नहीं करना चाहिए और न कर्म फल में आसक्ति होनी चाहिए। यही कर्म संन्यास है।

आगे भगवान् नाना रूप यज्ञों का वर्णन करते हैं जो कर्म जनित हैं।

सर्व कर्मों की पूर्ण रूप से पराकाष्ठा ज्ञान में है। ज्ञान यज्ञ सर्व श्रेष्ठ है।

अध्याय ४ का नाम है "ज्ञान कर्म-संन्यास योग"।

श्रीमद्भगवद्गीता

अथ चतुर्थोऽध्यायः

(श्री कृष्णार्जुनसंवादे ज्ञानकर्मसंन्यास योगः) *

४.१ श्रीभगवानुवाच-
इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

इमं विवस्वते योगं
प्रोक्तवान् अहम् अव्ययम्
विवस्वान् मनवे प्राह - -
मनुर् इक्ष्वाकवे (अ)ब्रवीत्

इमम् विवस्वते योगम् प्रोक्तवान् अहम् अव्ययम्
विवस्वान् मनवे प्राह मनुः इक्ष्वाकवे अब्रवीत्

भगवान् उवाच -
इस अक्षय योग[1] को मैंने सूर्य से कहा था, सूर्य ने मनु को बतलाया, मनु ने इक्ष्वाकु से कहा ।

१. अध्याय ३ में बतलाया- कर्मयोग
* इस अध्याय का दूसरा नाम है - ज्ञान (अथवा ज्ञानविभाग) योग

Agamnigam Digital Preservation Foundation, Chandigarh

४.६ अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥

अजो (अ)पि सन् अव्ययात्मा
भूतानाम् ईश्वरो (अ)पि सन्
प्रकृतिं स्वाम् अधिष्ठाय - -
संभवाम्य् आत्ममायया

अजः अपि सन् अव्ययात्मा भूतानाम् ईश्वरः अपि सन्
प्रकृतिम् स्वाम् अधिष्ठाय सम्भवामि आत्ममायया

अजन्मा, अविनाशी होते हुए भी, (और) सब प्राणियों का ईश्वर होने पर भी, मैं जन्म लेता हूँ–अपनी प्रकृति पर आधारित, अपनी माया से ।

४.७ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

यदा यदा हि धर्मस्य - -
ग्लानिर् भवति, भारत - -
अभ्युत्थानम् अधर्मस्य - -
तदा (आ)त्मानं सृजाम्य् अहम्

यदा यदा हि धर्मस्य ग्लानिः भवति भारत
अभ्युत्थानम् अधर्मस्य तदा आत्मानम् सृजामि अहम्

वास्तव में, जब-जब धर्म का पतन होता है भारत । अधर्म बढ़ने लगता है, तब मैं अपने आपको व्यक्त करता हूँ ।

४.८ **परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।**
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

परित्राणाय साधूनां,
विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय - -
संभवामि युगे युगे

परित्राणाय साधूनाम् विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय संभवामि युगे युगे

साधु पुरुषों की रक्षा के निमित्त, दुष्टों का विनाश करने के लिए, तथा धर्म की भलीभाँति स्थापना करने के हित, मैं युग-युग में (प्रकट) होता हूँ ।

४.९ **जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।**
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

जन्म कर्म च मे दिव्यम्
एवं यो वेत्ति तत्त्वतः
त्यक्त्वा देहं पुनर्जन्म - -
नै (ए)ति, माम् एति सो (अ)र्जुन - -

जन्म कर्म च मे दिव्यम् एवम् यः वेत्ति तत्त्वतः
त्यक्त्वा देहम् पुनः जन्म न एति माम् एति सः अर्जुन

मेरे दिव्य जन्म और कर्म को जो इस प्रकार ठीक ठीक जानता है, वह देह त्याग कर पुनर्जन्म नहीं लेता । वह मुझसे आ मिलता है, अर्जुन ।

४.१० वीतरागभयक्रोधा मन्मया मामुपाश्रिताः
बहवो ज्ञानतपसा पूता मद्भावमागताः ।

वीतरागभयक् क्रोधा
मन्मया माम् उपाश्रिताः
बहवो ज्ञानतपसा
पूता मद्भावम् आगताः

वीतरागभयक्रोधाः मन्मया माम् उपाश्रिताः
बहवः ज्ञानतपसा पूताः मद्भावम् आगताः

राग, भय और क्रोध से रहित, मुझमें लीन, मेरी शरण लिए, ज्ञानरूपी तप से पवित्र हुए अनेक मेरे स्वरूप को प्राप्त हो गए हैं।

४.११ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ।।

ये यथा मां प्रपद्यन्ते
तांस् तथै (ए)व भजाम्य् अहम्
मम वर्त्मा (अ)नुवर्तन्ते
मनुष्याः पार्थ सर्वशः

ये यथा माम् प्रपद्यन्ते तान् तथा एव भजामि अहम्
मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः

जो जैसे मेरे पास आते हैं, मै भी वैसे ही उनका स्वागत करता हूँ । मनुष्य मेरे ही मार्ग का अनुसरण करते हैं, पार्थ ! सर्वत्र ।

४.१२ कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥

कांक्षन्तः कर्मणां सिद्धिं
यजन्त इह देवताः
क्षिप्रं हि मानुषे लोके
सिद्धिर् भवति कर्मजा

कांक्षान्तः कर्मणाम् सिद्धिम् यजन्ते इह देवताः
क्षिप्रम् हि मानुषे लोके सिद्धिः भवति कर्मजा

कर्मों की सफलता चाहने वाले, इस संसार में देवताओं के लिए यज्ञ करते हैं । वास्तव में, मनुष्य लोक में सिद्धि, शीघ्र ही उत्पन्न होती है, कर्मों से ।

४.१३ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥

चातुर्वर्ण्यं मया सृष्टं
गुणकर्मविभागशः
तस्य कर्तारम् अपि मां
विद्ध्य् अकर्तारम् अव्ययम्

चातुर्वर्ण्य मया सृष्टम् गुणकर्मविभागशः
तस्य कर्तारम् अपि माम् विद्धि अकर्तारम् अव्ययम्

गुण और कर्म के विभागानुसार चारों वर्ण मेरे द्वारा उत्पन्न हुए थे । उनका कर्ता होने पर भी, तू मुझे समझ–अकर्त्ता, अविनाशी ।

४.१४ न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥

न मां कर्माणि लिम्पन्ति, - -
न मे कर्मफले स्पृहा
इति मां यो (अ)भिजानाति - -
कर्मभिर् न स बध्यते

न माम् कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा
इति माम् यः अभिजानाति कर्मभिः न सः बध्यते

न मुझे कर्म प्रभावित करते हैं । न मुझको कर्म फल की इच्छा है । इस प्रकार जो मुझे जानता है, वह कर्मों से नहीं बंधता ।

४.१५ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥

एवं ज्ञात्वा कृतं कर्म - -
पूर्वैर् अपि मुमुक्षुभिः
कुरु कर्मै (ए)व तस्मात् त्वं
पूर्वैः पूर्वतरं कृतम्

एवम् ज्ञात्वा कृतम् कर्म पूर्वैः अपि मुमुक्षुभिः
कुरु कर्म एव तस्मात् त्वम् पूर्वैः पूर्वतरम् कृतम्

ऐसा जानकर, मोक्ष के अभिलाषी पूर्वजों ने भी कर्म किए । अतः तू भी कर्म कर, जैसे पुरखों ने पूर्व काल में, किए थे ।

४.१६ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥

किं कर्म किम् अकर्मे (इ)ति - -
कवयो (अ)प्य् अत्र मोहिताः
तत् ते कर्मप् प्रवक्ष्यामि - -
यज् ज्ञात्वा मोक्ष्यसे (अ)शुभात्

किम् कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः
तत् ते कर्म प्रवक्ष्यामि यत् ज्ञात्वा मोक्ष्यसे अशुभात्

"कर्म क्या है, अकर्म क्या है"; इस प्रकार ("विचार" करते हुए), इस विषय में ज्ञानी पुरुष भी भ्रम में हैं । अतः मैं तुझे बतलाऊंगा कर्म (क्या है), जिसे जान कर तू अमंगल से मुक्त हो जाएगा ।

४.१७ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥

कर्मणो ह्य् अपि बोद्धव्यं
बोद्धव्यं च विकर्मणः
अकर्मणश् च बोद्धव्यं
गहना कर्मणो गतिः

कर्मणः हि अपि बोद्धव्यम् बोद्धव्यम् च विकर्मणः
अकर्मणः च बोद्धव्यम् गहना कर्मणः गतिः

वास्तव में, जानना चाहिए कर्म (का स्वरूप) क्या है और यह भी जानना चाहिए "विकर्म" (का स्वरूप) क्या है, और फिर जानना चाहिए "अकर्म" (का स्वरूप) क्या है । कर्म की राह कठिन है ।

**४.१८ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥**

कर्मण्य् अकर्म यः पश्येद्
अकर्मणि च कर्म यः
स बुद्धिमान् मनुष्येषु - -
स युक्तः कृत्स्नकर्मकृत्

कर्मणि अकर्म यः पश्येत् अकर्मणि च कर्म यः
सः बुद्धिमान् मनुष्येषु सः युक्तः कृत्स्नकर्मकृत्

जो कर्म में अकर्म देखता है और जो अकर्म में कर्म, वह मनुष्यों में बुद्धिमान् है। वह (योग) युक्त है–सब कर्म करते हुए भी। [२]

**४.१९ यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥**

यस्य सर्वे समारम्भाः
कामसंकल्पवर्जिताः
ज्ञानाग्निदग्ध कर्माणं
तम् आहुः पण्डितं बुधाः

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः
ज्ञानाग्निदग्धकर्माणम् तम् आहुः पण्डितम् बुधाः

जिसके सब कार्य आरम्भ होते हैं, कामना और कल्पना से विमुक्त हो कर, ज्ञानाग्नि से जिसके कर्म भस्म हो गए हैं, उसे बुद्धिमान् लोग ज्ञानी कहते हैं।

२. कर्म और अकर्म में भेद न देखना, ज्ञानी की साम्यावस्था का, यह अनुपम चित्रण है।

४.२० त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥

त्यक्त्वा कर्मफलासङ्गं
नित्यतृप्तो निराश्रयः
कर्मण्य् अभिप् प्रवृत्तो (अ)पि – –
नै (ए)व किंचित् करोति सः

त्यक्त्वा कर्मफलासङ्गम् नित्यतृप्तः निराश्रयः
कर्मणि अभिप्रवृत्तः अपि न एव किंचित् करोति सः

कर्मफल की आसक्ति को त्यागकर, सदैव संतुष्ट, बिना किसी पर निर्भर, काम में लगा हुआ भी, वह कुछ भी नहीं करता है।

४.२१ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

निराशीर् यतचित्तात्मा
त्यक्तसर्वपरिग्रहः
शारीरं केवलं कर्म – –
कुर्वन् ना (आ)प्नोति किल्बिषम्

निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः
शारीरम् केवलम् कर्म कुर्वन् न आप्नोति किल्बिषम्

जो किसी प्रकार की आशा नहीं रखता, जिसका मन और अन्तःकरण वश में है, जिसने सब-कुछ संग्रह करना त्याग दिया है, केवल शरीर का कर्म करते हुए, वह पाप में नहीं फंसता।

४.२२ यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

यदृच्छालाभसंतुष्टो,
द्वन्द्वातीतो विमत्सरः
समः सिद्धाव् असिद्धौ च - -
कृत्वा (अ)पि न निबध्यते

यदृच्छालाभसंतुष्टः द्वन्द्वातीतः विमत्सरः
समः सिद्धौ असिद्धौ च कृत्वा अपि न निबध्यते

अनायास प्राप्त वस्तुओं से संतुष्ट, द्वंद्वों से परे, ईर्ष्यारहित, सफलता और असफलता में समान रहने वाला, कर्म करके भी बन्धन में नहीं पड़ता ।

४.२३ गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥

गतसङ्गस्य मुक्तस्य - -
ज्ञानावस्थितचेतसः
यज्ञाया (आ)चरतः, कर्म - -
समग्रं प्रविलीयते

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः
यज्ञाय आचरतः कर्म समग्रम् प्रविलीयते

जिसकी आसक्ति चली गई है, जो मुक्त है, जिसका चित्त ज्ञान में स्थित है, यज्ञ के लिए जिसका आचरण है, उसके सम्पूर्ण कर्म विलीन हो जाते हैं ।

४.२४ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

ब्रह्मा (अ)र्पणं ब्रह्म हविर्
ब्रह्माग्नौ ब्रह्मणा हुतम्
ब्रह्मै (ए)व तेन गन्तव्यं
ब्रह्मकर्म समाधिना

ब्रह्म अर्पणम् ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्
ब्रह्म एव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना

(जिसके लिए) अर्पण ब्रह्म है, हवि ब्रह्म है, ब्रह्माग्नि में ब्रह्म द्वारा ही जो होम करता है, उसे ब्रह्म ही प्राप्त होता है- जिसके कर्म और चिन्तन में एक मात्र ब्रह्म है ।

४.२५ दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥

दैवम् एवा (अ)परे यज्ञं
योगिनः पर्युपासते
ब्रह्माग्नाव् अपरे यज्ञं
यज्ञेनै (ए)वो (उ)पजुह्वति - -

दैवम् एव अपरे यज्ञम् योगिनः पर्युपासते
ब्रह्माग्नौ अपरे यज्ञम् यज्ञेन एव उपजुह्वति

कुछ योगी जन एकमात्र देवताओं के निमित्त यज्ञ करके उपासना करते हैं । और फिर कुछ दूसरे, ब्रह्माग्नि में, यज्ञ द्वारा केवल यज्ञ का ही हवन करते हैं ।[१]

१. श्लोक के उत्तरार्ध में "यज्ञ" का अर्थ आचार्य ने "आत्मा" किया है- और फिर कुछ दूसरे, ब्रह्माग्नि में अपने द्वारा अपना (अपनेपन का) ही हवन करते हैं ।

४.२६ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥

श्रोत्रादीनी (इ)न्द्रियाण्य् अन्ये
संयमाग्निषु जुह्वति - -
शब्दादीन् विषयान् अन्य - -
इन्द्रियाग्निषु जुह्वति - -

श्रोत्रादीनि इन्द्रियाणि अन्ये संयमाग्निषु जुह्वति
शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु जुह्वति

कोई श्रवणादि इन्द्रियों का हवन संयम की अग्नि में करते हैं, और कोई शब्दादि विषयों का हवन इन्द्रियाग्नि में करते हैं ।

४.२७ सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥

सर्वाणी (इ)न्द्रियकर्माणि - -
प्राणकर्माणि चा (अ)परे
आत्मसंयमयोगाग्नौ
जुह्वति ज्ञानदीपिते

सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च अपरे
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते

और कोई दूसरे सम्पूर्ण इन्द्रिय- क्रियाओं और प्राण- क्रियाओं का हवन करते हैं, आत्मसंयम की योगाग्नि में- ज्ञान से प्रज्वलित ।

४.२८ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥

द्रव्ययज्ञास् तपोयज्ञा
योगयज्ञास् तथा (अ)परे
स्वाध्याय ज्ञानयज्ञाश् च - -
यतयः संशितव्रताः

द्रव्ययज्ञाः तपोयज्ञाः योगयज्ञाः तथा अपरे
स्वाध्यायज्ञानयज्ञाः च यतयः संशितव्रताः

इस प्रकार और कई दूसरे द्रव्य-यज्ञ करने वाले हैं, तप-यज्ञ करने वाले हैं, योग-यज्ञ करने वाले हैं, स्वाध्याय से ज्ञान-यज्ञ करने वाले हैं और यति लोग हैं, कठिन व्रत करने वाले ।

४.२९ अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥

अपाने जुह्वतिप् प्राणं
प्राणे (अ)पानं तथा (अ)परे
प्राणापानगती रुद्ध्वा
प्राणायामपरायणाः

अपाने जुह्वति प्राणम् प्राणे अपानम् तथा अपरे
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः

ऐसे ही कई अपान वायु (भीतर जाने वाली श्वास) का होम प्राण वायु (बाहर आने वाली श्वास) में करते हैं। और कई प्राण वायु का हवन अपान में करते हैं। और कई प्राण अपान की गतियों को रोक कर प्राणायाम का ही आश्रय लेते हैं।

**४.३० अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥**

अपरे नियताहाराः
प्राणान् प्राणेषु जुह्वति - -
सर्वे (अ)प्य् एते यज्ञविदो
यज्ञक् क्षपितकल्मषाः

अपरे नियताहाराः प्राणान् प्राणेषु जुहृवति
सर्वे अपि एते यज्ञविदः यज्ञक्षपितकल्मषाः

और कई नियमित आहार करने वाले प्राणों का प्राणों में ही हवन करते हैं। यह सब ही यज्ञ के ज्ञाता हैं। यज्ञ द्वारा इनके पाप दूर हो गए हैं।

**४.३१ यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥**

यज्ञशिष्टामृतभुजो
यान्ति ब्रह्म सनातनम्
ना (अ)यं लोको (अ)स्त्य् अयज्ञस्य - -
कुतो (अ)न्यः कुरुसत्तम - -

यज्ञशिष्टामृतभुजः यान्ति ब्रह्म सनातनम्
न अयम् लोकः अस्ति अयज्ञस्य कुतः अन्यः कुरुसत्तम

यज्ञ से बचे हुए को अमृत समझ खाने वाले, शाश्वत ब्रह्म को प्राप्त होते हैं। यज्ञ न करने वाले के लिए यह लोक नहीं है। फिर परलोक कैसा, हे कुरुश्रेष्ठ !

४.३२ **एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥**

एवं बहुविधा यज्ञा
वितता ब्रह्मणो मुखे
कर्मजान् विद्धि तान् सर्वान्
एवं ज्ञात्वा विमोक्ष्यसे

एवम् बहुविधाः यज्ञाः विततः ब्रह्मणः मुखे
कर्मजान् विद्धि तान् सर्वान् एवम् ज्ञात्वा विमोक्ष्यसे

इस प्रकार नाना रूप यज्ञों का वेद में विस्तार से वर्णन है । उन सब को तू कर्मजनित समझ । ऐसा समझने पर तू मुक्त हो जाएगा ।

४.३३ **श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥**

श्रेयान् द्रव्यमयाद् यज्ञाज्
ज्ञानयज्ञः, परंतप – –
सर्वं कर्मा (अ)खिलं पार्थ – –
ज्ञाने परिसमाप्यते

श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परंतप
सर्वम् कर्म अखिलम् पार्थ ज्ञाने परिसमाप्यते

द्रव्य-यज्ञ की अपेक्षा ज्ञानयज्ञ अधिक श्रेष्ठ है, परन्तप । सब कर्मों की पूर्ण रूप से पराकाष्ठा, हे पार्थ, ज्ञान में है ।

**४.३४ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥**

तद् विद्धिप् प्रणिपातेन - -
परिप् प्रश्नेन सेवया
उपदेक्ष्यन्ति ते ज्ञानं
ज्ञानिनस् तत्त्वदर्शिनः

तत् विद्धि प्रणिपातेन परिप्रश्नेन सेवया
उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनः तत्त्वदर्शिनः

तू इस (ज्ञान) को जान ले, विनय पूर्वक, भली प्रकार प्रश्न करते हुए, सेवा भाव से । तुझे ज्ञान का उपदेश देंगे- ज्ञानी लोग, तत्त्व को जानने वाले ।

**४.३५ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥**

यज् ज्ञात्वा न पुनर् मोहम्
एवं यास्यसि पाण्डव - -
येन भूतान्य् अशेषेण - -
द्रक्ष्यस्य् आत्मन्य् अथो मयि - -

यत् ज्ञात्वा न पुनः मोहम् एवम् यास्यसि पाण्डव
येन भूतानि अशेषेण द्रक्ष्यसि आत्मनि अथो मयि

इसे जानकर तू फिर इस प्रकार भ्रम में नहीं पड़ेगा, पाण्डव । इसके द्वारा तू निश्शेष, सम्पूर्ण प्राणियों को अपने में देखेगा, और फिर मुझमें ।

४.३६ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥

अपि चेद् असि पापेभ्यः
सर्वेभ्यः पापकृत्तमः
सर्वं ज्ञानप्‌लवेनै (ए)व – –
वृजिनं संतरिष्यसि – –

अपि चेद् असि पापेभ्यः सर्वेभ्यः पापकृत्तमः
सर्वम् ज्ञानप्लवेन एव वृजिनम् संतरिष्यसि

यदि तू सब पापियों से भी बढ़कर पाप करने वाला है तो भी केवल ज्ञान नौका से तू सब पापों को पार कर जायेगा ।

४.३७ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

यथै (ए)धांसि समिद्धो (अ)ग्निर्
भस्मसात् कुरुते (अ)र्जुन – –
ज्ञानाग्निः सर्वक्कर्माणि – –
भस्मसात् कुरुते तथा

यथा एधांसि समिद्धः अग्निः भस्मसात् कुरुते अर्जुन
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा

जैसे प्रज्वलित अग्नि ईंधन को राख कर देती है,अर्जुन, वैसे ही ज्ञानाग्नि सब कर्मों को भस्म कर देती है ।

४.३८ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

न हि ज्ञानेन सदृशं
पवित्रम् इह विद्यते
तत् स्वयं योगसंसिद्धः
कालेना (आ)त्मनि विन्दति - -

न हि ज्ञानेन सदृशम् पवित्रम् इह विद्यते
तत् स्वयम् योगसंसिद्धः कालेन आत्मनि विन्दति

वास्तव में, इस लोक में ज्ञान के समान पवित्र करने वाला और कुछ नहीं है । वह जो स्वयं योग में सिद्ध है, अपने आप में इसे पा लेता है- समय पाकर ।

४.३९ श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

श्रद्धावान्ल् लभते ज्ञानं
तत्परः संयतेन्द्रियः
ज्ञानं लब्ध्वा परां शान्तिम्
अचिरेणा (अ)धिगच्छति - -

श्रद्धावान् लभते ज्ञानम् तत्परः संयतेन्द्रियः
ज्ञानम् लब्ध्वा पराम् शान्तिम् अचिरेण अधिगच्छति

श्रद्धावान् पुरुष, जो दृढसंकल्प है, जिसकी इन्द्रियां नियंत्रित हैं, ज्ञान प्राप्त कर लेता है (और) ज्ञान पाकर वह परम शान्ति को तुरन्त ही पा जाता है ।

४.४० अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नाऽयं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥

अज्ञश् चा (अ)श्रद्दधानश् च - -
संशयात्मा विनश्यति - -
ना (अ)यं लोको (अ)स्ति न परो
न सुखं संशयात्मनः

अज्ञः च अश्रद्दधानः च संशयात्मा विनश्यति
न अयम् लोकः अस्ति न परः न सुखम् संशयात्मनः

अज्ञानी, श्रद्धाहीन और संशय करने वाला (व्यक्ति) नष्ट हो जाता है । शंका करने वाले के लिए, न यह लोक है न परलोक, न सुख ।

४.४१ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥

योगसंन्यस्तकर्माणं
ज्ञानसंछिन्नसंशयम्
आत्मवन्तं, न कर्माणि - -
निबध्नन्ति धनंजय - -

योगसंन्यस्तकर्माणम् ज्ञानसंछिन्नसंशयम्
आत्मवन्तम् न कर्माणि निबध्नन्ति धनंजय

जिसने योग द्वारा कर्म त्याग दिया है, जिसने ज्ञान से संशय काट दिया है, जो अपने को वश में किए है, उसे कर्म नहीं बांधते, धनंजय ।

**४.३८ न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥**

न हि ज्ञानेन सदृशं
पवित्रम् इह विद्यते
तत् स्वयं योगसंसिद्धः
कालेना (आ)त्मनि विन्दति – –

न हि ज्ञानेन सदृशम् पवित्रम् इह विद्यते
तत् स्वयम् योगसंसिद्धः कालेन आत्मनि विन्दति

वास्तव में, इस लोक में ज्ञान के समान पवित्र करने वाला और कुछ नहीं है । वह जो स्वयं योग में सिद्ध है, अपने आप में इसे पा लेता है– समय पाकर ।

**४.३९ श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥**

श्रद्धावान्ल् लभते ज्ञानं
तत्परः संयतेन्द्रियः
ज्ञानं लब्ध्वा परां शान्तिम्
अचिरेणा (अ)धिगच्छति – –

श्रद्धावान् लभते ज्ञानम् तत्परः संयतेन्द्रियः
ज्ञानम् लब्ध्वा पराम् शान्तिम् अचिरेण अधिगच्छति

श्रद्धावान् पुरुष, जो दृढसंकल्प है, जिसकी इन्द्रियां नियंत्रित हैं, ज्ञान प्राप्त कर लेता है (और) ज्ञान पाकर वह परम शान्ति को तुरन्त ही पा जाता है ।

४.४० अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नाऽयं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥

अज्ञश् चा (अ)श्रद्दधानश् च - -
संशयात्मा विनश्यति - -
ना (अ)यं लोको (अ)स्ति न परो
न सुखं संशयात्मनः

अज्ञः च अश्रद्दधानः च संशयात्मा विनश्यति
न अयम् लोकः अस्ति न परः न सुखम् संशयात्मनः

अज्ञानी, श्रद्धाहीन और संशय करने वाला (व्यक्ति) नष्ट हो जाता है । शंका करने वाले के लिए, न यह लोक है न परलोक, न सुख ।

४.४१ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥

योगसंन्यस्तकर्माणं
ज्ञानसंछिन्नसंशयम्
आत्मवन्तं, न कर्माणि - -
निबध्नन्ति धनंजय - -

योगसंन्यस्तकर्माणम् ज्ञानसंछिन्नसंशयम्
आत्मवन्तम् न कर्माणि निबध्नन्ति धनंजय

जिसने योग द्वारा कर्म त्याग दिया है, जिसने ज्ञान से संशय काट दिया है, जो अपने को वश में किए है, उसे कर्म नहीं बांधते, धनंजय ।

४.४२ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छिन्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥

तस्माद् अज्ञानसंभूतं
हृत्स्थं ज्ञानासिना (आ)त्मनः
छित्त्वै (ए)नं संशयं, योगम्
आतिष्ठो (उ)त्तिष्ठ भारत – –

तस्मात् अज्ञानसंभूतम् हृत्स्थम् ज्ञानासिना आत्मनः
छित्त्वा एनम् संशयम् योगम् आतिष्ठ उत्तिष्ठ भारत

अतः अज्ञान से उत्पन्न मन में बैठे हुए इस संशय को आत्मज्ञान के कृपाण से काट कर योग का अभ्यास कर । उठ, खड़ा हो जा, भारत !

श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः
समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय–५

अध्याय ३ में "कर्म योग" और ४ में "कर्म संन्यास" की चर्चा की गई है। अब भगवान् कह रहे हैं – ये दोनो ही परम कल्याणकारक हैं। पर, "कर्म संन्यास" की अपेक्षा "कर्म योग" निश्चय ही श्रेष्ठ है।

योगी के गुण–कर्म विस्तार से बतलाते हैं। योगी सर्वत्र समदर्शी है। जो स्थान सांख्यजन-संन्यासी - प्राप्त करते हैं, कर्म योगी भी वहीं पहुंच जाता है।

अध्याय ५ का नाम है "संन्यास योग।"

श्रीमद्भगवद्गीता

अथ पञ्चमोऽध्यायः

(श्रीकृष्णार्जुनसंवादे संन्यासयोगः)

५.१ **अर्जुन उवाच —**
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥

संन्यासं कर्मणां, कृष्ण, – –
पुनर् योगं च शंससि – –
यच् छ्रेय एतयोर् एकं
तन् मे ब्रूहि सुनिश्चितम्

संन्यासम् कर्मणाम् कृष्ण पुनः योगम् च शंससि
यत् श्रेयः एतयोः एकम् तत् मे ब्रूहि सुनिश्चितम्

अर्जुन उवाच -
हे कृष्ण ! आप कर्म-संन्यास की प्रशंसा करते हैं और फिर योग की । इन दोनों में जो एक, अधिक कल्याणकर है वह मुझे बतलाइए, भली प्रकार से, निश्चय करके ।

५.२ श्रीभगवानुवाच –
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥

संन्यासः कर्मयोगश् च – –
निः श्रेयसकराव् उभौ
तयोस् तु कर्मसंन्यासात्
कर्मयोगो विशिष्यते

संन्यासः कर्मयोगः च निः श्रेयसकरौ उभौ
तयोः तु कर्मसंन्यासात् कर्मयोगः विशिष्यते

श्री भगवान् उवाच –
संन्यास और कर्मयोग दोनों ही परम कल्याणकारक हैं।
इन दोनों में कर्म-संन्यास की अपेक्षा कर्मयोग निश्चय ही श्रेष्ठ है।

५.३ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥

ज्ञेयः स नित्यसंन्यासी
यो नद् द्वेष्टि न काङ्क्षाति – –
निर्द्वन्द्वो हि, महाबाहो,
सुखं बन्धात् प्रमुच्यते

ज्ञेयः सः नित्यसंन्यासी यः न द्वेष्टि न काङ्क्षति
निर्द्वन्द्वः हि महाबाहो सुखम् बन्धात् प्रमुच्यते

उसे सदा संन्यासी जानना चाहिए जो न द्वेष करता है, न लालसा। वास्तव में, द्वंद्वों से मुक्त, महाबाहो। वह बड़ी सरलता से बन्धन से छुटकारा पा जाता है।

५.४ **सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।**
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥

सांख्ययोगौ पृथग् बालाः
प्रवदन्ति, न पण्डिताः
एकम् अप्य् आस्थितः सम्यग्
उभयोर् विन्दते फलम्

सांख्ययोगौ पृथक् बालाः प्रवदन्ति न पण्डिताः
एकम् अपि आस्थितः सम्यक् उभयोः विन्दते फलम्

सांख्य और योग[१] भिन्न भिन्न हैं, ऐसा बालक कहते हैं, ज्ञानी नहीं। जो किसी एक में भी भली प्रकार स्थित है, वह दोनों का फल पा लेता है।

५.५ **यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।**
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥

यत् सांख्यैः प्राप्यते स्थानं
तद् योगैर् अपि गम्यते
एकं सांख्यं च योगं च - -
यः पश्यति स पश्यति - -

यत् सांख्यैः प्राप्यते स्थानम् तत् योगैः अपि गम्यते
एकम् सांख्यम् च योगम् च यः पश्यति सः पश्यति

जो स्थान सांख्य जन प्राप्त करते हैं, योगी भी वहीं पहुंचते हैं। सांख्य और योग को जो एक रूप देखता है, वही देखता है, (तत्त्व को समझता है)

१. यहां योग का अर्थ है "कर्मयोग" और सांख्य का "ज्ञानयोग द्वारा संन्यास"...राधाकृष्णन्

५.६ **संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।**
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥

संन्यासस् तु, महाबाहो,
दुःखम् आप्तुम् अयोगतः
योगयुक्तो मुनिर् ब्रह्म – –
न चिरेणा (अ)धिगच्छति – –

संन्यासः तु महाबाहो दुःखम् आप्तुम् अयोगतः
योगयुक्तः मुनिः ब्रह्म नचिरेण अधिगच्छति

वास्तव में, संन्यास प्राप्त करना कठिन है, महाबाहो । बिना योग के । योग में रमा हुआ मुनि, बिना विलम्ब ब्रह्म को पहुंच जाता है ।

५.७ **योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।**
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥

योगयुक्तो विशुद्धात्मा
विजितात्मा जितेन्द्रियः
सर्वभूतात्मभूतात्मा
कुर्वन्न् अपि न लिप्यते

योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः
सर्वभूतात्मभूतात्मा कुर्वन् अपि न लिप्यते

जो योग में रमा है, जिसका अन्तःकरण शुद्ध है, जिसने अपने पर विजय पाई है, इन्द्रियों को जीता है, सर्व प्राणियों की आत्मा जिसकी (अपनी) आत्मा हो गई है, वह कर्म करते हुए भी, उस में लिप्त नहीं होता ।

५.८ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥

नै (ए)व किंचित् करोमी (इ)ति - -
युक्तो मन्येत तत्त्ववित्
पश्यञ् शृण्वन् स्पृशञ् जिघ्रन्न्
अश्नन् गच्छन् स्वपञ् श्वसन्

न एव किंचित् करोमि इति युक्तः मन्येत तत्त्ववित्
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन्

"मैं कुछ भी नहीं करता हूँ", ऐसा उसे मानना चाहिए जो योग युक्त है, तत्त्व को जानता है । देखते, सुनते, स्पर्श करते, सूंघते, खाते, चलते, सोते, श्वास लेते,-

५.९ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥

प्रलपन् विसृजन् गृह्णन्न्
उन्मिषन् निमिषन्न् अपि - -
इन्द्रियाणी (इ)न्द्रियार्थेषु - -
वर्तन्त, इति धारयन्

प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि
इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन्

बोलते, आदान प्रदान करते, आंखें खोलते और बंद करते हुए भी वह ऐसी धारणा रखता है कि - "इन्द्रियां अपने अपने विषयों में लगी हुई हैं"।

**५.१० ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥**

ब्रह्मण्य् आधाय कर्माणि - -
संगम् त्यक्त्वा करोति यः
लिप्यते न स पापेन - -
पद्मपत्रम् इवा (अ)म्भसा

ब्रह्मणि आधाय कर्माणि संगम् त्यक्त्वा करोति यः
लिप्यते न सः पापेन पद्मपत्रम् इव अम्भसा

जो, ब्रह्म में अर्पण करके, कर्मों को करता है, आसक्ति त्यागकर, वह पाप से लिप्त नहीं होता, जैसे कमल पत्र, जल से ।

**५.११ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये ॥**

कायेन मनसा बुद्ध्या,
केवलैर् इन्द्रियैर् अपि - -
योगिनः कर्म कुर्वन्ति,- -
संगं त्यक्त्वा (आ)त्मशुद्धये

कायेन मनसा बुद्धया केवलैः इन्द्रियैः अपि
योगिनः कर्म कुर्वन्ति संगम् त्यक्त्वा आतमशुद्धये

शरीर से, मन से, बुद्धि से (और) केवल इन्द्रियों से भी योगी लोग कर्म करते हैं- आसक्ति त्यागकर, अन्तःकरण की शुद्धि के लिए ।

५.१२ युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥

युक्तः कर्मफलं त्यक्त्वा
शान्तिम् आप्नोति नैष्ठिकीम्
अयुक्तः कामकारेण – –
फले सक्तो निबध्यते

युक्तः कर्मफलम् त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम्
अयुक्तः कामकारेण फले सक्तः निबध्यते

युक्त (पुरुष) कर्म फल को त्याग कर शान्ति को प्राप्त करता है, जो चिर स्थित है। अयुक्त (पुरुष), कामना से प्रेरित, (कर्म) फल में आसक्त हुआ, बन्धन में रहता है।

५.१३ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥

सर्वकर्माणि मनसा
संन्यस्या (आ)स्ते सुखं वशी
नवद्वारे पुरे, देही,
नै (ए)व कुर्वन् न कारयन्

सर्वकर्माणि मनसा संन्यस्य आस्ते सुखम् वशी
नवद्वारे पुरे देही न एव कुर्वन् न कारयन्

सब कर्मों को मन से त्याग कर, अपने को वश में रखने वाला, देहधारी सुख से रहता है, इस नौ द्वारों की नगरी (शरीर) में; न कुछ करते हुए, (और) न कुछ करने का, कारण होते हुए।

५.१४ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥

न कर्तृत्वं न कर्माणि - -
लोकस्य सृजतिप् प्रभुः
न कर्मफल संयोगं
स्वभावस् तु प्रवर्तते

न कर्तृत्वम् न कर्माणि लोकस्य सृजति प्रभुः
न कर्मफलसंयोगम् स्वभावः तु प्रवर्तते

ईश्वर, मनुष्यों के न कर्तापन की, न कर्मों की रचना करता है । (और) न कर्म और फल के संयोग की । वास्तव में, (यह सब उनके) स्वभाव से होता है ।

५.१५ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥

ना (आ)दत्ते कस्यचित् पापं
न चै (ए)व सुकृतं विभुः
अज्ञानेना (आ)वृतं ज्ञानं
तेन मुह्यन्ति जन्तवः

न आदत्ते कस्यचित् पापम् न च एव सुकृतम् विभुः
अज्ञानेन आवृतम् ज्ञानम् तेन मुह्यन्ति जन्तवः

ईश्वर, न किसी के पाप को लेता है और न पुण्य को ही । अज्ञान से ज्ञान घिरा रहता है । इससे लोग भ्रम में आ जाते हैं ।

५.१६ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥

ज्ञानेन तु तद् अज्ञानं
येषां नाशितम् आत्मनः
तेषाम् आदित्यवज् ज्ञानम्
प्रकाशयति तत् परम्

ज्ञानेन तु तत् अज्ञानम् येषाम् नाशितम् आत्मनः
तेषाम् आदित्यवत् ज्ञानम् प्रकाशयति तत् परम्

वास्तव में, जिनका वह अज्ञान आत्मज्ञान से नष्ट हो गया है, उनका ज्ञान सूर्य के समान है, और प्रदर्शित करता है,-उस सर्वोच्च को ।

५.१७ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥

तद्बुद्धयस् तदात्मानस्
तन्निष्ठास् तत्परायणाः
गच्छन्त्य् अपुनरावृत्तिं,
ज्ञाननिर्धूतकल्मषाः

तद्बुद्धयः तदात्मानः तन्निष्ठाः तत्परायणाः
गच्छन्ति अपुनरावृत्तिम् ज्ञाननिर्धूतकल्मषाः

जिनकी बुद्धि उसी में लगी हुई है, जिनकी वही आत्मा है, जो उसी में स्थित हैं, उसी में लीन हैं वे ऐसे स्थान पर पहुँचते हैं जहाँ से फिर लौट कर आना नहीं होता-ज्ञान से उनके सब पाप, धुल चुके हैं ।

Agamnigam Digital Preservation Foundation, Chandigarh

५.१८ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

विद्याविनयसंपन्ने
ब्राह्मणे गवि हस्तिनि - -
शुनि चै (ए)व श्वपाके च - -
पण्डिताः सम्दर्शिनः

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि
शुनि च एव श्वपाके च पण्डिताः समदर्शिनः

विद्या और नम्रता से परिपूर्ण ब्राह्मण में, गाय, हाथी और श्वान में, और चांडाल में भी, ज्ञानी लोग एक समान दृष्टि रखते हैं ।

५.१९ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥

इहै (ए)व तैर् जितः सर्गो
येषां साम्ये स्थितं मनः
निर्दोषं हि समं ब्रह्म - -
तस्माद् ब्रह्मणि ते स्थिताः

इह एव तैः जितः सर्गः येषाम् साम्ये स्थितम् मनः
निर्दोषम् हि समम् ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः

इस पृथ्वी पर ही वे सम्पूर्ण सृष्टि-क्रम को वश में कर लेते हैं, जिनका मन समता में स्थित है । ब्रह्म, वास्तव में, निर्दोष और सम है; अतः, वे ब्रह्म में स्थित हैं ।

५.२० न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥

न प्रहृष्येत् प्रियं प्राप्य – –
नो (उ)द्विजेत् प्राप्य चा (अ)प्रियम्
स्थिरबुद्धिर असंमूढो
ब्रह्मविद् ब्रह्मणि स्थितः

न प्रहृष्येत् प्रियम् प्राप्य न उद्विजेत् प्राप्य च अप्रियम्
स्थिरबुद्धिः असंमूढः ब्रह्मवित् ब्रह्मणि स्थितः

जो न हर्षित होता है, प्रिय को पाकर और न उद्विग्न होता है, अप्रिय को पाकर, जिसकी बुद्धि स्थिर है, जो मोहरहित है, वह ब्रह्म को जानता है, ब्रहम में स्थित है ।

५.२१ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥

बाह्यस्पर्शेष्व् असक्तात्मा
विन्दत्य् आत्मनि यत् सुखम्
स ब्रह्मयोगयुक्तात्मा
सुखम् अक्षयम् अश्नुते

बाह्यस्पर्शेषु असक्तात्मा विन्दति आत्मनि यत् सुखम्
सः ब्रह्मयोगयुक्तात्मा सुखम् अक्षयम् अश्नुते

जो स्वयं बाह्य पदार्थों के सम्पर्क में आसक्त नहीं, (ऐसा पुरुष) अपने में ही जिस सुख का अनुभव करता है, वही अक्षय सुख है, जिसे वह, योग द्वारा ब्रह्म में लीन हुआ, भोगता है ।

**५.२२ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥**

ये हि संस्पर्शजा भोगा
दुःखयोनय एव ते
आद्यन्तवन्तः कौन्तेय - -
न तेषु रमते बुधः

ये हि संस्पर्शजाः भोगाः दुःखयोनयः एव ते
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः

वास्तव में, सम्पर्क से उत्पन्न जो सुख-आनन्द हैं, वे एक मात्र दुःख के स्रोत हैं। उनका आदि है, अन्त है, कौन्तेय। उनमें बुद्धिमान् मनुष्य अनुरक्त नहीं होता।

**५.२३ शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥**

शक्नोती (इ)है (ए)व यः सोढुं
प्राक् शरीरविमोक्षणात्
कामक् क्रोधोद्भवं वेगं
स युक्तः स सुखी नरः

शक्नोति इह एव यः सोढुम् प्राक् शरीरविमोक्षणात्
कामक्रोधोद्भवम् वेगम् सः युक्तः सः सुखी नरः

इस लोक में भी शरीर छोड़ने से पहले, जो काम और क्रोध से उत्पन्न वेग को सहन करने में समर्थ है, वही योगी है, वही सुखी मनुष्य है।

२४ योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥

यो (अ)न्तः सुखो (अ)न्तरारामस्
तथा (अ)न्तर् ज्योतिर् एव यः
स योगी ब्रह्मनिर्वाणं
ब्रह्मभूतो (अ)धिगच्छति - -

यः अन्तःसुखः अन्तरारामः तथा अन्तर्ज्योतिः एव यः
सः योगी ब्रह्मनिर्वाणम् ब्रह्मभूतः अधिगच्छति

जो अपने में सुखी है, अपने में आनन्दमय है, जिसके अन्तरतम में प्रकाश ही (प्रकाश) है, वह योगी, ब्रह्मरूप होकर, पा जाता है-ब्रह्म को, निर्वाण को ।

२५ लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥

लभन्ते ब्रह्मनिर्वाणम्
ऋषयः क्षीणकल्मषाः
छिन्नद् द्वैधा यतात्मानः ,
सर्वभूतहिते रताः

लभन्ते ब्रह्मनिर्वाणम् ऋषयः क्षीणकल्मषाः
छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः

ब्रह्मनिर्वाण को प्राप्त करते हैं, (ऐसे) ऋषिगण जिनके पाप नष्ट हो गए हैं, दुविधाएं मिट गई हैं, जिन्होंने अपने को वश में कर लिया है और जो सर्व प्राणियों के कल्याण में संलग्न हैं ।

५.२६ कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥

कामक् क्रोधवियुक्तानां
यतीनां यतचेतसाम्
अभितो, ब्रह्मनिर्वाणं
वर्तते, विदितात्मनाम्

कामक्रोधवियुक्तानाम् यतीनाम् यतचेतसाम्
अभितः ब्रह्मनिर्वाणम् वर्तते विदितात्मनाम्

काम और क्रोध से जो अलग हो गए हैं, जिन यतियों का चित्त वश में है, ब्रह्म-निर्वाण उनके आसपास ही रहता है- जिन्होंने अपने को जान लिया है ।

५.२७ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥

स्पर्शान् कृत्वा बहिर् बाह्यान्श्
चक्षुश् चै (ए)वा (अ)न्तरे भ्रुवोः
प्राणापानौ समौ कृत्वा
नासाभ्यन्तरचारिणौ

स्पर्शान् कृत्वा बहिः बाह्यान् चक्षुः च एव अन्तरे भ्रुवोः
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ

बाहरी सम्पर्कों को बहिष्कृत करके, दृष्टि को दोनों भ्रकुटियों के मध्य में ही स्थित रखके, और नासाछिद्रों में आते जाते अपान और प्राण वायु (की गति) को एक समान करके -

**५.२८ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥**

यतेन्द्रियमनोबुद्धिर्
मुनिर् मोक्षपरायणः
विगतेच्छाभयक् क्रोधो
यः, सदा मुक्त एव सः

यतेन्द्रियमनोबुद्धिः मुनिः मोक्षपरायणः
विगतेच्छाभयक्रोधः यः सदा मुक्तः एव सः

जिसकी इन्द्रियां, मन और बुद्धि वश में हैं, जिस मुनि का लक्ष्य मोक्षय है, इच्छा, भय और क्रोध जिसके दूर हो गए हैं, वह सदा मुक्त ही है; (और)

**५.२९ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥**

भोक्तारं यज्ञतपसां
सर्वलोक महेश्वरम्
सुहृदं सर्वभूतानां,
ज्ञात्वा मां शान्तिम् ऋच्छति --

भोक्तारम् यज्ञतपसाम् सर्वलोकमहेश्वरम्
सुहृदम् सर्वभूतानाम् ज्ञात्वा माम् शान्तिम् ऋच्छति

मुझको यज्ञों और तपों का भोक्ता, सब लोकों का महान् ईश्वर, और सब प्राणियों का हितैषी जानकर, वह शान्ति पाता है ।

श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम पञ्चमोऽध्यायः समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय-६

अध्याय ६ में भगवान् फिर कहते हैं कर्म फल पर निर्भर न होकर जो कर्तव्य कर्म करता है वही संन्यासी है, वही योगी है। योगाभ्यास और मन को वश में करने की विधि बतलाते हैं। मन चंचल है, वश में लाना कठिन है, पर अभ्यास और वैराग्य से उसे वश में किया जा सकता है।

योग एक संयम है। सम्पूर्ण कामनाओं का पूर्णतः त्याग कर के, इन्द्रियों को सब ओर से नियन्त्रित करके, धैर्य युक्त बुद्धि से मन को अपने में स्थिर करके, और कुछ भी चिन्तन नहीं करना चाहिए। 'ऐसे ध्यान से जो योगी मुझ को भजता है वह कहीं भी रहते हुए मुझमें रहता है।'

यह "ध्यान योग" है जो अध्याय ६ का नाम है।

श्रीमद्भगवद्गीता

अथ षष्ठोऽध्यायः

(श्री कृष्णार्जुनसंवादे ध्यानयोगः)

६.१ **श्रीभगवानुवाच–**
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥

अनाश्रितः कर्मफलं
कार्यं कर्म करोति यः
स संन्यासी च योगी च,– –
न निरग्निर् न च (अ)क्रियः

अनाश्रितः कर्मफलम् कार्यम् कर्म करोति यः
सः संन्यासी च योगी च न निरग्निः न च अक्रियः

श्री भगवान् उवाच –
कर्म फल पर निर्भर न होकर, जो कर्तव्य कर्म करता है, वही संन्यासी है और योगी है । वह नहीं जो अग्नि का उपयोग नहीं करता और न (कोई) कर्म ।

६.२ यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥

यं संन्यासम् इति प्राहुर्
योगं तं विद्धि, पाण्डव – –
न ह्य् असंन्यस्तसंकल्पो
योगी भवति कश्चन – –

यम् संन्यासम् इति प्राहुः योगम् तम् विद्धि पाण्ड
न हि असंन्यस्तसंकल्पः योगी भवति कश्चन

इस प्रकार जिसे संन्यास कहते हैं, तू उसे योग समझ पाण्डव । वास्तव में, फलाशाओं का त्याग किए बिना कोई योगी नहीं होता ।

६.३ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥

आरुरुक्षोर् मुनेर् योगं
कर्म कारणम् उच्यते
योगारूढस्य तस्यै (ए)व – –
शमः कारणम् उच्यते

आरुरुक्षोः मुनेः योगम् कर्म कारणम् उच्यते
योगारूढस्य तस्य एव शमः कारणम् उच्यते

योग में स्थित होने की इच्छा वाले मुनि के लिए कहा जाता है–कर्म साधन है । जो योग में स्थित है, उसके लिए, कहते हैं, एकमात्र साधन है, शम– (अन्तःकरण और इन्द्रियों का निग्रह) ।

६.४ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥

यदा हि ने (इ)न्द्रियार्थेषु - -
न कर्मस्व् अनुषज्जते
सर्वसंकल्पसंन्यासी
योगारूढस् तदो (उ)च्यते

यदा हि न इन्द्रियार्थेषु न कर्मसु अनुषज्जते
सर्वसंकल्पसंन्यासी योगारूढः तदा उच्यते

वास्तव में, जब मनुष्य न इन्द्रियों के विषयों में आसक्त होता है, न कर्मों में, तब वह, सब संकल्पों को त्यागने वाला, योगारूढ कहलाता है ।

६.५ उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥

उद्धरेद् आत्मना (आ)त्मानं,
ना (आ)त्मानम् अवसादयेत्
आत्मै (ए)व ह्य् आत्मनो बन्धुर्
आत्मै (ए)व रिपुर् आत्मनः

उद्धरेत् आत्मना आत्मानम् न आत्मानम् अवसादयेत्
आत्मा एव हि आत्मनः बन्धुः आत्मा एव रिपुः आत्मनः

(मनुष्य को) स्वयं अपने को अपने (बल) से ऊपर उठाना चाहिए । अपने को नीचे, गिराना नहीं चाहिए । वास्तव में, (मनुष्य) स्वयं ही अपना एकमात्र मित्र है, स्वयं ही अपना शत्रु भी ।

६.६ **बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।**
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥

बन्धुर् आत्मा (आ)त्मनस् तस्य - -
येना (आ)त्मै (ए)वा (आ)त्मना जितः
अनात्मनस् तु शत्रुत्वे
वर्तेता (आ)त्मै (ए)व शत्रुवत्

बन्धुः आत्मा आत्मनः तस्य येन आत्मा एव आत्मना जितः
अनात्मनः तु शत्रुत्वे वर्तेत आत्मा एव शत्रुवत्

वह स्वयं अपना मित्र है, जिसने केवल अपने से अपने को जीत लिया है । जिसने अपने आप पर विजय नहीं पाई, वह वास्तव में, अपने साथ वैर विरोध करने में, एकमात्र शत्रु जैसा व्यवहार करता है ।

६.७ **जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।**
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥

जितात्मनः प्रशान्तस्य - -
परमात्मा समाहितः
शीतोष्णसुखदुःखेषु - -
तथा मानापमानयोः

जितात्मनः प्रशान्तस्य परमात्मा समाहितः
शीतोष्णसुखदुःखेषु तथा मानापमानयोः

जिसने अपने को जीत लिया है और शान्तिपूर्ण है, उसका "परमात्मा" एक समान रहता है,- सर्दी गर्मी में और सुख दुःख में; और, वैसे ही मान अपमान में ।[१]

१. (यहाँ "परमात्मा" शब्द आत्मा के लिए प्रयुक्त हुआ है अर्थात् वह स्वयं एक समान रहता है ।)

६.८ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥

ज्ञानविज्ञानतृप्तात्मा,
कूटस्थो विजितेन्द्रियः
युक्त इत्य् उच्यते योगी,
समलोष्टाश्मकाञ्चनः

ज्ञानविज्ञानतृप्तात्मा कूटस्थः विजितेन्द्रियः
युक्तः इति उच्यते योगी समलोष्टाश्मकाञ्चनः

जो अपने में ज्ञान और विज्ञान से तृप्त है, जो दृढ स्थित है, जिसने इन्द्रियों को जीत लिया है, ऐसा योगी (ईश्वर) "युक्त" कहलाता है । उसके लिए मिट्टी, पत्थर और स्वर्ण एक समान हैं ।

६.९ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥

सुहृन्मित्रार् युदासीन-
मध्यस्थद् द्वेष्यबन्धुषु - -
साधुष्व् अपि च पापेषु, - -
समबुद्धिर् विशिष्यते

सुहृन्मित्रायुदासीनमध्यस्थद्वेष्यबन्धुषु
साधुषु अपि च पापेषु समबुद्धिः विशिष्यते

जो प्रिय जनों में, मित्रों में, शत्रुओं में, तटस्थ जनों में, मध्यस्थों में, द्वेष करने योग्य लोगों और बन्धुओं में, साधु और पापियों में भी, समबुद्धिहै, वह श्रेष्ठ है ।

६.१० योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥

योगी युञ्जीत सततम्
आत्मानं रहसि स्थितः
एकाकी यतचित्तात्मा
निराशीर् अपरिग्रहः

योगी युञ्जीत सततम् आत्मानम् रहसि स्थितः
एकाकी यतचित्तात्मा निराशीः अपरिग्रहः

योगी निरन्तर अपने को योगाभ्यास में लगाए,[२] गुप्त स्थान में अकेले बैठकर, अपने आप को और मनको नियन्त्रित करके, आशारहित होकर और अनावश्यक धन-सामग्री का संग्रह त्यागकर–

६.११ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥

शुचौ देशे प्रतिष्ठाप्य – –
स्थिरम् आसनम् आत्मनः
न (अ)त्युच्छ्रितं ना (अ)तिनीचं
चैलाजिन कुशोत्तरम्

शुचौ देशे प्रतिष्ठाप्य स्थिरम् आसनम् आत्मनः
न अत्युच्छ्रितम् न अतिनीचम् चैलाजिनकुशोत्तरम्

पवित्र स्थान में अपना स्थिर आसन जमा कर, जो न बहुत ऊंचा हो न बहुत नीचा– क्रमशः कुश, चर्म और वस्त्र रखा हो,

२.अपने को परमात्मा में जोड़ना "योग" है।

६.१२ तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥

तत्रै (ए)काग्रं मनः कृत्वा,
यतचित्तेन्द्रियक्क्रियः
उपविश्या (आ)सने युञ्ज्याद्
योगम् आत्मविशुद्धये

तत्र एकाग्रम् मनः कृत्वा यतचित्तेन्द्रियक्रियः
उपविश्य आसने युञ्ज्यात् योगम् आत्मविशुद्धये

वहां, मन को एकाग्र करके, चित्त और इन्द्रियों की क्रियाओं को वश में रख कर, आसन पर बैठकर, योग का अभ्यास करे- अन्तःकरण की शुद्धि के लिए।

६.१३ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

समं कायशिरोग्रीवं
धारयन् अचलं स्थिरः
संप्रेक्ष्य नासिकाग्रं स्वं,
दिशश् चा (अ)नवलोकयन्

समम् कायशिरोग्रीवम् धारयन् अचलम् स्थिरः
संप्रेक्ष्य नासिकाग्रम् स्वम् दिशः च अनवलोकयन्

धड़, ग्रीवा और सिर एक सीध में करके; अचल, स्थिर हुआ, अपनी नाक की नोक पर दृष्टि रख कर, इधर उधर न देखते हुए-

६.१४ प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥

प्रशान्तात्मा विगतभीर्
ब्रह्मचारिव्रते स्थितः
मनः संयम्य मच्चित्तो
युक्त आसीत मत्परः

प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः
मनः संयम्य मच्चित्तः युक्तः आसीत मत्परः

जो अपने में शान्त है, जिसके भय दूर हो गए हैं, जो ब्रह्मचारियों के व्रत में दृढ है, जिसका मन वश में है, चित्त मुझमें लीन है, वह बैठे, मुझे सर्वोच्च मानते हुए ।

६.१५ युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥

युञ्जन्न् एवं सदा (आ)त्मानं
योगी नियतमान्सः
शान्तिम् निर्वाणपरमां
मत्संस्थाम् अधिगच्छति - -

युञ्जन् एवम् सदा आत्मानम् योगी नियतमानसः
शान्तिम् निर्वाणपरमाम् मत्संस्थाम् अधिगच्छति

इस प्रकार सदा अपने को योगाभ्यास में लगाए, मन को वश में किए, योगी पा जाता है, शान्ति को, परम निर्वाण को, जो मुझमें स्थित हैं ।

६.१६ नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥

ना (अ)त्यश् नतस् तु योगो (अ)स्ति, - -
न चै (ए)कान्तम् अनश्नतः
न चा (अ)तिस् स्वप्नशीलस्य, - -
जाग्रतो नै (ए)व चा (अ)र्जुन - -

न अति अश्नतः तु योगः अस्ति न च एकान्तम् अनश्नतः
न च अति स्वप्नशीलस्य जाग्रतः न एव च अर्जुन

वास्तव में, योग उसके लिए नहीं है जो अधिक खाता है, और न उसके लिए जो एकदम नहीं खाता, और न उसके लिए जो अधिक निद्रालु है, और न उसके लिए जो जागरण ही करता है, अर्जुन !

६.१७ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

युक्ताहार विहारस्य, - -
युक्तचेष्टस्य कर्मसु - -
युक्तस् स्वप्नावबोधस्य,--
योगो भवति दुःखहा

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु
युक्तस्वप्नावबोधस्य योगः भवति दुःखहा

जिसका खाना पीना और मनोरंजन संतुलित है, कर्म करने में जिसका आचरण नियंत्रित है, जिसका सोना, जागना नियमित है, उसकेलिए योग, दुःखनाशक होता है।

६.१८ यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥

यदा विनियतं चित्तम्
आत्मन्य् एवा (अ)वतिष्ठते
निःस्पृहः सर्वकामेभ्यो,
युक्त इत्य् उच्यते तदा

यदा विनियतम् चित्तम् आत्मनि एव अवतिष्ठते
निःस्पृहः सर्वकामेभ्यः युक्तः इति उच्यते तदा

जब भली प्रकार से वश में किया हुआ मन, एकमात्र अपने में स्थिर हो जाता है, सब काम्य वस्तुओं की इच्छाओं को त्यागकर,- तब ऐसा कहते हैं कि "वह (योग) युक्त है" ।

६.१९ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥

यथा दीपो निवातस्थो
ने (इ)ङ्गते सो (उ)पमा स्मृता
योगिनो यतचित्तस्य - -
युञ्जतो योगम् आत्मनः

यथा, दीपः निवातस्थः न इङ्गते सा उपमा स्मृता
योगिनः यतचित्तस्य युञ्जतः योगम् आत्मनः

"जैसे दीपक वायुरहित स्थान में झिलमिलाता नहीं" इस उपमा का स्मरण हो आता है, (उस) योगी के लिए, जिसका नियन्त्रित चित्त, योग के अभ्यास में अपने को लीन किए हुए है ।

६.२० यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

यत्रो (उ)परमते चित्तं
निरुद्धं योगसेवया
यत्र चै (ए)वा (आ)त्मना (आ)त्मानं
पश्यन् आत्मनि तुष्यति - -

यत्र उपरमते चित्तम् निरुद्धम् योगसेवया
यत्र च एव आत्मना आत्मानम् पश्यन् आत्मनि तुष्यति

जहां योग के अभ्यास से वश में हुआ मन शान्त है और जहां अपने से, अपने को, अपने में देखते हुए वह संतुष्ट है; (और-)

६.२१ सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥

सुखम् आत्यन्तिकं यत् तद्
बुद्धिग्राह्यम् अतीन्द्रियम्
वेत्ति, यत्र न चै (ए)वा (अ)यं
स्थितश् चलति तत्त्वतः

सुखम् आत्यन्तिकम् यत् तत् बुद्धिग्राहयम् अतीन्द्रियम्
वेत्ति यत्र न च एव अयम् स्थितः चलति तत्त्वतः

जो इस (संन्तुष्टि) में अनुभव करता है उस परम सुख को जो बुद्धि गम्य है, इन्द्रियों से परे है; और, एक मात्र जहां स्थित हुआ, वह परम तत्त्व से विचलित नहीं होता;-

६.२२ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥

यं लब्ध्वा चा (अ)परं लाभं
मन्यते ना (अ)धिकं ततः
यस्मिन् स्थितो न दुःखेन - -
गुरुणा (अ)पि विचाल्यते

यम् लब्ध्वा च अपरम् लाभम् मन्यते न अधिकम् ततः
यस्मिन् स्थितः न दुःखेन गुरुणा अपि विचाल्यते

और, जिसे पाकर, किसी और लाभ को उससे अधिक नहीं मानता; उसमें स्थित हुआ वह भारी दुःख से भी डगमगाता नहीं; (और, ऐसी स्थिति-)

६.२३ तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥

तं विद्याद् दुःखसंयोग -
वियोगं योगसंज्ञितम्
स निश्चयेन योक्तव्यो
योगो (अ)निर्विण्णचेतसा

तम् विद्यात् दुःखसंयोगवियोगम् योगसंज्ञितम्
सः निश्चयेन योक्तव्यः योगः अनिर्विण्णचेतसा

जो दुःख के स्पर्श से रहित है, उस को योग नाम से जानना चाहिए । इस योग का अभ्यास करना चाहिए, निश्चय पूर्वक, निराश न हुए मन से ।

६.२४ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥

संकल्पप्रभवान् कामांस्
त्यक्त्वा सर्वान् अशेषतः
मनसै (ए)वे (इ)न्द्रियग्रामं
विनियम्य समन्ततः

संकल्पप्रभवान् कामान् त्यक्त्वा सर्वान् अशेषतः
मनसा एव इन्द्रियग्रामम् विनियम्य समन्ततः

कल्पना से उत्पन्न संपूर्ण कामनाओं का पूर्णतः त्याग करके, मन द्वारा समस्त इन्द्रियों को भी सब ओर से भली प्रकार नियन्त्रित करके–

६.२५ शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥

शनैः शनैर् उपरमेद् ,
बुद्ध्या धृतिगृहीतया
आत्मसंस्थं मनः कृत्वा,
न किंचित् अपि चिन्तयेत्

शनैः शनैः उपरमेत् बुद्ध्या धृतिगृहीतया
आत्मसंस्थम् मनः कृत्वा न किंचित् अपि चिन्तयेत्

धीरे धीरे, उसे शान्ति प्राप्त करनी चाहिए, धैर्य युक्त बुद्धि से; मन को अपने में स्थिर करके, उसे और कुछ भी चिन्तन नहीं करना चाहिए ।

६.२६ यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥

यतो यतो निश्चरति - -
मनश् चञ्चलम् अस्थिरम्
ततस्ततो नियम्यै (ए)तद्
आत्मन्य् एव वशं नयेत्

यतः यतः निश्चरति मनः चञ्चलम् अस्थिरम्
ततः ततः नियम्य एतत् आत्मनि एव वशम् नयेत्

जहां जहां चंचल, अस्थिर मन भागता है, वहां वहां से उसे नियंत्रण में करके, एक मात्र अपने वश में लाना चाहिए ।

६.२७ प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥

प्रशान्तमनसं ह्य् एनं
योगिनं सुखम् उत्तमम्
उपैति, शान्तरजसं,
ब्रह्मभूतम् अकल्मषम्

प्रशान्तमनसम् हि एनम् योगिनम् सुखम् उत्तमम्
उपैति शान्तरजसम् ब्रह्मभूतम् अकल्मषम्

जिसका मन शान्त है, निश्चय ही, ऐसे योगी को उत्तम सुख प्राप्त होता है; उसके रजोगुण शान्त हो जाते हैं, वह ब्रह्म मय हो जाता है- निष्पाप ।

६.२८ युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥

युञ्जन्न् एवं सदा (आ)त्मानं
योगी विगतकल्मषः
सुखेन ब्रह्मसंस्पर्शम्
अत्यन्तं सुखम् अश्नुते

युञ्जन् एवम् सदा आत्मानम् योगी विगतकल्मषः
सुखेन ब्रह्मसंस्पर्शम् अत्यन्तम् सुखम् अश्नुते

इस प्रकार सदा अपने को योगाभ्यास में लगाते हुए, योगी, जिसके पाप मिट गए हैं, ब्रह्म स्पर्श के परम सुख को, सरलता से प्राप्त करता है ।

६.२९ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

सर्वभूतस्थम् आत्मानं,
सर्वभूतानि चा (आ)त्मनि - -
ईक्षते योगयुक्तात्मा,
सर्वत्र समदर्शनः

सर्वभूतस्थम् आत्मानम् सर्वभूतानि च आत्मनि
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः

जो अपने को सब चराचर में और सब चराचर को अपने में देखता है, वह योग में लीन हुआ सर्वत्र समदर्शी है ।

६.३० यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

यो मां पश्यति सर्वत्र, - -
सर्वं च मयि पश्यति - -
तस्या (अ)हं नप् प्रणश्यामि, - -
स च मे नप् प्रणश्यति - -

यः माम् पश्यति सर्वत्र सर्वम् च मयि पश्यति
तस्य अहम् न प्रणश्यामि सः च मे न प्रणश्यति

जो हर कहीं मुझ को देखता है और सब को मुझमें देखता है, मैं उसके लिए लुप्त नहीं होता और न वह मेरे लिए लुप्त होता है।

६.३१ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

सर्वभूतस्थितं यो मां
भजत्, एकत्वम् आस्थितः
सर्वथा वर्तमानो (अ)पि, - -
स योगी मयि वर्तते

सर्वभूतस्थितम् यः माम् भजति एकत्वम् आस्थितः
सर्वथा वर्तमानः अपि सः योगी मयि वर्तते

सारी सृष्टि में स्थित मुझको, जो भजता है एकत्व में लीन हुआ, वह योगी कहीं भी रहते हुए, मुझमें रहता है।

६.३२ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

आत्मौपम्येन सर्वत्र – –
समं पश्यति यो (अ)र्जुन –
सुखं वा यदि वा दुःखं,
स योगी परमो मतः

आत्मौपम्येन सर्वत्र समम् पश्यति यः अर्जुन
सुखम् वा यदि वा दुःखम् सः योगी परमः मतः

जो अपने ही जैसा, सब कहीं (सबको) एक समान देखता है, अर्जुन । चाहे सुख हो या दुःख, वह योगी श्रेष्ठ माना जाता है[१] ।

६.३३ अर्जुन उवाच–
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥

यो (अ)यं योगस् त्वया प्रोक्तः
साम्येन, मधुसूदन – –
एतस्या (अ)हं न पश्यामि – –
चञ्चलत्वात् स्थितिं स्थिराम्

यः अयम् योगः त्वया प्रोक्तः साम्येन मधुसूदन
एतस्य अहम् न पश्यामि चञ्चलत्वात् स्थितिम् स्थिराम्

अर्जुन उवाच –
जो यह समता से प्राप्त होने वाला योग आपने कहा है, मधुसूदन । मैं, चंचलता के कारण, इसकी स्थिति, दृढ नहीं देखता ।

१. २९ से ३२ तक के चार श्लोकों में समदर्शन की अनुभूति का कितना सुन्दर वर्णन है ।

६.३४ चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

चञ्चलं हि मनः, कृष्ण, - -
प्रमाथि बलवद् दृढम्
तस्या (अ)हं निग्रहं मन्ये
वायोर् इव सुदुष्करम्

चञ्चलम् हि मनः कृष्ण प्रमाथि बलवत् दृढम्
तस्य अहम् निग्रहम् मन्ये वायोः इव सुदुष्करम्

हे कृष्ण । मन वास्तव में, चंचल है :- प्रचण्ड, बलवान् और हठी । मैं सोचता हूँ उसे वश में करना बहुत कठिन है, जैसे वायु को ।

६.३५ श्रीभगवानुवाच-
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

असंशयं, महाबाहो,
मनो दुर्निग्रहं चलम्
अभ्यासेन तु कौन्तेय - -
वैराग्येण च गृह्यते

असंशयं महाबाहो मनः दुर्निग्रहम् चलम्
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते

श्री भगवान् उवाच -
निस्संदेह महाबाहो । चंचल मन को वश में लाना कठिन है, पर कौन्तेय । अभ्यास और वैराग्य से इसे वश में किया जा सकता है ।

६.३६ असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

असंयतात्मना योगो
दुष्प्राप इति मे मतिः
वश्यात्मना तु यतता
शक्यो (अ)वाप्तुम् उपायतः

असंयतात्मना योगः दुष्प्रापः इति मे मतिः
वश्यात्मना तु यतता शक्यः अवाप्तुम् उपायतः

मेरा ऐसा विचार है, जिसका अपने पर नियन्त्रण नहीं, उसके लिए योग प्राप्त करना कठिन है । परन्तु, जिसने अपने को वश में किया है, उसके लिए प्राप्त करना, सम्भव है, प्रयत्न करते हुए, उपाय (साधन) से ।

६.३७ अर्जुन उवाच-
अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥

अयतिः श्रद्धयो (उ)पेतो
योगाच् चलितमानसः
अप्राप्य योगसंसिद्धिं
कां गतिं कृष्ण गच्छति - -

अयतिः श्रद्धया उपेतः योगात् चलितमानसः
अप्राप्य योगसंसिद्धिम् काम् गतिम् कृष्ण गच्छति

अर्जुन उवाच -
जिसका अपने पर नियन्त्रण नहीं, पर, जो श्रद्धा से सम्पन्न है,(किन्तु) मन जिसका योग से भटक गया है, वह योग द्वारा प्राप्य पूर्ण सिद्धि को न पाते हुए, हे कृष्ण । किस अवस्था को पहुंचता है ?

६.३८ **कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।**
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥

कच्चिन् नो (उ)भयविभ्रष्टश्
छिन्नाभ्रम् इव नश्यति - -
अप्रतिष्ठो, महाबाहो,
विमूढो ब्रह्मणः पथि - -

कच्चित् न उभयविभ्रष्टः छिन्नाभ्रम् इव नश्यति
अप्रतिष्ठः महाबाहो विमूढः ब्रह्मणः पथि

कहीं यह दोनों ओर से भ्रष्ट मनुष्य, छिन्न-भिन्न बादल जैसा, नष्ट तो नहीं हो जाता ? महाबाहो ! डावांडोल हुआ, ब्रह्म की राह में भ्रमित ?

६.३९ **एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।**
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥

एतन् मे संशयं, कृष्ण, - -
छेत्तुम् अर्हस्य् अशेषतः
त्वदन्यः संशयस्या (अ)स्य - -
छेत्ता न ह्य् उपपद्यते

एतत् मे संशयम् कृष्ण छेत्तुम् अर्हसि अशेषतः
त्वदन्यः संशयस्य अस्य छेत्ता न हि उपपद्यते

हे कृष्ण ! यह मेरा संशय, पूर्ण रूपसे दूर करने के योग्य, आप हैं । आपके अतिरिक्त इस सन्देह को मिटाने वाला, वास्तव में, कोई दूसरा मिल नहीं सकता ।

६.४० श्रीभगवानुवाच-
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ॥

पार्थ, नै (ए)वे (इ)ह ना (अ)मुत्र - -
विनाशस् तस्य विद्यते -
न हि कल्याणकृत् कश्चिद्
दुर्गतिं, तात, गच्छति - -

पार्थ न एव इह न अमुत्र विनाशः तस्य विद्यते
न हि कल्याणकृत् कश्चित् दुर्गतिम् तात गच्छति

श्री भगवान् उवाच -
हे पार्थ । न इस लोक में और न परलोक में उसका[४] विनाश होता है । वास्तव में, कोई भी कल्याण (सम्पादन) करने वाला (मनुष्य), दुर्गति को प्राप्त नहीं होता, हे प्रिय मित्र ।

६.४१ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥

प्राप्य पुण्यकृतां लोकान्,
उषित्वा शाश्वतीः समाः
शुचीनां श्रीमतां गेहे
योगभ्रष्टो (अ)भिजायते

प्राप्य पुण्यकृताम् लोकान् उषित्वा शाश्वतीः समाः
शुचीनाम् श्रीमताम् गेहे योगभ्रष्टः अभिजायते

पुण्यकर्ता मनुष्योंके (मिलने वाले) लोकों को प्राप्त करके, वहां अनेक वर्षों तक रह कर, वह पवित्र श्रीसम्पन्न लोगों के घर में जन्म लेता है,-योग से भटका हुआ पुरुष ।

४. ऐसे मनुष्य का जो श्रद्धा से सम्पन्न है पर योग से भटक गया है। (देखिए ६.३७)

६.४२ अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥

अथवा योगिनाम् एव - -
कुले भवति धीमताम्
एतद् धि दुर्लभतरं
लोके जन्म यद् ईदृशम्

अथवा योगिनाम् एव कुले भवति धीमताम्
एतत् हि दुर्लभतरम् लोके जन्म यत् ईदृशम्

अथवा, बुद्धिमान योगियों के कुल में भी उसका जन्म हो सकता है। परन्तु, जो ऐसा जन्म है, इस संसार में और भी दुर्लभ है।

६.४३ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥

तत्र तं बुद्धिसंयोगं
लभते पौर्वदेहिकम्
यतते च ततो भूयः
संसिद्धौ, कुरुनन्दन - -

तत्र तम् बुद्धिसंयोगम् लभते पौर्वदेहिकम्
यतते च ततः भूयः संसिद्धौ कुरुनन्दन

वहां उसे पूर्व-देह से सम्बन्धित (योग-युक्त) बुद्धि का संयोग मिल जाता है, और, तब वह फिर से परम सिद्धि के लिए प्रयत्न करता है, कुरुनन्दन।

६.४४ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥

पूर्वाभ्यासेन तेनै (ए)व - -
ह्रियते ह्य् अवशो (अ)पि सः
जिज्ञासुर् अपि योगस्य - -
शब्दब्रह्मा (अ)तिवर्तते

पूर्वाभ्यासेन तेन एव ह्रियते हि अवशः अपि सः
जिज्ञासुः अपि योगस्य शब्दब्रह्म अतिवर्तते

पहले के उस अभ्यास के कारण, वह बरबस आगे ही खिंचा चला जाता है । योग का जिज्ञासु, वेद से भी परे पहुँच जाता है ।

६.४५ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

प्रयत्नाद् यतमानस् तु - -
योगी संशुद्धकिल्बिषः
अनेकजन्मसंसिद्धस्
ततो याति परां गतिम्

प्रयत्नात् यतमानः तु योगी संशुद्धकिल्बिषः
अनेकजन्मसंसिद्धः ततः याति पराम् गतिम्

दृढता से प्रयास करते हुए, वास्तव में, योगी, जिसके पाप पूर्णतः धुल गए हैं, अनेक जन्मों में, पूर्णसिद्ध होता है, तब (कहीं) परम गति को पाता है ।

६.४६ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥

तपस्विभ्यो (अ)धिको योगी,
ज्ञानिभ्यो (अ)पि मतो (अ)धिकः
कर्मिभ्यश् चा (अ)धिको योगी,
तस्माद् योगी भवा (अ)र्जुन - -

तपस्विभ्यः अधिकः योगी ज्ञानिभ्यः अपि मतः अधिकः
कर्मिभ्यः च अधिकः योगी तस्मात् योगी भव अर्जुन

तपस्वियों की अपेक्षा योगी बढ़कर है, ज्ञानियों की अपेक्षा भी वह अधिक श्रेष्ठ माना जाता है, और कर्मठ व्यक्तियों से भी योगी बड़ा है । अतः तू योगी बन, अर्जुन ।

६.४७ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥

योगिनाम् अपि सर्वेषां,
मद्गतेना (अ)न्तरात्मना
श्रद्धावान् भजते यो मां,
स मे युक्ततमो मतः

योगिनाम् अपि सर्वेषाम् मद्गतेन अन्तरात्मना
श्रद्धावान् भजते यः माम् सः मे युक्ततमः मतः

सम्पूर्ण योगियों में भी, जो अन्तरतम से मुझ में लीन है, श्रद्धावान् है, मेरा भजन करता है, वह (योगी) सर्वोत्तम है, मेरे विचार में ।

श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः समाप्तः

गीता प्रकाश

परिचय-७

अध्याय ६ में ध्यान योग द्वारा मन को वश में करने की विधि बतलाई गई है। अध्याय ७ में योगाभ्यास करते हुए मनुष्य किस प्रकार "मुझ को पूर्ण रूप से जान लेगा," यह ज्ञान भगवान् बतलाते हैं (श्लोक ७.२)

यह ज्ञान क्या है ? "मुझसे अधिक श्रेष्ठ और कुछ भी नहीं है। सब गुणों और जीवों का शाश्वत मूल कारण मैं हूँ"। अपनी दोनों प्रकार की प्रकृतियों का वर्णन भी विस्तार से करते हैं "सब कुछ मुझ में है, पर मैं किसी में नहीं।" यह मूल ज्ञान है जो भगवान् विज्ञान सहित[१] बतला रहे हैं।

अध्याय ७ का नाम है "ज्ञान विज्ञान योग"।

१. मनुष्य जब अपने में किसी ज्ञान की अनुभूति करके दूसरों को बतलाता है, वह ज्ञान की बात विज्ञान सहित कहता है।

श्रीमद्भगवद् गीता

अथ सप्तमोऽध्यायः

(श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगः)

७.१ **श्रीभगवानुवाच –**
मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥

मय्य् आसक्तमनाः पार्थ – –
योगं युञ्जन् मदाश्रयः
असंशयं समग्रं मां
यथा ज्ञास्यसि तच् छृणु – –

मयि आसक्तमनाः पार्थ योगम् युञ्जन् मदाश्रयः
असंशयम् समग्रम् माम् यथा ज्ञास्यसि तत् शृणु

श्री भगवान् उवाच –
हे पार्थ । मुझ में मन लीन किए, मेरा आश्रय लेकर, योगमें जुटा तू, निस्सन्देह पूर्ण रूप से, मुझे जिस प्रकार जान लेगा, वह सुन ।

७.२ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥

ज्ञानं ते (अ)हं सविज्ञानम्
इदं वक्ष्याम्य् अशेषतः
यज् ज्ञात्वा ने (इ)ह भूयो (अ)न्यज्
ज्ञातव्यम् अवशिष्यते

ज्ञानम् ते अहम् सविज्ञानम् इदम् वक्ष्यामि अशेषतः
यत् ज्ञात्वा न इह भूयः अन्यत् ज्ञातव्यम् अवशिष्यते

तुझे यह ज्ञान,[१] मैं विज्ञान सहित, पूर्ण रूप से बतलाऊंगा, जिसे जानकर, इस लोक में फिर और कुछ जानने योग्य रह नहीं जाता ।

७.३ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

मनुष्याणां सहस्रेषु – –
कश्चिद् यतति सिद्धये
यतताम् अपि सिद्धानां
कश्चिन् मां वेत्ति तत्त्वतः

मनुष्याणाम् सहस्रेषु कश्चित् यतति सिद्धये
यतताम् अपि सिद्धानाम् कश्चित् माम् वेत्ति तत्त्वतः

सहस्रों मनुष्यों में से कोई एक सिद्ध होने का प्रयत्न करता है । प्रयत्न करने वाले सिद्ध पुरुषों में भी, कोई एक मुझको यथार्थ रूप में जानता है ।

१. ज्ञान का अर्थ है शास्त्रीय ज्ञान; वस्तुओं और विषयों का बोध, जानकारी; ऐसे ज्ञान की अनुभूति विज्ञान है। ईश्वर सर्वत्र है यह ज्ञान की बात (धार्मिक ग्रन्थों में लिखी) है। जब मनुष्य स्वयं अपने में इसका अनुभव करके दूसरों को बतलाता है, वह ज्ञान की बात विज्ञान सहित कहता है।

७.४ **भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

भूमिर् आपो (अ)नलो वायुः
खं मनो बुद्धिर् एव च--
अहंकार इती (इ)यं मे
भिन्ना प्रकृतिर् अष्टधा

भूमिः आपः अनलः वायुः खम् मनः बुद्धिः एव च
अहंकारः इति इयम् मे भिन्ना प्रकृतिः अष्टधा

पृथ्वी, जल, अग्नि, वायु, आकाश, मन, बुद्धि, और अहंकार भी- इस प्रकार, मेरी यह (जड़ात्मिका) प्रकृति, आठ प्रकार विभाजित हुई है ।

७.५ **अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।**
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥

अपरे (इ)यम् , इतस् त्व् अन्यां
प्रकृतिं विद्धि मे पराम्
जीवभूतां, महाबाहो,
यये (इ)दं धार्यते जगत्

अपरा इयम् इतः तु अन्याम् प्रकृतिम् विद्धि मे पराम्
जीवभूताम् महाबाहो यया इदम् धार्यते जगत्

(पर) यह है, निम्नश्रेणी की । तू, वास्तव में इससे (भिन्न) मेरी दूसरी (चैतन्यात्मिका) प्रकृति को जान जो श्रेष्ठ है, प्राणियों का जीवन है, महाबाहो । जिसके द्वारा यह संसार थमा हुआ है ।

७.६ **एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।**
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥

एतद्द योनीनि भूतानि - -
सर्वाणी (इ)त्य् उपधारय - -
अहं कृत्स्नस्य जगतः
प्रभवः प्रलयस् तथा

एतद्योनीनि भूतानि सर्वाणि इति उपधारय
अहम् कृत्स्नस्य जगतः प्रभवः प्रलयः तथा

यह उत्पत्ति स्थान है सब प्राणियों का, ऐसा तू समझ । (पर) सम्पूर्ण जगत् का उद्गम-स्थान मैं हूँ । वैसे ही, (उसके लिए) प्रलय भी;

७.७ **मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।**
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

मत्तः परतरं ना (अ)न्यत्
किंचिद् अस्ति, धनंजय - -
मयि सर्वम् इदं प्रोतं,
सूत्रे मणिगणा इव - -

मत्तः परतरम् न अन्यत् किंचित् अस्ति धनंजय
मयि सर्वम् इदम् प्रोतम् सूत्रे मणिगणा इव

मुझ से अधिक श्रेष्ठ, और कुछ भी नहीं है, धनंजय ।
यह सब मुझ में गुँथा हुआ है, जैसे धागे में मणियाँ ।

७.८ रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

रसो (अ)हम् अप्सु, कौन्तेय, - -
प्रभा (अ)स्मि शशिसूर्ययोः
प्रणवः सर्ववेदेषु, - -
शब्दः खे, पौरुषं नृषु - -

रसः अहम् अप्सु कौन्तेय प्रभा अस्मि शशिसूर्ययोः
प्रणवः सर्ववेदेषु शब्दः खे पौरुषम् नृषु

जल में स्वाद, मै हूं । कौन्तेय । चन्द्र सूर्य की दीप्ति मै हूं । सब वेदों में ओंकार, आकाश में शब्द और पुरुषों में पराक्रम,

७.९ पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥

पुण्यो गन्धः पृथिव्यां च, - -
तेजश् चा (अ)स्मि विभावसौ
जीवनं सर्वभूतेषु, - -
तपश् चा (अ)स्मि तपस्विषु - -

पुण्यः गन्धः पृथिव्याम् च तेजः च अस्मि विभावसौ
जीवनम् सर्वभूतेषु तपः च अस्मि तपस्विषु

पृथ्वी में पवित्र गन्ध और अग्नि में तेज, मै हूं । सब प्राणियों में जीवन और तपस्वियों में तप, मै हूं ।

**७.१० बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥**

बीजं मां सर्वभूतानां
विद्धि, पार्थ, सनातनम्
बुद्धिर् बुद्धिमताम् अस्मि, - -
तेजस् तेजस्विनाम् अहम्

बीजम् माम् सर्वभूतानाम् विद्धि पार्थ सनातनम्
बुद्धिः बुद्धिमताम् अस्मि तेजः तेजस्विनाम् अहम्

सम्पूर्ण जीवों का शाश्वत मूल कारण, तू मुझे जान, पार्थ । बुद्धिमानों की बुद्धि, मैं हूं ; तेजस्वियों का तेज, मैं हूं ।

**७.११ बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरूद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥**

बलं बलवतां च (अ)हं
कामरागविवर्जितम्
धर्माविरूद्धो भूतेषु - -
कामो (अ)स्मि, भरतर्षभ - -

बलम् बलवताम् च अहम् कामरागविवर्जितम्
धर्माविरूद्धः भूतेषु कामः अस्मि भरतर्षभ

और मैं बलवानों का बल हूं, जो काम और राग से रहित है । जो धर्म के प्रतिकूल नही, प्राणियों में काम मैं हूं , भरतर्षभ ।

७.१२ ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥

ये चै (ए)व सात्त्विका भावा,
राजसास् तामसाश् च ये
मत्त एवे (इ)ति तान् विद्धि, - -
न त्व् अ्हं तेषु, ते मयि - -

ये च एव सात्त्विकाः भावाः राजसाः तामसाः च ये
मत्तः एव इति तान् विद्धि न तु अहम् तेषु ते मयि

और जो चित्तवृत्तियां हैं-सात्त्विकी, राजसी और तामसी, ये भी मुझ से ही हैं, तू ऐसा जान । वास्तव में, मैं उनमें नहीं, वे मुझ में हैं ।

७.१३ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥

त्रिभिर् गुणमयैर् भावैर्
एभिः सर्वम् इदं जगत्
मोहितं, ना (अ)भिजानाति - -
माम् एभ्यः परम् अव्ययम्

त्रिभिः गुणमयैः भावैः एभिः सर्वम् इदम् जगत्
मोहितम् न अभिजानाति माम् एभ्यः परम् अव्ययम्

इन तीन गुणों वाली मनोवृत्तियों से मोहित हुआ यह सम्पूर्ण जगत् , मुझ को नहीं पहचानता, जो (इनसे) परे हूं, अविनाशी हूं ।

७.१४ दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

दैवी ह्य् एषा गुणमयी
मम माया दुरत्यया
माम् एव ये प्रपद्यन्ते
मायाम् एतां तरन्ति ते

दैवी हि एषा गुणमयी मम माया दुरत्यया
माम् एव ये प्रपद्यन्ते मायाम् एताम् तरन्ति ते

वास्तव में, यह मेरी दैवी, गुणोंवाली माया, पार करने में कठिन है । जो एकमात्र, मेरा आश्रय लेते हैं, वे इस माया को पार कर जाते हैं ।

७.१५ न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥

न मां दुष्कृतिनो मूढाः
प्रपद्यन्ते नराधमाः
मायया (अ)पहृतज्ञाना,
आसुरं भावम् आश्रिताः

न माम् दुष्कृतिनः मूढाः प्रपद्यन्ते नराधमाः
मायया अपहृतज्ञानाः आसुरम् भावम् आश्रिताः

मेरे पास दुष्कर्म करने वाले मूढ, अधम मनुष्य नहीं पहुंचते - माया द्वारा जिन का ज्ञान हर लिया गया है, वे आसुरी स्वभाव के आश्रय में रहते हैं ।

७.१६ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

चतुर्विधा भजन्ते मां
जनाः सुकृतिनो (अ)र्जुन - -
आर्तो जिज्ञासुर् अर्थार्थी
ज्ञानी च, भरतर्षभ - -

चतुर्विधाः भजन्ते माम् जनाः सुकृतिनः अर्जुन
आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च भरतर्षभ

सुकर्म करने वाले चार प्रकार के मनुष्य मेरा भजन करते हैं, अर्जुन । दुःखी, जिज्ञासु, धन की इच्छावाले, और ज्ञानी, भरतर्षभ ।

७.१७ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥

तेषां ज्ञानी नित्ययुक्त - -
एकभक्तिर् विशिष्यते
प्रियो हि ज्ञानिनो (अ)त्यर्थम्
अहं, स च ममप् प्रियः

तेषाम् ज्ञानी नित्ययुक्तः एकभक्तिः विशिष्यते
प्रियः हि ज्ञानिनः अत्यर्थम् अहम् सः च मम प्रियः

उनमें, ज्ञानी, (मुझ में) निरन्तर लीन हुआ, एक (ही में) भक्तिवाला श्रेष्ठ है । वास्तव में, मैं ज्ञानी को अत्यन्त प्रिय हूं, और वह मुझे प्रिय है ।

७.१८ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥

उदाराः सर्व एवै (ए)ते,
ज्ञानी त्व् आत्मै (ए)व मे मतम्
आस्थितः स हि युक्तात्मा
माम् एवा (अ)नुत्तमां गतिम्

उदाराः सर्वे एव एते ज्ञानी तु आत्मा एव मे मतम्
आस्थितः सः हि युक्तात्मा माम् एव अनुत्तमाम् गतिम्

ये सभी श्रेष्ठ हैं। (परन्तु) ज्ञानी, सच में मेरा अपना रूप है। (यह) मेरा विचार है। वास्तव में, वह एक मात्र मुझमें लीन हुआ-स्थित है। इससे उत्तम गति नहीं है।

७.१९ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

बहूनां जन्मनाम् अन्ते
ज्ञानवान् मां प्रपद्यते
वासुदेवः सर्वम् इति, - -
स महात्मा सुदुर्लभः

बहूनाम् जन्मनाम् अन्ते ज्ञानवान् माम् प्रपद्यते
वासुदेवः सर्वम् इति सः महात्मा सुदुर्लभः

अनेक जन्मों के अन्त में ज्ञानी पुरूष मुझे पा लेता है। "वासुदेव ही सब कुछ है" इस प्रकार (जानने वाला), वह महात्मा, अत्यन्त दुर्लभ है।

**७.२० कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥**

कामैस् तैस् तैर् हृत ज्ञाना
प्रपद्यन्ते (अ)न्यदेवताः
तं तं नियमम् आस्थाय, - -
प्रकृत्या नियताः स्वया

कामैः तैः तैः हृतज्ञानाः प्रपद्यन्ते अन्यदेवताः
तम् तम् नियमम् आस्थाय प्रकृत्या नियताः स्वया

जिन जिन कामनाओं द्वारा (मनुष्यों का) ज्ञान हर लिया गया है, (उन उन कामनाओं के लिए) वे दूसरे दूसरे देवताओं की शरण लेते हैं, उन उन (देवताओं) के नियमों का पालन करते हैं, अपनी-अपनी प्रकृति से विवश हुए ।

**७.२१ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥**

यो यो यां यां तनुं भक्तः
श्रद्धया (अ)र्चितुम् इच्छति - -
तस्य तस्या (अ)चलां श्रद्धां
ताम् एव विदधाम्यहम्

यः यः याम् याम् तनुम् भक्तः श्रद्धया अर्चितुम् इच्छति
तस्य तस्य अचलाम् श्रद्धाम् ताम् एव विदधामि अहम्

जिस जिस रूप आकार को, जो जो भक्त श्रद्धा से पूजना चाहता है, उसकी उसी श्रद्धा को मैं, उस (देवता) में दृढ बना देता हूं ।

७.२२ स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥

स तया श्रद्धया युक्तस्
तस्या (आ)राधनम् ईहते
लभते च ततः कामान्
मयै (ए)व विहितान् हि तान्

सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते
लभते च ततः कामान् मया एव विहितान् हि तान्

उसी श्रद्धा से युक्त होकर वह (उसी आकार की) पूजा करना चाहता है, और (वह) उससे कामनाओं को प्राप्त करता है । वास्तव में, ये भी, लाभ मेरे ही द्वारा निर्धारित हैं ।

७.२३ अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥

अन्तवत् तु फलं तेषां
तद् भवत्य् अल्पमेधसाम्
देवान् देवयजो यान्ति, - -
मद्भक्ता यान्ति माम् अपि - -

अन्तवत् तु फलम् तेषाम् तत् भवति अल्पमेधसाम्
देवान् देवयजः यान्ति मद्भक्ताः यान्ति माम् अपि

उन अल्पबुद्धि वालों के उस फल का वास्तव में अन्त आ जाता है । जो देवताओं को पूजते हैं वे देवताओं के पास जाते हैं; मेरे भक्त मेरे ही पास आते हैं ।

७.२४ अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥

अव्यक्तं व्यक्तिम् आपन्नं
मन्यन्ते माम् अबुद्धयः
परं भावम् अजानन्तो
ममा (अ)व्ययम् अनुत्तमम्

अव्यक्तम् व्यक्तिम् आपन्नम् मन्यन्ते माम् अबुद्धयः
परम् भावम् अजानन्तः मम अव्ययम् अनुत्तमम्

मुझ अप्रत्यक्ष को प्रत्यक्ष हुआ मानते हैं, अविवेकी लोग । वे मेरी सर्वोपरि सत्ता को नहीं जानते, जो अक्षय है, सर्वश्रेष्ठ है ।

७.२५ नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥

ना (अ)हं प्रकाशः सर्वस्य – –
योगमाया समावृतः
मूढो (अ)यं ना (अ)भिजानाति – –
लोको माम् अजम् अव्ययम्

न अहम् प्रकाशः सर्वस्य योगमायासमावृतः
मूढः अयम् न अभिजानाति लोकः माम् अजम् अव्ययम्

मैं सब किसी के लिए प्रकट नहीं हूं, योगमाया से ढका हुआ होने से । यह मोहग्रस्त संसार मुझे नहीं पहचानता, (कि मैं) अजन्मा, अव्यय (हूं) ।

७.२६ वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥

वेदा (अ)हं समतीतानि - -
वर्तमानानि चा (अ)र्जुन - -
भविष्याणि च भूतानि;- -
मां तु वेद न कश्चन - -

वेद अहम् समतीतानि वर्तमानानि च अर्जुन
भविष्याणि च भूतानि माम् तु वेद न कश्चन

मैं जानता हूं, जो भूतकाल में थे और जो वर्तमान में हैं, अर्जुन। और, उन प्राणियों को (भी), जो भविष्य में होंगे। (पर) वास्तव में, मुझे कोई नहीं जानता।

७.२७ इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥

इच्छाद्वेष समुत्थेन - -
द्वन्द्वमोहेन भारत - -
सर्वभूतानि संमोहं
सर्गे यान्ति, परंतप - -

इच्छाद्वेषसमुतथेन द्वन्द्वमोहेन भारत
सर्वभूतानि संमोहम् सर्गे यान्ति परंतप

इच्छा और द्वेष से उत्पन्न, द्वंद्व-मोह के कारण, भारत, संसार में सब प्राणी, मोहग्रस्त हुए फिरते हैं, परंतप।

७.२८ येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥

येषां त्व् अन्तगतं पापं
जनानां पुण्यकर्मणाम्
ते द्वन्द्वमोहनिर्मुक्ता
भजन्ते मां दृढव्व्रताः

येषाम् तु अन्तगतम् पापम् जनानाम् पुण्यकर्मणाम्
ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते माम् दृढव्रताः

वास्तव में, जिन पुण्यवान् मनुष्यों के पापों का अन्त हो गया है वे, द्वंद्व-मोह से मुक्त, मेरा भजन करते हैं- दृढ निश्चय वाले ।

७.२९ जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥

जरामरण मोक्षाय - -
माम् 'आश्रित्य यतन्ति ये
ते ब्रह्म तद्विदुः कृत्स्नम्
अध्यात्मं कर्म चा (अ)खिलम्

जरामरणमोक्षाय माम् आश्रित्य यतन्ति ये
ते ब्रह्म तत् विदुः कृत्स्नम् अध्यातमम् कर्म च अखिलम्

वृद्धावस्था और मृत्यु से मुक्त होने के लिए, जो मेरा आश्रय लेकर प्रयत्न करते हैं, वे जान लेते हैं उस ब्रह्म को, पूर्ण अध्यात्म (विद्या) को और सम्पूर्ण कर्म [२] को । (और),

२. कर्म क्या है ? देखिए अध्याय ८ श्लोक ३

७.३० साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥

साधिभूताधिदैवं मां
साधियज्ञं च ये विदुः
प्रयाणकाले (अ)पि च मां
ते विदुर् युक्तचेतसः

साधिभूताधिदैवम् माम् साधियज्ञम् च ये विदुः
प्रयाणकाले अपि च माम् ते विदुः युक्तचेतसः

अधिभूत,[१] अधिदैव[१] और अधियज्ञ[१] के साथ जो मुझे जानते हैं, वे (महा) प्रयाण के समय भी मुझे जानते रहते हैं, उनका चित्त (मुझ में) जुड़ा रहता है ।

श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः समाप्तः

१. अधिभूत, अधिदैव और अधियज्ञ शब्दों की व्याख्या, अर्जुन के पूछने पर, अगले अध्याय में, भगवान् करते हैं। कोश में दिए अर्थ इस प्रकार हैं :

अधिभूत	(न.)	परमात्मा, परब्रह्म
अधिदैव	(न.)	किसी वस्तु का अधिष्ठाता देवता,
	(पु.)	अन्तर्यामी पुरुष
अधियज्ञ	(पु.)	प्रधान यज्ञ, परमेश्वर

भगवान् कह रहे हैं, "महाप्रयाण के समय मोक्ष प्राप्ति के लिए अनेकानेक धार्मिक सिद्धान्तों की आवश्यकता नहीं। जो यह जानता रहता है कि सम्पूर्ण जड़-चेतनादि में (अधिभूत) क्या है, देवताओं का अन्तर्यामी पुरुष (अधिदैव) कौन है और यज्ञ में सदैव उपस्थित रहने वाला (अधियज्ञ) कौन है, वह मुझे पा लेता है।" हर स्थिति में एक वही है। 'अधिभूत' उसका भौतिक पहलू है, 'अधिदैव' उसका दैवी रूप है, और सदा यज्ञ में स्थित, 'अधियज्ञ' भी वही है। इस प्रकार उस परब्रह्म को सम्पूर्णतः जानना चाहिए, मोक्ष प्राप्ति के लिए।

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे
हरे राम हरे राम राम राम हरे हरे

परिचय-८

अध्याय ७ में भगवान् ने कहा है "मुझ से अधिक श्रेष्ठ और कुछ भी नहीं है" । अब अपने परमधाम का संक्षेप में वर्णन करते हैं, जो शाश्वत है।

सब (जड़-चेतनादि) दिन[1] निकलते अव्यक्त से प्रक्ट हो, रात[1] होते लुप्त हो जाते हैं, उसी अव्यक्त में। इस अव्यक्त से परे एक और अव्यक्त अस्तित्व है जो शाश्वत है, सब का नाश होने पर भी नष्ट नहीं होता। यह अव्यक्त "अक्षर" है। "यह मेरा परमधाम है, जिसे पाकर मनुष्य फिर नहीं लौटता। और, यह एकनिष्ठ भक्ति द्वारा प्राप्य है।"

अध्याय ८ का नाम है - "अक्षर ब्रह्म योग" ।

१. ब्रह्मा का दिन सहस्र युग तक का है और उसकी रात्रि का अन्त सहस्र युग के पश्चात् होता है। (श्लोक ८.१७)

Agamnigam Digital Preservation Foundation, Chandigarh

श्रीमद्भगवद् गीता

अथाष्टमोऽध्यायः

(श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगः)

८.१ **अर्जुन उवाच -**
किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥

किं तद् ब्रह्म किम् अध्यात्मं
किं कर्म फुरुषोत्तम - -
अधिभूतं च किं प्रोक्तम्,
अधिदैवं किम् उच्यते

किम् तत् ब्रह्म किम् अध्यात्मम् किम् कर्म पुरुषोत्तम
अधिभूतम् च किम् प्रोक्तम् अधिदैवम् किम् उच्यते

अर्जुन उवाच -
हे पुरुषोत्तम ! वह ब्रह्म क्या है ? अध्यात्म क्या है ? कर्म क्या है ? और अधिभूत किसे कहते हैं ? अधिदैव किसे कहा जाता है ?

८.२ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥

अधियज्ञः कथं को (अ)त्र - -
देहे (अ)स्मिन्, मधुसूदन - -
प्रयाणकाले च कथं
ज्ञेयो (अ)सि नियतात्मभिः

अधियज्ञः कथम् कः अत्र देहे अस्मिन् मधुसूदन
प्रयाणकाले च कथम् ज्ञेयः असि नियतात्मभिः

यहां इस शरीर में अधियज्ञ कौन है, कैसे है, मधुसूदन । और प्रयाण करने के समय आप कैसे जाने जाते हैं-उनके द्वारा, जिन्होंने स्वयं को वश में किया है ।

८.३ श्रीभगवान् उवाच -
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥

अक्षरं ब्रह्म परमं,
स्वभावो (अ)ध्यात्मम् उच्यते
भूतभावोद्भवकरो
विसर्गः कर्मसंज्ञितः

अक्षरम् ब्रह्म परमम् स्वभावः अध्यात्मम् उच्यते
भूतभावोद्भवकरः विसर्गः कर्मसंज्ञितः

श्रीभगवान् उवाच -
ब्रह्म अक्षय है, सर्वोपरि है । उसके मूल स्वरूप के ज्ञान को अध्यात्म कहते हैं । जड़ चेतनादि के अस्तित्व को उत्पन्न करने वाली क्रिय-विसर्ग-का नाम कर्म[१] है ।

१. संभाव्यतः, यहां "कर्म" से "ईश्वरीय कर्म" की ओर संकेत है- सृष्टि की रचना और संरक्षण ।

८.४ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥

अधिभूतं क्षरो भावः ,
पुरुषश् चा (अ)धिदैवतम्
अधियज्ञो (अ)हम् एवा (अ)त्र - -
देहे, देहभृतां वर - -

अधिभूतम् क्षरः भावः पुरुषः च अधिदैवतम्
अधियज्ञः अहम् एव अत्र देहे देहभृताम् वर

(भौतिक जगत् में) नाशवान् अस्तित्व 'अधिभूत' है और (देवों में अन्तर्यामी) पुरुष 'अधिदैव' है । 'अधियज्ञ' यहां इस देह में, (अन्तर्यामी रूप से) एक मात्र मैं हूं, हे । देहधारियों में श्रेष्ठ ।[१]

८.५ अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥

अन्तकाले च माम् एव - -
स्मरन् , मुक्त्वा कलेवरम्
यः प्रयाति स मद्भावं
याति, ना (अ)स्त्य् अत्र संशयः

अन्तकाले च माम् एव स्मरन् मुक्त्वा कलेवरम्
यः प्रयाति सः मद्भावम् याति न अस्ति अत्र संशयः

और, अन्तकाल में जो एकमात्र मेरा स्मरण करता हुआ शरीर त्यागता है वह मेरे स्वरूप में मिल जाता है, इसमें सन्देह नहीं।

१. यह तीन उस "एक" के ही रूप हैं। देखिए अध्याय ७ के अन्त में हमारी टिप्पणी।

८.६ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥

यं यं वा (अ)पि स्मरन् भावं
त्यजत्य् अन्ते कलेवरम्
तं-तम् एवै (ए)ति, कौन्तेय, - -
सदा तद्भावभावितः

यम् यम् वा अपि स्मरन् भावम् त्यजति अन्ते कलेवरम्
तम् तम् एव एति कौन्तेय सदा तद्भावभावितः

जिस जिस भी रूप आकार का स्मरण करते हुए (मनुष्य) देह त्यागता है वह उसे ही प्राप्त करता है, कौन्तेय । सदा उस रूप में लीन रहने से ।

८.७ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥

तस्मात् सर्वेषु कालेषु - -
माम् अनुस्मर युध्य च - -
मय्य् अर्पितमनोबुद्धिर्
माम् एवै (ए)ष्यस्य् असंशयः

तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च
मयि अर्पितमनोबुद्धिः माम् एव एष्यसि असंशयः

अतः सब समय मेरा स्मरण कर, और, युद्ध कर । मुझ में मन और बुद्धि को अर्पण किए हुए, एकमात्र मुझे प्राप्त कर लेगा (तू), संदेहरहित हुआ ।

८.८ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥

अभ्यासयोगयुक्तेन - -
चेतसा ना (अ)न्यगामिना
परमं पुरुषं दिव्यं
याति, पार्था (अ)नुचिन्तयन्

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना
परमम् पुरुषम् दिव्यम् याति पार्थ अनुचिन्तयन्

अभ्यास से योग में लीन हुआ, अन्य कहीं न भटकते हुए चित्त से, (मनुष्य) सर्वोपरि दिव्य पुरुष को पा जाता है, पार्थ ! उसका मनन चिन्तन करते हुए ।

८.९ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥

कविं पुराणम् अनुशासितारम्
अणोर् अणीयांसम् अनुस्मरेद् यः
सर्वस्य धातारम् अचिन्त्यरूपम्
आदित्यवर्णं, तमसः परस्तात्

कविं पुराणम् अनुशासितारम् अणोः अणीयांसम् अनुस्मरेत् यः
सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णम् तमसः परस्तात्

जो स्मरण करता है उसका–जो सर्वज्ञ, पुरातन, संसार का शासक है, लघु से भी लघु है, सब का पालन कर्त्ता है, जिसका स्वरूप अकल्पनीय है, जो सूर्य सा देदीप्यमान है, अन्धकार से परे है ;

८.१० प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥

प्रयाणकाले मनसा (अ)चलेन - -
भक्त्या युक्तो योगबलेन चैं (ए)व - -
भ्रुवोर् मध्ये प्राणम् आवेश्य सम्यक् ,
स तं परं पुरुषम् उपैति दिव्यम्

प्रयाणकाले मनसा अचलेन भक्त्या युक्तः योगबलेन च एव
भ्रुवोः मध्ये प्राणम् आवेश्य सम्यक् सः तम् परम् पुरुषम् उपैति दिव्यम्

प्रस्थान समय में, निश्चल मन से, भक्ति सहित लीन हुआ और एकमात्र योग बल से दोनों भृकुटियों के बीच श्वास को भली प्रकार स्थिर कर के, वह पा जाता है उस सर्वोच्च दिव्य पुरुष को ।

८.११ यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥

यद् अक्षरं वेदविदो वदन्ति - -
विशन्ति यद् यतयो वीतरागाः
यद् इच्छन्तो ब्रह्मचर्यचरन्ति, - -
तत् ते पदं संग्रहेणप् प्रवक्ष्ये

यत् अक्षरम् वेदविदः वदन्ति विशन्ति यत् यतयः वीतरागाः
यत् इच्छन्तः ब्रह्मचर्यम् चरन्ति तत् ते पदम् संग्रहेण प्रवक्ष्ये

जिसे वेद को जानने वाले "अक्षर" कहते हैं, रागरहित यति लोग जिसमें प्रवेश करते हैं, जिसकी इच्छा करते हुए लोग ब्रह्मचर्य का आचरण करते हैं, उस (परम) पद को, मैं तुझे संक्षेप में बतलाऊंगा ।

८.१२ सर्व द्वाराणि संयम्य मनो हृदि निरूध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥

सर्वद् द्वाराणि संयम्य, - -
मनो हृदि निरूध्य च - -
मूर्ध्न्य् आधाया (आ)त्मनः प्राणम्
आस्थितो योगधारणाम्

सर्व द्वाराणि संयम्य मनः हृदि निरूध्य च
मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः योगधारणाम्

(शरीर के) सब द्वारों को नियन्त्रण में रखकर और मन को हृदय में रोक कर, प्राणों को मस्तक में स्थापित करके, योग में एकाग्र स्थिर हुआ, -

८.१३ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

ओम् इत्य् एकाक्षरं ब्रह्म - -
व्याहरन् , माम् अनुस्मरन्
यः प्रयाति त्यजन् देहं,
स याति परमां गतिम्

ओम् इति एकाक्षरम् ब्रह्म व्याहरन् माम् अनुस्मरन्
यः प्रयाति त्यजन् देहम् सः याति परमाम् गतिम्

इस प्रकार, एकाक्षर ब्रह्म "ओम्" का उच्चारण करते, मेरा स्मरण करते हुए, जो देह त्याग कर प्रस्थान करता है, वह सर्वोच्च गति को पा जाता है ।

८.१४ अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥

अनन्यचेताः सततं
यो मां स्मरति नित्यशः
तस्या (अ)हं सुलभः, पार्थ, - -
नित्ययुक्तस्य योगिनः

अनन्यचेताः सततम् यः माम् स्मरति नित्यशः
तस्य अहम् सुलभः पार्थ नित्ययुक्तस्य योगिनः

जो सदा एकाग्र मन से मुझे निरन्तर स्मरण करता है, उसके लिए मैं सरलता से प्राप्य हूँ, पार्थ । - सदैव लीन रहने वाले योगी के लिए ।

८.१५ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महाऽत्मानः संसिद्धिं परमां गताः ॥

माम् उपेत्य पुनर्जन्म - -
दुःखालयम् अशाश्वतम्
नाप्नुवन्ति महात्मानः
संसिद्धिं परमां गताः

माम् उपेत्य पुनर्जन्म दुःखालयम् अशाश्वतम्
न आप्नुवन्ति महात्मानः संसिद्धिम् परमाम् गताः

मुझे पाकर महात्मा लोग पुनर्जन्म को, जो दुःखों का घर है, अस्थायी है, प्राप्त नहीं होते । (कारण) वे तो सर्वोच्च सिद्धि को पहुंच (ही) चुके हैं ।

८.१६ आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥

आ ब्रह्मभुवनाल् लोकाः
पुनरावर्तिनो (अ)र्जुन - -
माम् उपेत्य तु, कौन्तेय, - -
पुनर्जन्म न विद्यते

आ ब्रह्मभुवनात् लोकाः पुनरावर्तिनः अर्जुन
माम् उपेत्य तु कौन्तेय पुनर्जन्म न विद्यते

हे अर्जुन, ब्रह्मलोक तक के लोकों से फिर लौटना पड़ता है । (पर) मुझे पाकर वास्तव में, कौन्तेय ! पुनर्जन्म नहीं होता ।

८.१७ सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥

सहस्रयुगपर्यन्तम्
अहर् यद् ब्रह्मणो विदुः
रात्रिं युगसहस्रान्तां,
ते (अ)होरात्रविदो जनाः

सहस्रयुगपर्यन्तम् अहः यत् ब्रह्मणः विदुः
रात्रिम् युगसहस्रान्ताम् ते अहोरात्रविदः जनाः

ब्रह्मा का दिन सहस्र युग तक का है, और (उसकी) रात्रि का अन्त सहस्र युग के पश्चात् होता है, जो ऐसा जानते हैं, वे लोग (उसके) दिन और रात को जानते हैं–

८.१८ **अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।**
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥

अव्यक्ताद् व्यक्तयः सर्वाः
प्रभवन्त्य् अहरागमे
रात्र्यागमे प्रलीयन्ते
तत्रै (ए)वा (अ)व्यक्तसंज्ञके

अव्यक्तात् व्यक्तयः सर्वाः प्रभवन्ति अहरागमे
रात्र्यागमे प्रलीयन्ते तत्र एव अव्यक्तसंज्ञके

सब, (जड़-चेतनादि) अव्यक्त से प्रकट हो, दिन निकलते उमड़ पड़ते हैं। रात होते, वे लुप्त हो जाते हैं उसीमें– जिसका नाम अव्यक्त है;

८.१९ **भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।**
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥

भूतग्रामः स एवा (अ)यं
भूत्वाभूत्वा प्रलीयते
रात्र्यागमे (अ)वशः, पार्थ, – –
प्रभवत्य् अहरागमे

भूतग्रामः सः एव अयम् भूत्वा भूत्वा प्रलीयते
रात्र्यागमे अवशः पार्थ प्रभवति अहरागमे

उन जड़-चेतनादि का, यह समुदाय भी, उत्पन्न हो हो कर, रात होते बरबस लय हो जाता है, पार्थ। दिन होने पर (फिर) प्रकट हो जाता है।

८.२० परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥

परस् तस्मात् तु भावो (अ)न्यो
(अ)व्यक्तो (अ)व्यक्तात् सनातनः
यः स सर्वेषु भूतेषु – –
नश्यत्सु न विनश्यति – –

परः तस्मात् तु भावः अन्यः अव्यक्तः अव्यक्तात् सनातनः
यः सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति

वास्तव में, इस अव्यक्त से परे एक और अव्यक्त अस्तित्व है जो इसकी अपेक्षा, शाश्वत है–जो सब जड़-चेतनादि का नाश होने पर भी, नष्ट नहीं होता ।

८.२१ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥

अव्यक्तो (अ)क्षर इत्य् उक्तस्
तम् आहुः परमां गतिम्
यं प्राप्य न निवर्तन्ते
तद् धाम परमं मम – –

अव्यक्तः अक्षरः इति उक्तः तम् आहुः परमाम् गतिम्
यम् प्राप्य न निवर्तन्ते तत् धाम परमम् मम

ऐसे अव्यक्त को "अक्षर" कहते हैं । उसे परम गति कहा गया है, जिसे पा कर (मनुष्य) फिर नहीं लौटते । वह मेरा परम धाम है ।

**८.२२ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥**

पुरुषः स परः, पार्थ, - -
भक्त्या लभ्यस् त्व् अनन्यया
यस्या (अ)न्तः स्थानि भूतानि - -
येन सर्वम् इदं ततम्

पुरुषः सः परः पार्थ भक्त्या लभ्यः तु अनन्यया
यस्य अन्तः स्थानि भूतानि येन सर्वम् इदम् ततम्

वह परम पुरुष, पार्थ ! निश्चय ही एकनिष्ठ भक्ति से प्राप्य है । उसमें सब प्राणी स्थित हैं, यह सब (ब्रह्माण्ड) उससे व्याप्त है ।

**८.२३ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥**

यत्र काले त्व् अनावृत्तिम्
आवृत्तिम् चै(ए)व योगिनः
प्रयाता यान्ति, तं कालं
वक्ष्यामि, भरतर्षभ - -

यत्र काले तु अनावृत्तिम् आवृत्तिम् च एव योगिनः
प्रयाताः यान्ति तम् कालम् वक्ष्यामि भरतर्षभ

वास्तव में, जिस काल में प्रस्थान करने पर योगी लौट कर नहीं आते, और जिस काल में लौट आते हैं, वह भी मैं तुझे बतलाऊंगा, भरतर्षभ !

**८.२४ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥**

अग्निर् ज्योतिर् अहः शुक्लः
षण्मासा उत्तरायणम्
तत्रप् प्रयाता गच्छन्ति - -
ब्रह्म ब्रह्मविदो जनाः

अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणम्
तत्र प्रयाताः गच्छन्ति ब्रह्म ब्रह्मविदः जनाः

अग्नि, ज्योति, दिन, शुक्ल पक्ष, उत्तरायण के छः महीने, उस समय में प्रस्थान करने वाले ब्रह्मवेत्ता लोग, ब्रह्म को पाते हैं ।

**८.२५ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥**

धूमो रात्रिस् तथा कृष्णः
षण्मासा दक्षिणायनम्
तत्र चान्द्रमसं ज्योतिर्
योगी प्राप्य निवर्तते

धूमः रात्रिः तथा कृष्णः षण्मासाः दक्षिणायनम्
तत्र चान्द्रमसम् ज्योतिः योगी प्राप्य निवर्तते

धूम, रात्रि, कृष्णपक्ष तथा दक्षिणायन के छः महीने, उस समय में (जाने वाला) योगी, चन्द्र-ज्योति प्राप्त करके, लौट आता है ।

८.२६ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥

शुक्लकृष्णे गती ह्य् एते
जगतः शाश्वते मते
एकया यात्य् अनावृत्तिम्
अन्यया (आ)वर्तते पुनः

शुक्लकृष्णे गती हि एते जगतः शाश्वते मते
एकया याति अनावृत्तिम् अन्यया आवर्तते पुनः

प्रकाश और अन्धकार, वास्तव में, संसार के ये दो मार्ग शाश्वत माने गए हैं। एक से वह जाता है जो लौटता नहीं, दूसरे से वह, जो फिर लौट आता है।

८.२७ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥

नै (ए)ते सृती, पार्थ, जानन्
योगी मुह्यति कश्चन - -
तस्मात् सर्वेषु कालेषु - -
योगयुक्तो भवा (अ)र्जुन - -

न एते सृती पार्थ जानन् योगी मुह्यति कश्चन
तस्मात् सर्वेषु कालेषु योगयुक्तः भव अर्जुन

इन दो मार्गों को जानता हुआ, पार्थ ! योगी कभी मोह में नहीं पड़ता। अतः सब समय में तू योग में लीन रह, अर्जुन।

८.२८ वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥

वेदेषु यज्ञेषु तपःसु चै (ए)व - -
दानेषु यत् पुण्यफलं प्रदिष्टम्
अत्येति तत् सर्वम् इदम् विदित्वा
योगी परं स्थानम् उपैति चा (आ)द्यम्

वेदेषु यज्ञेषु तपःसु च एव दानेषु यत् पुण्यफलम् प्रदिष्टम्
अत्येति तत् सर्वम् इदम् विदित्वा योगी परम् स्थानम् उपैति च आद्यम्

वेद, यज्ञ, तप, और दान में जो पुण्यफल निर्धारित हैं उन सब से परे वह योगी पहुंच जाता है जो इन (दो मार्गों) को जानता है, और, वह सर्वोपरि आदि स्थान को पा लेता है ।

श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः समाप्तः

गीता प्रकाश

परिचय-९

सांतवें अध्याय के आरम्भ में (७.२) भगवान् ने 'विज्ञान सहित ज्ञान' के बतलाने की बात कही थी। उसी प्रसंग में आठवें अध्याय में अपने धाम "अक्षर" की चर्चा की।

अब "विज्ञान सहित ज्ञान" की बात आगे करते हैं जिसे जानकर और कुछ जानने योग्य रह नहीं जाता। "यह सम्पूर्ण संसार मुझ अप्रत्यक्ष रूप वाले से व्याप्त है। सब कुछ मुझ में स्थित है, मैं उसमें स्थित नहीं। तू मेरा ही भजन कर"। इन ज्ञान की बातों को परम गोपनीय राजविद्या कहा है।

अध्याय ९ का नाम है, "राजविद्या राजगुह्य योग "।[१]

१. यह अध्याय, अध्याय ७ और ८ का विस्तार रूप है। अध्याय १० का "परिचय" भी देखें

श्रीमद्भगवद् गीता

अथ नवमोऽध्यायः

(श्री कृष्णार्जुनसंवादे राजविद्या राजगुह्ययोगः)

९.१ **श्रीभगवानुवाच -**
इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥

इदं तु ते गुह्यतमं
प्रवक्ष्याम्य् अनसूयवे
ज्ञानं विज्ञानसहितम्,
यज् ज्ञात्वा मोक्ष्यसे (अ)शुभात्

इदम् तु ते गुह्यतमम् प्रवक्ष्यामि अनसूयवे
ज्ञानम् विज्ञानसहितम् यत् ज्ञात्वा मोक्ष्यसे अशुभात्

श्रीभगवान् उवाच -

अब, यह गुप्त से भी गुप्त ज्ञान तुझे - जो छिद्रान्वेषण नहीं करता - मैं, विज्ञान[१] सहित बतलाऊँगा । जिसे जानकर तू मुक्त हो जाएगा - अशुभ से, (पाप से) ।

१. देखिए अध्याय (७) श्लोक (२)

९.२ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥

राजविद्या राजगुह्यं
पवित्रम् इदम् उत्तमम्
प्रत्यक्षावगमं धर्म्यं,
सुसुखं कर्तुम् अव्ययम्

राजविद्या राजगुह्यम् पवित्रम् इदम् उत्तमम्
प्रत्यक्षावगमम् धर्म्यम् सुसुखम् कर्तुम् अव्ययम्

यह, राजविद्या (है, पर) परम रहस्यमय, पवित्र, तुरत, बोधगम्य, धर्मसंगत, अभ्यास करने में सरल, (और) अविनाशी है ।

९.३ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥

अश्रद्दधानाः पुरुषा
धर्मस्या (अ)स्य, परंतप - -
अप्राप्य मां निवर्तन्ते
मृत्युसंसारवर्त्मनि - -

अश्रद्दधानाः पुरुषाः धर्मस्य अस्य परंतप
अप्राप्य माम् निवर्तन्ते मृत्युसंसारवर्त्मनि

जो पुरुष इस धर्म में श्रद्धा नहीं रखते, वे, हे परंतप । मुझे प्राप्त न करके लौट आते है, मृत्युलोक की राह में - जीवन-मरण के चक्र में ।

९.४ **मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।**
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥

मया ततम् इदं सर्वं
जगद् अव्यक्तमूर्तिना
मत्स्थानि सर्वभूतानि, – –
न चा (अ)हं तेष्व् अवस्थितः

मया ततम् इदम् सर्वम् जगत् अव्यक्तमूर्तिना
मत्स्थानि सर्वभूतानि न च अहम् तेषु अवस्थितः

यह सम्पूर्ण संसार मुझ, अप्रत्यक्ष रूप वाले से व्याप्त है । सब जड़-चेतनादि मुझ में स्थित हैं, और मैं उनमें स्थित नहीं ;

९.५ **न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।**
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥

न च मत्स्थानि भूतानि;– –
पश्य मे योगम् ऐश्वरम्
भूतभृन् न च भूतस्थो
– – ममा (आ)त्मा भूतभावनः

न च मत्स्थानि भूतानि पश्य मे योगम् ऐश्वरम्
भूतभृत् न च भूतस्थः मम आत्मा भूतभावनः

और (फिर) न सब जड़-चेतनादि मुझ में स्थित हैं,[२] तू देख, मेरे सर्व श्रेष्ठ योग को । जड़-चेतनादि का आधार होते हुए भी, उनमें स्थित नहीं हूं, (परन्तु), मैं स्वयं उनका भरण पोषण करने वाला हूँ ।

२. श्लोक ४ और ५ में जो विरोध प्रतीत हो रहा है वह दो भिन्न दृष्टियों से देखने के कारण है– व्यावहारिक और पारमार्थिक ।

९.६ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥

यथा (आ)काशस्थितो नित्यं
वायुः सर्वत्रगो महान्
तथा सर्वाणि भूतानि - -
मत्स्थानी (इ)त्य् उपधारय - -

यथा आकाशस्थितः नित्यम् वायुः सर्वत्रगः महान्
तथा सर्वाणि भूतानि मत्स्थानि इति उपधारय

जैसे, महान् वायु सब कहीं बहता हुआ आकाश में सदैव स्थित है वैसे ही सब जड़-चेतनादि, मुझ में स्थित हैं - तू ऐसा जान ।

९.७ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥

सर्वभूतानि, कौन्तेय, - -
- - प्रकृतिं यान्ति मामिकाम्
कल्पक्ष्ये पुनस् तानि - -
- - कल्पादौ विसृजाम्य् अहम्

सर्व भूतानि कौन्तेय प्रकृतिम् यान्ति मामिकाम्
कल्पक्षये पुनः तानि कल्पादौ विसृजामि अहम्

सब जड़-चेतनादि, कौन्तेय ! कल्प के अन्त में मेरी प्रकृति में समा जाते हैं । फिर उनको, कल्प के आरम्भ में, मैं प्रकट करता हूं ।

९.८ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥

प्रकृतिं स्वाम् अवष्टभ्य – –
विसृजामि पुनः पुनः
भूतग्रामम् इमम् कृत्स्नम्
अवशं प्रकृतेर् वशात्

प्रकृतिं स्वाम् अवष्टभ्य विसृजामि पुनः पुनः
भूतग्रामम् इमम् कृत्स्नम् अवशम् प्रकृतेः वशात्

अपनी प्रकृति का आश्रय लेकर, मैं बार बार उत्पन्न करता हूं, इस सम्पूर्ण जड़-चेतनादि समुदाय को, जो निस्सहाय है, (मेरी) प्रकृति के वश में होने से ।

९.९ न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥

न च मां तानि कर्माणि – –
निबध्नन्ति, धनंजय – –
उदासीनवद् आसीनम्
असक्तं तेषु कर्मसु – –

न च माम् तानि कर्माणि निबध्नन्ति धनंजय
उदासीनवत् आसीनम् असक्तम् तेषु कर्मसु

और, न ये कर्म मुझे बांधते हैं, धनंजय ! मैं आसक्तिरहित, तटस्थ सा विराजमान रहता हूं , इन कर्मों में ।

९.१० मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥

मया (अ)ध्यक्षेण प्रकृतिः
सूयते सचराचरम्
हेतुना (अ)नेन, कौन्तेय, - -
जगद् विपरिवर्तते

मया अध्यक्षेण प्रकृतिः सूयते सचराचरम्
हेतुना अनेन कौन्तेय जगत् विपरिवर्तते

मेरे निरीक्षण में प्रकृति उत्पन्न करती है - चर और अचर को । इस कारण, हे कौन्तेय ! संसार चलता रहता है ।

९.११ अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥

अवजानन्ति मां मूढाः
मानुषीं तनुम् आश्रितम्
परं भावम् अजानन्तो
मम भूतमहेश्वरम्

अवजानन्ति माम् मूढाः मानुषीम् तनुम् आश्रितम्
परम् भावम् अजानन्तः मम भूतमहेश्वरम्

मूढ लोग मेरा तिरस्कार करते हैं कि मैं मनुष्य शरीर का आश्रय लेता हूं । वे नहीं जानते मेरे सर्वोपरि स्वरूप को, जो सब प्राणियों का परमेश्वर हैः

९.१२ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥

मोघाशा मोघकर्माणो
मोघज्ञाना विचेतसः
राक्षसीम् आसुरीं चै (ए)व – –
प्रकृतिं मोहिनीं श्रिताः

मोघाशाः मोघकर्माणः मोघज्ञानाः विचेतसः
राक्षसीम् आसुरीम् च एव प्रकृतिम् मोहिनीम् श्रिताः

उनकी आशाएं व्यर्थ हैं, कर्म निष्फल और ज्ञान निरर्थक हैं । वे विवेक हीन राक्षसी और आसुरी वृत्ति का ही सहारा लेते हैं, जो मोह-भ्रम में डालने वाली है ।

९.१३ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥

महात्मानस् तु मां, पार्थ, – –
दैवीं प्रकृतिम् आश्रिताः
भजन्त्य् अनन्यमनसो
ज्ञात्वा भूतादिम् अव्ययम्

महात्मानः तु माम् पार्थ दैवीम् प्रकृतिम् आश्रिताः
भजन्ति अनन्यमनसः ज्ञात्वा भूतादिम् अव्ययम्

वस्तुतः, महात्मा लोग मुझे, पार्थ ! दैवी प्रकृति का सहारा लेकर, एक मन से भजते हैं, जानते हुए कि मैं, जड़-चेतनादि का आदि-आरम्भ हूं, अविनाशी ।

९.१४ सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥

सततं कीर्तयन्तो मां,
यतन्तश् च दृढव्रताः
नमस्यन्तश् च मां भक्त्या
नित्ययुक्ता उपासते

सततम् कीर्तयन्तः माम् यतन्तः च दृढव्रताः
नमस्यन्तः च माम् भक्त्या नित्ययुक्ताः उपासते

निरन्तर मेरा गुणगान करते, प्रयत्नशील और अटल निश्चयवाले, भक्तिसहित मुझे नमस्कार करते और सदैव लीन रहते हुए, उपासना करते हैं।

९.१५ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥

ज्ञानयज्ञेन चा (अ)प्य् अन्ये
यजन्तो माम् उपासते
एकत्वेन पृथक्त्वेन
बहुधा विश्वतोमुखम्

ज्ञानयज्ञेन च अपि अन्ये यजन्तः माम् उपासते
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्

और दूसरे (लोग) भी ज्ञानयज्ञ द्वारा, यज्ञ करते हुए, मेरी उपासना करते हैं - एक रूपमें, भिन्न-भिन्न रूप में (और) अनेक रूप में- विश्वव्यापी जो हूँ।

९.१६ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥

अहं क्रतुर् अहं यज्ञः
स्वधा (अ)हम् अहम् औषधम्
मन्त्रो (अ)हम् अहम् एवा (आ)ज्यम्
अहम् अग्निर् अहं हुतम्

अहम् क्रतुः अहम् यज्ञः स्वधा अहम् अहम् औषधम्
मन्त्रः अहम् अहम् एव आज्यम् अहम् अग्निः अहम् हुतम्

मैं क्रतु[३], मैं यज्ञ[४], स्वधा[५] मैं, औषधि मैं हूं ।
मंत्र मैं हूं, घृत भी मैं हूं, मैं अग्नि, आहुति मैं हूं ;

९.१७ पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥

पिता (अ)हम् अस्य जगतो
मांता धाता पितामहः
वेद्यं पवित्रम् ओंकार - -
ऋक् साम यजुर् एव च - -

पिता अहम् अस्य जगतः माता धाता पितामहः
वेद्यम् पवित्रम् ओंकार ऋक् साम यजुः एव च

मैं इस जगत् का पिता, माता, पालन पोषण करने वाला और पितामह हूं । और जो कुछ पवित्र जानने योग्य है,–ओउम् , ऋक् , साम और यजुर्वेद भी;

३ श्रौतयज्ञ ४ स्मार्त यज्ञ ५ पितरों को अर्पित अन्न

**९.१८ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ।।**

गतिर् भर्ता प्रभुः साक्षी
निवासः शरणं सुहृत
प्रभवः प्रलयः स्थानं
निधानं बीजम् अव्ययम्

गतिः भर्ता प्रभुः साक्षी निवासः शरणम् सुहृत्
प्रभवः प्रलयः स्थानम् निधानम् बीजम् अव्ययम्

गति, पति, प्रभु, साक्षी, आवास, आश्रय, स्नेही मित्र, उद्‌गम, प्रलय, आधार, भण्डार, अक्षय बीज; (सब मैं हूं।)

**९.१९ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ।।**

तपाम्य् अहम् अहं वर्षं
निगृह्णाम्य् उत्सृजामि च - -
अमृतं चै (ए)व मृत्युश् च - -
सद् असच् चा (अ)हम्, अर्जुन - -

तपामि अहम् अहम् वर्षम् निगृह्णामि उत्सृजामि च
अमृतम् च एव मृत्युः च सत् असत् च अहम् अर्जुन

तपता मैं हूं,[६] वर्षा मैं करता हूं,[७] उसे रोकता और छोड़ता मैं हूं । और, अमृतत्व और मृत्यु, सत् और असत् भी, मैं हूं, अर्जुन ।

६ सूर्य रूप में। ७ मेघ रूप से।

९.२० त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान् ॥

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैर् इष्ट्वा स्वर्गतिं प्रार्थयन्ते
ते पुण्यम् आसाद्य सुरेन्द्रलोकम्
अश्नन्ति दिव्यान् दिवि देवभोगान्

त्रैविद्याः माम् सोमपाः पूतपापाः यज्ञैः इष्ट्वा स्वर्गतिम् प्रार्थयन्ते
ते पुण्यम् आसाद्य सुरेन्द्रलोकम् अश्नन्ति दिव्यान् दिवि देवभोगान्

तीनो वेदों के ज्ञाता, सोमरस पीने वाले, पापों से मुक्त हुए, यज्ञों द्वारा मेरी पूजा करके स्वर्ग प्राप्ति की प्रार्थना करते हैं। वे पुनीत इन्द्रलोक में पहुंचकर, देवताओं के दिव्य भोगों का स्वर्ग में सेवन करते हैं।

९.२१ ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति - -
एवं त्रयीधर्मम् अनुप्रपन्ना
गतागतं कामकामा लभन्ते

ते तम् भुक्त्वा स्वर्गलोकम् विशालम् क्षीणे पुण्ये मर्त्यलोकम् विशन्ति
एवम् त्रयीधर्मम् अनुप्रपन्नाः गतागतम् कामकामाः लभन्ते

वे उस विशाल स्वर्ग लोक का भोग करके, पुण्य क्षय होने पर, मृत्यु लोक में प्रवेश करते हैं। इस प्रकार तीनों (वेदों में कहे) धर्म के आश्रित, कामना की इच्छावालों को आवागमन प्राप्त होता है।

९.२२ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

अनन्याश् चिन्तयन्तो मां
ये जनाः पर्युपासते
तेषां नित्याभियुक्तानां
योगक्क्षेमं वहाम्य् अहम्

अनन्याः चिन्तयन्तः माम् ये जनाः पर्युपासते
तेषाम् नित्याभियुक्तानाम् योगक्षेमम् वहामि अहम्

अनन्य भाव से चिन्तन करते हुए जो लोग मेरी उपासना करते हैं, उन, सदैव लीन रहने वालों का योगक्षेम[८] मैं सँभाले रहता हूं।

९.२३ येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥

ये (अ)प्य् अन्यद्देवता भक्ता
यजन्ते श्रद्धया (अ)न्विताः
ते (अ)पि माम् एव, कौन्तेय, --
यजन्त्य् अविधिपूर्वकम्

ये अपि अन्यदेवता भक्ताः यजन्ते श्रद्धया अन्विताः
ते अपि माम् एव कौन्तेय यजन्ति अविधिपूर्वकम्

दूसरे देवताओं के भक्त भी, जो श्रद्धापूर्वक (उनके लिए) यज्ञ करते हैं, वे भी मेरे ही लिए यज्ञ करते हैं, कौन्तेय ! (भले ही) विधिपूर्वक न हो ।

८ जो नहीं है उसे प्राप्त करना "योग" है और जो है उस की रक्षा "क्षेम" है।

९.२४ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥

अहं हि सर्वयज्ञानां
भोक्ता च प्रभुर् एव च - -
न तु माम् अभिजानन्ति - -
तत्त्वेना (अ)तश् च्यवन्ति ते

अहम् हि सर्वयज्ञानाम् भोक्ता च प्रभुः एव च
न तु माम् अभिजानन्ति तत्त्वेन अतः च्यवन्ति ते

वस्तुतः मैं सब यज्ञों का भोक्ता हूं और स्वामी भी । और वे, सच में मुझे नहीं जानते यथार्थ रूपसे, इसलिए (उनका) पतन होता है ।

९.२५ यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥

यान्ति देवव्रता देवान्,
पितॄन् यान्ति पितृव्रताः
भूतानि यान्ति भूतेज्या,
यान्ति मद्याजिनो (अ)पि माम्

यान्ति देवव्रताः देवान् पितॄन् यान्ति पितृव्रताः
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनः अपि माम्

देवताओं की पूजा करने वाले देवताओं को जा मिलते हैं । पितरों की पूजा करने वाले पितरों को जा मिलते हैं । भूतों के लिए यज्ञ करने वाले भूतों से जा मिलते हैं, परन्तु मेरे लिए यज्ञ करने वाले, मुझ को प्राप्त होते हैं।

**९.२६ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥**

पत्रं पुष्पं फलं तोयं
यो मे भक्त्या प्रयच्छति --
तद् अहं भक्त्युपहृतम्
अश्नामि प्रयतात्मनः

पत्रम् पुष्पम् फलम् तोयम् यः मे भक्त्या प्रयच्छति
तत् अहम् भक्त्युपहृतम् अश्नामि प्रयतात्मनः

पत्र, पुष्प, फल, जल, जो मुझे भक्ति पूर्वक अर्पण किया जाय, उसे मैं स्वीकार करता हूं:- भक्ति सहित अर्पण होने से, ऐसे व्यक्ति द्वारा जो प्रयत्नशील, (स्वच्छ) हृदय वाला है ।

**९.२७ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥**

यत् करोषि यद् अश्नासि --
यज् जुहोषि ददासि यत्
यत् तपस्यसि, कौन्तेय --
तत् कुरुष्व मदर्पणम्

यत् करोषि यत् अश्नासि यत् जुहोषि ददासि यत्
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्

तू जो करे, जो खाए, जो हवन करे, जो दान दे, जो तप करे, कौन्तेय ! वह मुझे अर्पण करते हुए कर ।

१.२८ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥

शुभा शुभफलैर् एवं
मोक्ष्यसे कर्मबन्धनैः
संन्यासयोग युक्तात्मा,
विमुक्तो, माम् उपैष्यसि - -

शुभाशुभफलैः एवम् मोक्ष्यसे कर्मबन्धनैः
संन्यासयोगयुक्तात्मा विमुक्तः माम् उपैष्यसि

इस प्रकार शुभ अशुभ फल देने वाले कर्मों के बन्धनों से तू मुक्त हो जाएगा । संन्यास योग से अपने को संतुलित किए, मुक्त हुआ, तू मुझको प्राप्त करेगा ।

१.२९ समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

समो (अ)हं सर्वभूतेषु, = =
न मे द्वेष्यो (अ)स्ति न प्रियः
ये भजन्ति तु मां भक्त्या - -
मयि ते तेषु चा (अ)प्य् अहम्

समः अहम् सर्वभूतेषु न मे द्वेष्यः अस्ति न प्रियः
ये भजन्ति तु माम् भक्त्या मयि ते तेषु च अपि अहम्

मैं सब जड़-चेतनादि में समान रूप से हूं । न मुझे किसी से द्वेष है न प्रेम । वास्तव में, जो मुझे श्रद्धा सहित भजते हैं वे मुझ में हैं और मैं भी, उन में हूं ।

९.३० अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥

अपि चेत् सुदुराचारो,
भजते माम् अनन्यभाक्
साधुर् एव स मन्तव्यः,
सम्यग् व्यवसितो हि सः

अपि चेत् सुदुराचारः भजते माम् अनन्यभाक्
साधुः एव सः मन्तव्यः सम्यक् व्यवसितः हि सः

यदि महा दुराचारी भी एकनिष्ठ होकर मेरा भजन करता है, (तो) उसे भी साधु मानना चाहिए। वास्तव में, उसने जो निश्चय किया है, वह उचित है ।

९.३१ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

क्षिप्प्रं भवति धर्मात्मा,
शश्वच् छान्तिं निगच्छति – –
कौन्तेय प्रतिजानीहि, – –
न मे भक्तः प्रणश्यति – –

क्षिप्रम् भवति धर्मात्मा शश्वत् शान्तिम् निगच्छति
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति

वह शीघ्र ही धर्मात्मा हो जाता है, निरन्तर शान्ति को प्राप्त करता है । कौन्तेय ! तू निश्चित रूपसे जान, मेरा भक्त नष्ट नहीं होता ।

९.३२ मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

मां हि, पार्थ, व्यपाश्रित्य - -
ये (अ)पिस् स्युः पापयोनयः
स्त्रियो वैश्यास् तथा शूद्रास्
ते (अ)पि यान्ति परां गतिम्

माम् हि पार्थ व्यपाश्रित्य ये अपि स्युः पापयोनयः
स्त्रियः वैश्याः तथा शूद्राः ते अपि यान्ति पराम् गतिम्

हे पार्थ । वास्तव में मेरी शरण लेने पर, चाहे जो भी हों पाप योनि वाले- स्त्रियां, वैश्य तथा शूद्र - वे भी सर्वोच्च गति को प्राप्त हो जाते हैं ।

९.३३ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥

किं पुनर् ब्राह्मणाः पुण्या
भक्ता राजर्षयस् तथा
अनित्यम् असुखं लोकम्
इमं प्राप्य भजस्व माम्

किम् पुनः ब्राह्मणाः पुण्याः भक्ताः राजर्षयः तथा
अनित्यम् असुखम् लोकम् इमम् प्राप्य भजस्व माम्

फिर पुण्यवान् ब्राह्मणों और निष्ठावान् राजर्षियों का क्या कहना ! (अतः) इस अनित्य, सुखरहित संसार को पाकर, तू मेरा भजन कर ।

**९.३४ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥**

मन्मना भव मद्भक्तो
मद्याजी मां नमस्कुरू - -
माम् एवै (ए)ष्यसि युक्त्वै (ए)वम्
आत्मानं मत्परायणः

मन्मनाः भव मद्भक्तः मद्याजी माम् नमस्कुरु
माम् एव एष्यसि युक्त्वा एवम् आत्मानम् मत्परायणः

मुझ में मन लगा, मेरा भक्त बन, मेरे निमित्त यज्ञ कर, मुझे नमस्कार कर । तू मेरे ही पास आएगा अपने में इस प्रकार संतुलित होकर, मुझ में लीन हुआ ।

श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः
समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय-१०

अध्याय ९ में परम गोपनीय राजविद्या की चर्चा हुई। यह इतनी महत्त्वपूर्ण है कि भगवान् फिर इसे संक्षेप में दोहराते हैं : "मेरी उत्पत्ति को कोई नहीं जानता। मैं अजन्मा, अनादि और सब लोकों का परमेश्वर हूं। मेरे संकल्प से ही सब कुछ उत्पन्न हुआ है, जड़-चेतनादि के स्वभाव भी"।

यह सब सुनने के बाद अर्जुन ने कहा "यह सच है, भगवन् , कि आप की उत्पत्ति को कोई नहीं जानता, न देवता, न दानव। अब आप ही कृपा करके बतलाइए अपनी दिव्य विभूतियों को, जिनके द्वारा आप सब लोकों में व्याप्त हुए रहते हैं"।

आगे श्लोक २०-४२ में दिव्य विभूतियों का वर्णन है। इन्हें जानकर मनुष्य सर्वत्र भगवान् का चिन्तन करता रहता है।

अध्याय १० का नाम है "विभूतियोग"।

श्रीमद्भगवद् गीता

अथ दशमोऽध्यायः

(श्रीकृष्णार्जुनसंवादे विभूतियोगः)

१०.१ **श्रीभगवानुवाच –**
भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ।।

भूय एव, महाबाहो,
शृणु मे परमं वचः
यत् ते (अ)हं प्रीयमाणाय – –
वक्ष्यामि हितकाम्यया

भूयः एव महाबाहो शृणु मे परमम् वचः
यत् ते अहम् प्रीयमाणाय वक्ष्यामि हितकाम्यया

श्रीभगवान् उवाच –
फिर भी, हे महाबाहो । मेरा परम वचन सुन, जो तुझे अपने प्रिय (मित्र) को–मैं कहूंगा, (तेरे) हित की इच्छा से ।

१०.२ न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥

न मे विदुः सुरगणाः
प्रभवं न महर्षयः
अहम् आदिर् हि देवानां
महर्षीणां च सर्वशः

न मे विदुः सुरगणाः प्रभवम् न महर्षयः
अहम् आदिः हि देवानाम् महर्षीणाम् च सर्वशः

न देवता लोग जानते हैं मेरी उत्पत्ति को, न महर्षिगण । वास्तव में, मैं देवताओं और महर्षियों का आदि-आरम्भ हूं, सब प्रकार से ।

१०.३ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥

यो माम् अजम् अनादिं च - -
वेत्ति लोकमहेश्वरम्
असंमूढः स -मर्त्येषु - -
सर्वपापैः प्रमुच्यते

यः माम् अजम् अनादिम् च वेत्ति लोकमहेश्वरम्
असंमूढः सः मर्त्येषु सर्वपापैः प्रमुच्यते

जो मुझे अजन्मा अनादि और सब लोकों का परमेश्वर जानता है वह, मनुष्यों में मोह-भ्रम से रहित, सब पापों से मुक्त हो जाता है ।

१०.४ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥

बुद्धिर् ज्ञानम् असंमोहः
क्षमा सत्यं दमः शमः
सुखं दुःखं भवो (अ)भावो
भयं चा (अ)भयम् एव च - -

बुद्धिः ज्ञानम् असंमोहः क्षमा सत्यम् दमः शमः
सुखम् दुःखम् भवः अभावः भयम् च अभयम् एव च

बुद्धि, ज्ञान, मोह-भ्रम का अभाव, क्षमा, सत्य, इन्द्रिय निग्रह, मनःशान्ति, सुख-दुःख, उत्पत्ति और विनाश, भय, और अभय भी; और

१०.५ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥

अहिंसा समता तुष्टिस्
तपो दानम् यशो (अ)यशः
भवन्ति भावा भूतानां,
मत्त एव, पृथग्विधाः

अहिंसा समता तुष्टिः तपः दानम् यशः अयशः
भवन्ति भावाः भूतानाम् मत्तः एव पृथग्विधाः

अहिंसा समचित्तता, सन्तोष, तप, दान यश, अयश, ये जड़-चेतनादि के स्वभाव हैं, मुझ से ही उत्पन्न होते हैं, भिन्न-भिन्न हैं ।

१०.६ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥

महर्षयः सप्त पूर्वे
चत्वारो मनवस् तथा
मद्भावा मानसा जाता
येषाम् लोक इमाः प्रजाः

महर्षयः सप्त पूर्वे चत्वारः मनवः तथा
मद्भावाः मानसाः जाताः येषाम् लोके इमाः प्रजाः

सप्त महर्षि, उनसे पहले के चार (सनकादि) और (चौदह) मनु भी-(जो सब) मुझ में लीन रहते हैं- मेरे संकल्प से उत्पन्न हुए हैं और उनसे इस संसार के सब प्राणी ।

१०.७ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥

एतां विभूतिं योगं च - -
मम यो वेत्ति तत्त्वतः
सो (अ)विकम्पेन योगेन - -
युज्यते ना (अ)त्र संशयः

एताम् विभूतिम् योगम् च मम यः वेत्ति तत्त्वतः
सः अविकम्पेन योगेन युज्यते न अत्र संशयः

मेरी इस प्रभु सत्ता और योग को जो यथार्थ रूप से जानता है, वह अविचल योग से (मुझ में) तल्लीन हुआ रहता है । इस में सन्देह नहीं ।

१०.८ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥

अहं सर्वस्य प्रभवो
मत्तः सर्वं प्रवर्तते
इति मत्वा भजन्ते मां
बुधा भावसमन्विताः

अहम् सर्वस्य प्रभवः मत्तः सर्वम् प्रवर्तते
इति मत्वा भजन्ते माम् बुधाः भावसमन्विताः

मैं सब का उद्गम-स्रोत हूं। सब कुछ मुझ से विकसित है। ऐसा मान कर बुद्धिमान् लोग मेरा भजन करते हैं, भाव-विभोर हुए।

१०.९ मच्चितता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

मच्चित्ता मद्गतप्प्राणा
बोधयन्तः परस्परम्
कथयन्तश् च मां नित्यं
तुष्यन्ति च रमन्ति च - -

मच्चितताः मद्गतप्राणाः बोधयन्तः परस्परम्
कथयन्तः च माम् नित्यम् तुष्यन्ति च रमन्ति च

जिनका मन मुझ में लीन है, प्राण मुझ में हैं वे, एक दूसरे को समझाते और सदैव मेरा गुणगान करते हुए, संतुष्ट रहते हैं और आनन्दित होते हैं, और

**१०.१० तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥**

तेषां सततयुक्तानां
भजतां प्रीतिपूर्वकम्
ददामि बुद्धियोगं तं
येन माम् उपयान्ति ते

तेषाम् सततयुक्तानाम् भजताम् प्रीतिपूर्वकम्
ददामि बुद्धियोगम् तम् येन माम् उपयान्ति ते

उन सब को, जो निरन्तर लीन रहते हुए प्रेम पूर्वक भजन करने वाले हैं, मैं समत्व बुद्धि दे देता हूं जिसके द्वारा वे मुझको प्राप्त करते हैं ।

**१०.११ तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥**

तेषाम् एवा (अ)नुकम्पार्थम्
अहम् अज्ञानजं तमः
नाशयाम्य् आत्मभावस्थो,
ज्ञानदीपेन भास्वता

तेषाम् एव अनुकम्पार्थम् अहम् अज्ञानजम् तमः
नाशयामि आत्मभावस्थः ज्ञानदीपेन भास्वता

केवल उन पर दया करने के लिए मैं, (उनके) अज्ञान से उत्पन्न अन्धकार को नष्ट कर देता हूं, (उनके) अन्तःकरण में स्थित होकर, प्रकाश-मय ज्ञान दीप से ।

१०.१२ अर्जुन उवाच–
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥

परं ब्रह्म परं धाम – –
पवित्रं परमं भवान्
पुरुषं शाश्वतं दिव्यम्
आदिदेवम् अजं विभुम्

परम् ब्रह्म परम् धाम पवित्रम् परमम् भवान्
पुरुषम् शाश्वतम् दिव्यम् आदिदेवम् अजम् विभुम्

अर्जुन उवाच –
आप परम ब्रह्म हैं, परम धाम हैं, परम पवित्र हैं, सनातन दिव्य पुरुष हैं, आदिदेव, अजन्मा और सर्व व्यापी, (प्रभु) –

१०.१३ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥

आहुस् त्वाम् ऋषयः सर्वे
देवर्षिर् नारदस् तथा
असितो देवलो व्यासः,
स्वयं चै (ए)वब् ब्रवीषि मे

आहुः त्वाम् ऋषयः सर्वे देवर्षिः नारदः तथा
असितः देवलः व्यासः स्वयम् च एव ब्रवीषि मे

सब ऋषिगण (ऐसा ही) आप को कहते हैं – देवर्षि नारद, असित, देवल, व्यास और फिर स्वयं आप भी मुझ को (ऐसा ही) बतलाते हैं ।

१०.१४ सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥

सर्वम् एतद् ऋतं मन्ये
यन् मां वदसि केशव – –
न हि ते भगवन् व्यक्तिं
विदुर् देवा न दानवाः

सर्वम् एतत् ऋतम् मन्ये यत् माम् वदसि केशव
न हि ते भगवन् व्यक्तिम् विदुः देवाः न दानवाः

यह सब, जो आप मुझ से कहते हैं, मैं सच मानता हूं, केशव ! वास्तव में, हे भगवन् ! आपकी अभिव्यक्ति को न देवता जानते हैं, न दानव ।

१०.१५ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥

स्वयम् एवा (आ)त्मना (आ)त्मानं
वेत्थ त्वं पुरुषोत्तम – –
भूतभावन भूतेश – –
देवदेव जगत्पते

स्वयम् एव आत्मना आत्मानम् वेत्थ त्वम् पुरुषोत्तम
भूतभावन भूतेश देवदेव जगत्पते

आप स्वयं ही अपने को अपने द्वारा जानते हैं, पुरुषोत्तम ! हे जड़-चेतनादि की उत्पत्ति के कर्त्ता, हे भूतेश्वर, हे देवताओं के देव, हे जगत् स्वामिन् ।

१०.१६ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥

वक्तुम् अर्हस्य् अशेषेण - -
दिव्या ह्य् आत्मविभूतयः
याभिर् विभूतिभिर् लोकान्
इमांस् त्वं व्याप्य तिष्ठसि - -

वक्तुम् अर्हसि अशेषेण दिव्याः हि आत्मविभूतयः
याभिः विभूतिभिः लोकान् इमान् त्वम् व्याप्य तिष्ठसि

कृपाकर आप ही पूर्ण रूपसे बतलाइए अपनी दिव्य विभूतियों को, जिन विभूतियों के द्वारा आप इन सब लोकों में व्याप्त हुए रहते हैं ।

१०.१७ कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥

कथं विद्याम् अहं, योगिन्स्
त्वां सदा परिचिन्तयन्
केषु-केषु च भावेषु - -
चिन्त्यो (अ)सि भगवन् मया

कथम् विद्याम् अहम् योगिन् त्वाम् सदा परिचिन्तयन्
केषु केषु च भावेषु चिन्त्यः असि भगवन् मया

कैसे आप को मैं जानूँ, हे योगिन् ! सदा मनन चिन्तन करते हुए, और, किन किन रूपों-आकारों में आप का चिन्तन किया जा सकता है, भगवन्, मेरे द्वारा,

१०.१८ विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ॥

विस्तरेणा (आ)त्मनो योगं
विभूतिं च, जनार्दन - -
भूयः कथय तृप्तिर् हि - -
श्रृण्वतो ना (अ)स्ति मे (अ)मृतम्

विस्तरेण आत्मनः योगम् विभूतिम् च जनार्दन
भूयः कथय तृप्तिः हि श्रृण्वतः न अस्ति मे अमृतम्

विस्तार से अपना योग और विभूति, हे जनार्दन ! फिर कहिए । वास्तव में, मेरी तृप्ति नहीं होती, आप की अमृतवाणी सुनते, (सुनते) ।

१०.१९ श्रीभगवानुवाच -
हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥

हन्त ते कथयिष्यामि - -
दिव्या ह्य् आत्मविभूतयः
प्राधान्यतः, कुरुश्श्रेष्ठ, - -
ना (अ)स्त्य् अन्तो विस्तरस्य मे

हन्त ते कथयिष्यामि दिव्याः हि आत्मविभूतयः
प्राधान्यतः कुरुश्रेष्ठ न अस्ति अन्तः विस्तरस्य मे

श्रीभगवान् उवाच -
ठीक है । मैं तुझे, अपनी दिव्य विभूतियां बतलाऊँगा, जो मुख्य-मुख्य हैं, कुरुश्रेष्ठ ! (कारण), अन्त नहींहै , मेरे विस्तार का ।

१०.२० अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥

अहम् आत्मा, गुडाकेश, - - -
सर्वभूताशयस् स्थितः
अहम् आदिश् च मध्यं च - -
भूतानाम् अन्त एव च - -

अहम् आत्मा गुडाकेश सर्वभूताशयस्थितः
अहम् आदिः च मध्यम् च भूतानाम् अन्तः एव च

मैं आत्मा हूं, गुडाकेश, सब प्राणियों के हृदय में स्थित । और, मैं आदि और मध्य हूं जड़-चेतनादि का, और अन्त भी ।

१०.२१ आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥

आदित्यानाम् अहं विष्णुर्
ज्योतिषां रविर् अंशुमान
मरीचिर् मरुताम् अस्मि, - -
नक्षत्राणाम् अहं शशी

आदित्यानाम् अहम् विष्णुः ज्योतिषाम् रविः अंशुमान्
मरीचिः मरुताम् अस्मि नक्षत्राणाम् अहम् शशी

आदित्यों में मैं विष्णु[१] हूं, ज्योतियों में प्रकाशमान सूर्य, मरुतों में मरीचि मैं हूं, तारा-पुंजों में, मैं चन्द्रमा हूं ।

१. एक आदित्य का नाम

**१०.२२ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥**

वेदानां सामवेदो (अ)स्मि, - -
देवानाम् अस्मि वासवः
इन्द्रियाणां मनश् चा (अ)स्मि, - -
भूतानाम् अस्मि चेतना

वेदानाम् सामवेदः अस्मि देवानाम् अस्मि वासवः
इन्द्रियाणाम् मनः च अस्मि भूतानाम् अस्मि चेतना

वेदों में मैं सामवेद हूं, देवताओं में मैं वासव (इन्द्र) हूं, और इन्द्रियों में मैं मन हूं, प्राणियों में मैं चेतना हूं ।

**१०.२३ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥**

रुद्राणां शंकरश् चा (अ)स्मि, - -
वित्तेशो यक्षरक्षसाम्
वसूनां पावकश् चा (अ)स्मि, - -
मेरू शिखरिणाम् अहम्

रुद्राणाम् शंकरः च अस्मि वित्तेशः यक्षरक्षसाम्
वसूनाम् पावकः च अस्मि मेरुः शिखरिणाम् अहम्

और, रुद्रों में शंकर मैं हूं, यक्ष और राक्षसों में कुबेर, वसुओं में पावक (अग्नि) मैं हूं और मेरु हूं पर्वत-शिखाओं में, मैं ।

१०.२४ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥

पुरोधसां च मुख्यं मां
विद्धि, पार्थ, बृहस्पतिम्
सेनानीनाम् अहं स्कन्दः,
सरसाम् अस्मि सागरः

पुरोधसाम् च मुख्यम् माम् विद्धि पार्थ बृहस्पतिम्
सेनानीनाम् अहम् स्कन्दः सरसाम् अस्मि सागरः

और पुरोहितों में मुख्य, मुझे, पार्थ । तू बृहस्पति जान । सेनापतियों में मैं स्कन्द[२] हूं, सरोवरों में मैं सागर हूं ।

१०.२५ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥

महर्षीणां भृगुर् अहं,
गिराम् अस्म्य् एकम् अक्षरम्
यज्ञानां जपयज्ञो (अ)स्मि, - -
स्थावराणां हिमालयः

महर्षीणाम् भृगुः अहम् गिराम् अस्मि एकम् अक्षरम्
यज्ञानाम् जपयज्ञः अस्मि स्थावराणाम् हिमालयः

महर्षियों में भृगु मैं, वाणियों में मैं हूं एकाक्षर (ओम्), यज्ञों में जपयज्ञ मैं हूं, जो अचल हैं, उनमें हिमालय ।

२. कार्तिकेय

१०.२६ **अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।**
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥

अश्वत्थः सर्ववृक्षाणाम्
देवर्षीणां च नारदः
गन्धर्वाणां चित्ररथः,
सिद्धानां कपिलो मुनिः

अश्वत्थः सर्ववृक्षाणाम् देवर्षीणाम् च नारदः
गन्धर्वाणाम् चित्ररथः सिद्धानाम् कपिलः मुनिः

सब वृक्षों में पीपल और देवर्षियों में नारद, गन्धर्वों में चित्ररथ; जो सिद्ध हैं, उनमें कपिल मुनि ।

१०.२७ **उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।**
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥

उच्चैःश्रवसम् अश्वानां
विद्धि माम् अमृतोद्भवम्
ऐरावतं गजेन्द्राणां,
नराणां च नराधिपम्

उच्चैःश्रवसम् अश्वानाम् विद्धि माम् अमृतोद्भवम्
ऐरावतम् गजेन्द्राणाम् नराणाम् च नराधिपम्

घोड़ों में, अमृत मंथन के समय उत्पन्न हुआ उच्चैःश्रवा मुझे जान, हाथियों में ऐरावत और मनुष्यों में राजाधिराज ।

१०.२८ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥

आयुधानाम् अहं वज्रं,
धेनूनाम् अस्मि कामधुक्
प्रजनश् चा (अ)स्मि कन्दर्पः,
सर्पाणाम् अस्मि वासुकिः

आयुधानाम् अहम् वज्रम् धेनूनाम् अस्मि कामधुक्
प्रजनः च अस्मि कन्दर्पः सर्पाणाम् अस्मि वासुकिः

अस्त्रों में मैं वज्र, गायों में, मैं हूं कामधेनु । और, जन्म दाताओं में मैं कामदेव हूँ, सर्पो में मैं हूं वासुकि ।

१०.२९ अनन्तश्चास्मि नागानां वरूणो यादसामहम् ।
पितृणामर्यमा चास्मि यमः संयमतामहम् ॥

अनन्तश् चा (अ)स्मि नागानां,
वरूणो यादसाम् अहम्
पितृणाम् अर्यमा चा (अ)स्मि, - -
यमः संयमताम् अहम्

अनन्तः च अस्मि नागानाम् वरूणः यादसाम् अहम्
पितृणाम् अर्यमा च अस्मि यमः संयमताम् अहम्

और, शेषनाग हूं मैं, नागों में । जल-जन्तुओं में मैं वरूण और पितरों में अर्यमा[३] मैं हूं, शासकों में यम मैं (हूं) ।

३. पितरों के गणों में से एक, पितरों के देवता ।

१०.३० प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥

प्रह्लादश् चा (अ)स्मि दैत्यानां,
कालः कलयताम् अहम्
मृगाणां च मृगेन्द्रो (अ)हं,
वैनतेयश् च पक्षिणाम्

प्रह्लादः च अस्मि दैत्यानाम् कालः कलयताम् अहम्
मृगाणां च मृगेन्द्रः अहम् वैनतेयः च पक्षिणाम्

और प्रह्लाद मैं हूं दैत्यों में, गणना करने वालों में काल मैं हूं और पशुओं में सिंह मैं हूं, और पक्षियों में (हूं) गरुड़ ।

१०.३१ पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥

पवनः पवताम् अस्मि, - -
रामः शस्त्रभृताम् अहम्
झषाणां मकरश् चा (अ)स्मि, - -
स्रोतसाम् अस्मि, जाह्नवी

पवनः पवताम् अस्मि रामः शस्त्रभृताम् अहम्
झषाणाम् मकरः च अस्मि स्रोतसाम् अस्मि जाह्नवी

शुद्ध-स्वच्छ करने वालों में, पवन मैं हूं, शस्त्रधारियों में राम मैं हूं । और, मत्स्यों में घड़ियाल, मैं हूं । सरिताओं में मैं हूं, गंगा ।

१०.३२ सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥

सर्गाणाम् आदिर् अन्तश् च – –
मध्यं चै (ए)वा (अ)हम्, अर्जुन – –
अध्यात्मविद्या विद्यानां,
वादः प्रवदतामहम्

सर्गाणाम् आदिः अन्तः च मध्यम् च एव अहम् अर्जुन
अध्यात्मविद्या विद्यानाम् वादः प्रवदताम् अहम्

सृष्टियों का आदि, अन्त और मध्य भी, मैं हूं, अर्जुन । विद्याओं में अध्यात्मविद्या, परस्पर तर्क वितर्क करने वालों में वाद,[४] मैं (हूं) ।

१०.३३ अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥

अक्षराणाम् अकारो (अ)स्मि, – –
द्वन्द्वः सामासिकस्य च – –
अहम् एवा (अ)क्षयः कालो,
धाता (अ)हं विश्वतोमुखः

अक्षराणाम् अकारः अस्मि द्वन्द्वः सामासिकस्य च
अहम् एव अक्षयः कालः धाता अहम् विश्वतोमुखः

अक्षरों में "अ" मैं हूं और समासों में, द्वंद्व (समास)। मैं अविनाशी काल भी हूं । भरण पोषण करने वाला मैं हूं – सब ओर मुख किये ।

४. शास्त्रार्थ के तीन स्वरूप होते हैं – जल्प वितण्डा और वाद । उचित अनुचित का ध्यान न करते हुए अपने पक्ष का मण्डन और दूसरे का खन्डन – जल्प है । केवल दूसरे पक्ष का खन्डन वितण्डा है । जो तत्त्वनिर्णय के उद्देश्य से किया जाय, वह वाद है । सर्वश्रेष्ठ ।

१०.३४ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥

मृत्युः सर्वहरश् चा (अ)हम्
उद्भवश् च भविष्यताम्
कीर्तिः श्रीर् वाक् च नारीणां
स्मृतिर् मेधा धृतिः क्षामा

मृत्युः सर्वहरः च अहम् उद्भवः च भविष्यताम्
कीर्तिः श्रीः वाक् च नारीणाम् स्मृतिः मेधा धृतिः क्षमा

और मृत्यु, सब का संहार करने वाली, मैं हूं और उद्गम हूं, भविष्य में आने वालों का । और, स्त्रियों में कीर्ति, श्री, वाणी, स्मृति, बुद्धि, धृति और क्षमा[५] ।

१०.३५ बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥

बृहत्साम तथा साम्नां,
गायत्री छन्दसाम् अहम्
मासानां मार्गशीर्षो (अ)हम्
ऋतूनां कुसुमाकरः

बृहत्साम तथा साम्नाम् गायत्री छन्दसाम् अहम्
मासानाम् मार्गशीर्षः अहम् ऋतूनाम् कुसुमाकरः

और ऐसे ही, (गायन करने योग्य) स्तोत्रों में बृहत्साम,[६] छन्दों में गायत्री, मैं हूं । महीनों में मार्गशीर्ष मैं, ऋतुओं में बसन्त ।

५. वाणी, क्षमा, कीर्ति, श्री, स्मृति, बुद्धि और धृतिः वाणी सरस्वती हैं-ब्रह्मा जी की पुत्री; अन्य प्रजापति दक्ष की कन्याएं हैं । क्षमा का व्याह प्रजापति पुलह से हुआ और शेष पांचों का धर्म से । ये धर्म पत्नियां हैं । ब्रह्माजी ने इनको धर्म का द्वार निश्चित किया है , अर्थात् इन के द्वारा धर्म में प्रवेश होता है । देखिए महाभारत आदि पर्व अध्याय ६६ श्लोक १४-१५ । यहां गीता में भगवान् इन देवियों को अपनी विभूतियां कह रहे हैं।

६. सामवेद में एक गीत विशेष जिसके द्वारा इन्द्र की स्तुति गाई जाती है।

**१०.३६ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥**

द्यूतं छलयताम् अस्मि, - -
तेजस् तेजस्विनाम् अहम्
जयो (अ)स्मि, व्यवसायो (अ)स्मि, - -
सत्त्वं सत्त्ववताम् अहम्

द्यूतम् छलयताम् अस्मि तेजः तेजस्विनाम् अहम्
जयः अस्मि व्यवसायः अस्मि सत्त्वम् सत्त्ववताम् अहम्

छलियों-कपटियों में, जुआ मैं हूं । तेजस्वियों का, तेज मैं हूं । विजय मैं हूं, दृढ संकल्प मैं हूं । सत्त्वगुण वालों का, सात्त्विकभाव मैं हूं ।

**१०.३७ वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥**

वृष्णीनां वासुदेवो (अ)स्मि, - -
पाण्डवानां धनंजयः
मुनीनाम् अप्य् अहं व्यासः,
कवीनाम् उशना कविः

वृष्णीनाम् वासुदेवः अस्मि पाण्डवानाम् धनंजयः
मुनीनाम् अपि अहम् व्यासः कवीनाम् उशना कविः

यादवों में, मैं वासुदेव हूं ; पाण्डवों में धनंजय । मुनियों में भी, मैं व्यास हूं । कवियों में उशना [७] कवि ।

७ (शुक्राचार्य)

१०.३८ दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥

दण्डो दमयताम् अस्मि, - -
नीतिर् अस्मि जिगीषताम्
मौनं चै (ए)वा (अ)स्मि गुह्यानां,
ज्ञानं ज्ञानवताम् अहम्

दण्डः दमयताम् अस्मि नीतिः अस्मि जिगीषताम्
मौनम् च एव अस्मि गुह्यानाम् ज्ञानम् ज्ञानवताम् अहम्

दण्ड देने वालों (राजाओं) का राजदण्ड मैं हूं । विजय की अभिलाषा करने वालों में, मैं नीति हूं और गोपनीय बातों में, मौन भी मैं हूं । ज्ञानियों का ज्ञान, हूं मैं ।

१०.३९ यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥

यच् चा (अ)पि सर्वभूतानां
बीजं तद् अहम् अर्जुन - -
न तद् अस्ति विना यत् स्यान्
मया भूतं चराचरम्

यत् च अपि सर्वभूतानाम् बीजम् तत् अहम् अर्जुन
न तत् अस्ति विना यत् स्यात् मया भूतम् चराचरम्

और जो भी, सब जड़-चेतनादि का बीज है, वह मैं हूं, अर्जुन । न ऐसा कुछ है, जो मेरे बिना रह सके, जड़-जंगम :अस्तित्व में ।

१०.४० नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥

ना (अ)न्तो (अ)स्ति मम दिव्यानां
विभूतीनां, परंतप – –
एष तू (उ)द्देशतः प्रोक्तो
विभूतेर् विस्तरो मया

न अन्तः अस्ति मम दिव्यानाम् विभूतीनाम् परंतप
एषः तु उद्देशतः प्रोक्तः विभूतेः विस्तरः मया

अन्त नहीं है मेरी दिव्य विभूतियों का, परन्तप । वास्तव में, दृष्टान्त रूप से कहा गया है, विभूतियों का यह विस्तार, मेरे द्वारा ।

१०.४१ यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥

यद् यद् विभूतिमत् सत्त्वं
श्रीमद् ऊर्जितम् एव वा
तत् तद् एवा (अ)वगच्छत् त्वं,
मम तेजों (अं)श संभवम्

यत् यत् विभूतिमत् सत्त्वम् श्रीमत् ऊर्जितम् एव वा
तत् तत् एव अवगच्छ त्वम् मम तेजोंऽशसंभवम्

जो जो अस्तित्व वैभवमय, समृद्धि पूर्ण, और शक्तिशाली भी है, उस उस को तू ऐसा मान ले कि वह मेरे ही तेज के अंश से उत्पन्न है ।

**१०.४२ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥**

अथवा बहुनै (ए)तेन - -
किं ज्ञातेन तवा (अ)र्जुन - -
विष्टभ्या (अ)हम् इदं कृत्स्नम्
एकांशेन स्थितो जगत्

अथवा बहुना एतेन किम् ज्ञातेन तव अर्जुन
विष्टभ्य अहम् इदम् कृत्स्नम् एकांशेन स्थितः जगत्

पर इस विस्तृत ज्ञान से, तुझे क्या, अर्जुन ? इस संपूर्ण जगत् को अपने एक अंश से ही व्याप्त करके, मैं स्थित हूं ।

श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे
हरे राम हरे राम राम राम हरे हरे

परिचय-११

भगवान् की उत्पत्ति को कोई नहीं जानता न देवता, न दानव। वह केवल अपनी विभूतियों द्वारा ही जाने जा सकते हैं, जिनका वर्णन अध्याय १० में हुआ।

फिर अर्जुन ने कहा, "परमेश्वर, मैं देखना चाहता हूं जैसा आप अपने को कहते हैं – आप के ईश्वरीय स्वरूप को"।

इसके लिए भगवान् उसे दिव्य चक्षु प्रदान करते हैं कि वह विश्व रूप के दर्शन कर सके।

विश्वरूप की स्तुति, और दर्शन का वर्णन श्लोक १५ से ४६ तक है।

अध्याय ११ का नाम है "विश्व रूप दर्शन योग"।

श्रीमद्भगवद् गीता

अथ एकादशोऽध्यायः

(श्रीकृष्णार्जुनसंवादेविश्वरूपदर्शनयोगः)

११.१ अर्जुन उवाच-

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥

मदनुग्रहाय परमं
गुह्यम् अध्यात्मसंज्ञितम्
यत् त्वयो (उ)क्तं वचस् तेन - -
मोहो (अ)यं विगतो मम - -

मदनुग्रहाय परमम् गुह्यम् अध्यात्मसंज्ञितम्
यत् त्वया उक्तम् वचः तेन मोहः अयम् विगतः मम

अर्जुन उवाच -
मुझ पर दया करके जो परम गोपनीय, अध्यात्म सम्बंधी वचन आपने कहा, उससे मेरा यह मोह दूर हो गया है ।

११.२ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥

भवाप्ययौ हि भूतानां
श्रुतौ विस्तरशो मया
त्वत्तः, कमलपत्राक्ष, - -
माहात्म्यम् अपि चा (अ)व्ययम्

भवाप्ययौ हि भूतानाम् श्रुतौ विस्तरशः मया
त्वत्तः कमलपत्राक्ष माहात्म्यम् अपि च अव्ययम्

वास्तव में, सब जड़-चेतनादि की उत्पत्ति और विनाश को विस्तार से मैंने सुना है आपसे, हे कमलनेत्र ! और, आप की अविनाशी महिमा को भी ।

११.३ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥

एवम् एतद् यथा (आ)त्थत् त्वम्
आत्मानं, परमेश्वर - -
द्रष्टुम् इच्छामि ते रूपम्
ऐश्वरं, पुरुषोत्तम - -

एवम् एतत् यथा आत्थ त्वम् आत्मानम् परमेश्वर
द्रष्टुम् इच्छामि ते रूपम् ऐश्वरम् पुरुषोत्तम

इस प्रकार, यह जैसा आप अपने को कहते हैं, परमेश्वर, मैं देखना चाहता हूं,-आपके उसी ईश्वरीय स्वरूप को, पुरुषोत्तम !

११.४ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥

मन्यसे यदि तच् छक्यं
मया द्रष्टुम् इतिप् प्रभो
योगेश्वर, ततो मे त्वं
दर्शया (आ)त्मानम् अव्ययम्

मन्यसे यदि तत् शक्यम् मया द्रष्टुम् इति प्रभो
योगेश्वर ततः मे त्वम् दर्शय आत्मानम् अव्ययम्

यदि प्रभो आप समझते हैं मेरे द्वारा उस (स्वरूप) को इस प्रकार देखना सम्भव है, तब हे योगेश्वर । आप मुझे दिखलाइए, अपना अविनाशी (रूप) ।

११.५ श्रीभगवानुवाच-
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥

पश्य मे, पार्थ, रूपाणि - -
शतशो (अ)थ सहस्रशः
नानाविधानि दिव्यानि - -
नानावर्णाकृतीनि च - -

पश्य मे पार्थ रूपाणि शतशः अथ सहस्रशः
नानाविधानि दिव्यानि नानावर्णाकृतीनि च

श्री भगवान् उवाच-
पार्थ । देख मेरे सैंकड़ों और सहस्रों रूप - नाना प्रकार के, दिव्य, भिन्न भिन्न रंग और आकृति के ।

११.६ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥

पश्या (आ)दित्यान् वसून् रुद्रान्
अश्विनौ मरुतस् तथा
बहून्य् अदृष्ट पूर्वाणि - -
पश्या (आ)श्चर्याणि भारत - -

पश्य आदित्यान् वसून् रुद्रान् अश्विनौ मरुतः तथा
बहूनि अदृष्टपूर्वाणि पश्य आश्चर्याणि भारत

देख । (बारह) आदित्य, (आठ) वसु, (ग्यारह) रुद्र, (दोनों) अश्विनीकुमार और (उनचास) मरुत् । बहुत से, पहले न देखे हुए चमत्कार देख, भारत ।

११.७ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥

इहै (ए)कस्थं जगत् कृत्स्नं
पश्या (अ)द्य सचराचरम्
मम देहे, गुडाकेश, - -
यच् चा (अ)न्यद् द्रष्टुम् इच्छसि - -

इह एकस्थम् जगत् कृत्स्नम् पश्य अद्य सचराचरम्
मम देहे गुडाकेश यत् च अन्यत् द्रष्टुम् इच्छसि

यहां (मुझ) एक ही में स्थित सम्पूर्ण चल और अचल जगत् को, एक साथ तू आज देख, मेरी देह में, गुडाकेश । और जो कुछ भी तू देखना चाहता है, (देख) ।

११.८ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥

न तु माम् शक्यसे द्रष्टुम्
अनेनै (ए)वस् स्वचक्षुषा
दिव्यम् ददामि ते चक्षुः
पश्य मे योगम् ऐश्वरम्

न तु माम् शक्यसे द्रष्टुम् अनेन एव स्वचक्षुषा
दिव्यम् ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्

वास्तव में, अपनी इन आंखों से मुझे देखना भी, तेरे लिए सम्भव नहीं। मैं तुझे दिव्य चक्षु देता हूं, देख मेरे ईश्वरीय योग को ।

११.९ संजय उवाच-
एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥

एवम् उक्त्वा ततो राजन्,
महायोगेश्वरो हरिः
दर्शयामास पार्थाय - -
परमं रूपम् ऐश्वरम्

एवम् उक्त्वा ततः राजन् महायोगेश्वरः हरिः
दर्शयामास पार्थाय परमम् रूपम् ऐश्वरम्

संजय उवाच -
यह कह कर, हे राजन् ! तब महान् योगेश्वर हरि ने दिखलाया, पार्थ को, अपना परम ईश्वरीय रूप-

११.१० अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् * ॥

अनेक वक्त्र नयनम्
अनेकाद् भुतदर्शनम्
अनेक दिव्याभरणम्,
दिव्यानेको द्यतायुधम्

अ ने क व क्त्र न य न म् अ ने का द् भु त द र्श न म्
अ ने क दि व्या भ र णा म् दि व्या ने को द्य ता यु ध म्

(जिसमें) अनेक मुख और नेत्र हैं, अनेक अद्भुत झांकियां हैं, नाना प्रकार के दिव्य आभूषण हैं, बहुत से ईश्वरीय शस्त्र उठे हुए हैं, -

११.११ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥

दिव्यमाल्याम्बरधरं,
दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवम्
अनन्तं विश्वतोमुखम्

दि व्य मा ल्या म्ब र ध र म् दि व्य ग न्धा नु ले प न म्
स र्वा श्च र्य म य म् दे व म् अ न न्त म् वि श्व तो मु ख म्

(और जो) दिव्य मालाएं और वस्त्र पहने, दिव्य गन्धमय लेप युक्त, सर्व चमत्कारों से पूर्ण, देवता, अनन्त, सब ओर मुख किए है।

* विश्व-रूपका वर्णन इस श्लोक से आरम्भ हो रहा है। यह दृश्य इतना भव्य है कि शब्दों में उतारा नहीं जा सकता। श्लोकों की विषय भाषा, मानों यही कह रही है - डा. राधा कृष्णन्।

११.८ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥

न तु माम् शक्यसे द्रष्टुम्
अनेनै (ए)वस् स्वचक्षुषा
दिव्यम् ददामि ते चक्षुः
पश्य मे योगम्म् ऐश्वरम्

न तु माम् शक्यसे द्रष्टुम् अनेन एव स्वचक्षुषा
दिव्यम् ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्

वास्तव में, अपनी इन आंखों से मुझे देखना भी, तेरे लिए सम्भव नहीं। मैं तुझे दिव्य चक्षु देता हूं, देख मेरे ईश्वरीय योग को ।

११.९ संजय उवाच-
एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥

एवम् उक्त्वा ततो राजन्,
महायोगेश्वरो हरिः
दर्शयामास पार्थाय - -
परमं रूपम् ऐश्वरम्

एवम् उक्त्वा ततः राजन् महायोगेश्वरः हरिः
दर्शयामास पार्थाय परमम् रूपम् ऐश्वरम्

संजय उवाच -
यह कह कर, हे राजन् ! तब महान् योगेश्वर हरि ने दिखलाया, पार्थ को, अपना परम ईश्वरीय रूप-

११.१० अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् * ॥

अनेक वक्त्र नयनम्
अनेकाद् भुतदर्शनम्
अनेक दिव्याभरणम्,
दिव्यानेको द्यतायुधम्

अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम्
अनेकदिव्याभरणाम् दिव्यानेकोद्यतायुधम्

(जिसमें) अनेक मुख और नेत्र हैं, अनेक अद्भुत झांकियां हैं, नाना प्रकार के दिव्य आभूषण हैं, बहुत से ईश्वरीय शस्त्र उठे हुए हैं, -

११.११ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥

दिव्यमाल्याम्बरधरं,
दिव्यगन्धानुलेपनम्,
सर्वाश्चर्यमयं देवम्
अनन्तं विश्वतोमुखम्

दिव्यमाल्याम्बरधरम् दिव्यगन्धानुलेपनम्
सर्वाश्चर्यमयम् देवम् अनन्तम् विश्वतोमुखम्

(और जो) दिव्य मालाएं और वस्त्र पहने, दिव्य गन्धमय लेप युक्त, सर्व चमत्कारों से पूर्ण, देवता, अनन्त, सब ओर मुख किए है ।

* विश्व-रूपका वर्णन इस श्लोक से आरम्भ हो रहा है। यह दृश्य इतना भव्य है कि शब्दों में उतारा नहीं जा सकता । श्लोकों की विषय भाषा, मानों यही कह रही है - डा. राधा कृष्णन् ।

११.१२ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥

दिवि सूर्यसहस्रस्य - -
भवेद् युगपद् उत्थिता
यदि भाः, सदृशी सा स्याद्
भासस् तस्य महात्मनः

दिवि सूर्यसहस्रस्य भवेत् युगपत् उत्थिता
यदि भाः सदृशी सा स्यात् भासः तस्य महात्मनः

आकाश में सहस्रों सूर्यों का प्रकाश यदि एक साथ फूट पड़े, सम्भव है, वह समान हो सके, ज्योति के, उस महात्मा की ।

११.१३ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥

तत्रै (ए)कस्थं जगत् कृत्स्नं
प्रविभक्तम् अनेकधा
अपश्यद् देवदेवस्य - -
शरीरे पाण्डवस् तदा

तत्र एकस्थम् जगत् कृत्स्नम् प्रविभक्तम् अनेकधा
अपश्यत् देवदेवस्य शरीरे पाण्डवः तदा

वहां (उस) एक ही में स्थित, सम्पूर्ण जगत् को, नाना प्रकार से विभाजित हुआ, देखा - देवाधिदेव के शरीर में, पाण्डव ने तब ।

११.१४ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥

ततः स विस्मयाविष्टो
हृष्टरोमा धनंजयः
प्रणम्य शिरसा देवं
कृताञ्जलिर् अभाषत - -

ततः सः विस्मयाविष्टः हृष्टरोमा धनंजयः
प्रणम्य शिरसा देवम् कृताञ्जलिः अभाषत

तब वह आश्चर्य से भरा, रोमांचित हुआ, धनंजय, हाथ जोड़, सिर झुका, देव को प्रणाम कर बोला -

११.१५ अर्जुन उवाच-
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थं
ऋषींश्च सर्वानुरगांश्च दिव्यान् ॥

पश्यामि देवांस् तव, देव, देहे,
सर्वांस् तथा भूतविशेषसंघान्
ब्रह्माणम् ईशं कमलासनस्थम्
ऋषींश् च सर्वान् उरगांश् च दिव्यान्

पश्यामि देवान् तव देव देहे सर्वान् तथा भूतविशेषसंघान्
ब्रह्माणम् ईशम् कमलासनस्थम् ऋषीन् च सर्वान् उरगान् च दिव्यान्

अर्जुन उवाच-
हे देव ! मैं आपकी देह में देखता हूं, देवताओं को, तथा नाना प्रकार के जड़-चेतनादि के समस्त समुदायों को, कमलासन पर स्थित भगवान् ब्रह्मा को, और ऋषियों को, और सब सर्पों को, जो दिव्य हैं ।

११.१६ अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतो (अ)नन्तरूपम्
ना(अ)न्तं न मध्यं न पुनस् तवा (आ)दिं
पश्यामि, विश्वेश्वर, विश्वरूप – –

अनेकबाहूदरवक्त्रनेत्रम् पश्यामि त्वाम् सर्वतः अनन्तरूपम्
न अन्तम् न मध्यम् न पुनः तव आदिम् पश्यामि विश्वेश्वर विश्वरूप

अनेक भुजाएं, उदर, मुख, नेत्र, मैं देखता हूं, सब ओर आपका अनन्त रूप । न अन्त, न मध्य और फिर न आपका आदि–आरम्भ, देखता हूं । हे विश्वेश्वर ! हे विश्वरूप !

११.१७ किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम् ॥

किरीटिनं गदिनं चक्रिणं च, – –
तेजोराशिं सर्वतो दीप्तिमन्तम्
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद् ,
दीप्तानलार्कद् द्युतिम् अप्रमेयम्

किरीटिनम् गदिनम् चक्रिणम् च तेजोराशिम् सर्वतः दीप्तिमन्तम्
पश्यामि त्वाम् दुर्निरीक्ष्यम् समन्तात् दीप्तानलार्कद्युतिम् अप्रमेयम्

मुकुट गदा और चक्र सहित, प्रकाश पुंज, सर्वत्र जगमगाते हुए आपको देख रहा हूं ; आखें चौंधिया रही हैं । सब ओर से प्रज्वलित अग्नि और सूर्य के समान प्रकाश है, अमित अपार ।

११.१८ त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥

त्वम् अक्षरं परमं वेदितव्यं,
त्वम् अस्य विश्वस्य परं निधानम्
त्वम् अव्ययः शाश्वतधर्मगोप्ता
सनातनस् त्वं पुरुषो मतो मे

त्वम् अक्षरम् परमम् वेदितव्यम् त्वम् अस्य विश्वस्य परम् निधानम्
त्वम् अव्ययः शाश्वतधर्मगोप्ता सनातनः त्वम् पुरुषः मतः मे

आप अक्षय हैं, सर्वोपरि जानने योग्य हैं। इस जगत् के आप ही सर्वश्रेष्ठ आधार हैं। आप अविनाशी हैं, शाश्वत धर्म के संरक्षक हैं। सनातन पुरुष आप ही हैं, मेरे विचार में।

११.१९ अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥

अनादिमध्यान्तम् अनन्तवीर्यम् ,
अनन्तबाहुं शशिसूर्यनेत्रम्
पश्यामि त्वां दीप्तहुताशवक्त्रं,
स्वतेजसा विश्वम् इदं तपन्तम्

अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुम् शशिसूर्यनेत्रम्
पश्यामि त्वाम् दीप्तहुताशवक्त्रम् स्वतेजसा विश्वम् इदम् तपन्तम्

(आपका) न आदि है, न मध्य, न अन्त। आप असीम शक्तिशाली हैं, असंख्य भुजाएं हैं। शशि और सूर्य आपके नेत्र हैं। मैं देखता हूं आपका मुख प्रज्वलित अग्नि सा है। आप अपने तेज से इस विश्व को तपा रहे हैं।

११. २० द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन् ॥

द्यावापृथिव् व्योर् इदम् अन्तरं हि – –
व्याप्तं त्वयै (ए)केन दिशश् च सर्वाः
दृष्ट्वा (अ)द्भुतं रूपम् उग्रं तवे (इ)दं
लोकत्त्रयं प्रव्यथितं महात्मन्

द्यावापृथिव्योः इदम् अन्तरम् हि व्याप्तम् त्वया एकेन दिशः च सर्वाः
दृष्ट्वा अद्भुतम् रूपम् उग्रम् तव इदम् लोकत्रयम् प्रव्यथितम् महात्मन्

वास्तव में, आकाश पृथ्वी के बीच यह अंतराल और सब दिशाएं, अकेले आप से व्याप्त हैं । आपके इस अद्भुत भयंकर रूप को देख कर तीनों लोक प्रकंपित हो रहे हैं, महात्मन् !

११. २१ अमी हि त्वां सुरसंघा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥

अमी हि त्वां सुरसंघा विशन्ति – –
केचिद् भीताः प्राञ्जलयो गृणन्ति – –
स्वस्ती (इ)त्य् उक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः

अमी हि त्वाम् सुरसंघाः विशन्ति केचित् भीताः प्राञ्जलयः गृणन्ति
स्वस्ति इति उक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वाम् स्तुतिभिः पुष्कलाभिः

(यह देखो) ये देवताओं के समुदाय आप में ही प्रवेश कर रहे हैं । कई भयभीत हुए, हाथ जोड़कर आपका गुणगान कर रहे हैं । इसी प्रकार महर्षियों और सिद्धों के समूह "स्वस्ति" कहते हुए आपका यशोगान कर रहे हैं, स्तोत्रों द्वारा, गूंजते हुए ।

११.२२ रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥

रुद्रादित्या वसवो ये च साध्या
विश्वे (अ)श्विनौ मरुतश् चो (ऊ)ष्मपाश् च - -
गन्धर्व यक्षासुरसिद्धसंघा,
वीक्षान्ते त्वां विस्मिताश् चै (ए)व सर्वे

रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्वयक्षासुरसिद्धसंघाः वीक्षन्ते त्वाम् विस्मिताः च एव सर्वे

ये (ग्यारह) रुद्र, (बारह) आदित्य (आठ) वसु और साध्यगण, विश्वेदेव (अग्नि), दोनों अश्विनीकुमार, और (उनचास) मरुत् और ऊष्मपा पितरगण, गन्धर्व, यक्ष, असुर और सिद्धों के समूह, आपको देख रहे हैं, आश्चर्यचकित होकर, और भी, सब

११.२३ रूपं महतते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरूपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥

रूपं महत् ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरूपादम्
बहूदरं बहुदंष्ट्राकरालं,
दृष्ट्वा लोकाः प्रव्यथितास् तथा (अ)हम्

रूपम् महत् ते बहुवक्त्रनेत्रम् महाबाहो बहुबाहूरूपादम् बहूदरम् बहुदंष्ट्राकरालम् दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम्

हे महाबाहो । आपका विशाल आकार देखकर- जिसमें अनेक मुख और नेत्र हैं, अनेक भुजाएं, जंघाएं और पैर हैं, अनेकों उदर हैं, अनेकों विकराल दन्त हैं,- सब लोक भयभीत हैं, और मैं भी ।

११. २४ नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥

नभःस्पृशं दीप्तम् अनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम्
दृष्ट्वा हि त्वां, प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च, विष्णो

नभःस्पृशम् दीप्तम् अनेकवर्णम् व्यात्ताननम् दीप्तविशालनेत्रम्
दृष्ट्वा हि त्वाम् प्रव्यथितान्तरात्मा धृतिम् न विन्दामि शमम् च विष्णो

आकाश को छूते, अनेक रंगों में जगमगाते, खुले मुंह और विशाल तेजस्वी नेत्रों वाले, आपको देख कर मेरा मन सचमुच कांप रहा है । मैं धैर्य और शान्ति नहीं पा रहा हूं, हे विष्णो ।

११. २५ दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥

दंष्ट्राकरालानि च ते मुखानि - -
दृष्ट्वै (ए)व कालानलसन्निभानि - -
दिशो न जाने न लभे च शर्म, - -
प्रसीद, देवेश, जगन्निवास - -

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वा एव कालानलसन्निभानि
दिशः न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास

और, आपके विकराल दाँतो वाले मुख को देख कर, जो कालाग्नि के ही समान है, मुझे दिशाएं नहींजान पड़तीं और न आश्रय मिलता है । (अब) प्रसन्न होइए । हे देवेश । हे जगन्निवास ।

११. २६ अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे, सहै (ए)वा (अ)वनिपालसंघैः
भीष्मो द्रोणः सूतपुत्रस् तथा (अ)सौ,
सहा (अ)स्मदीयैर् अपि योधमुख्यैः

अमी च त्वाम् धृतराष्ट्रस्य पुत्राः सर्वे सह एव अवनिपालसंघैः
भीष्मः द्रोणः सूतपुत्रः तथा असौ सह अस्मदीयैः अपि योधमुख्यैः

ये धृतराष्ट्र के पुत्र और साथ में सब राजाओं के समुदाय भी, भीष्म, द्रोण तथा सूतपुत्र (कर्ण) और साथ में अपनी ओर के मुख्य योद्धा भी,

११. २७ वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥

वक्त्राणि ते त्वरमाणा विशन्ति, - -
दंष्ट्राकरालानि भयानकानि - -
केचिद् विलग्ना दशनान्तरेषु - -
संदृश्यन्ते चूर्णितैर् उत्तमांगैः

वक्त्राणि ते त्वरमाणाः विशन्ति दंष्ट्राकरालानि भयानकानि
केचित् विलग्नाः दशनान्तरेषु संदृश्यन्ते चूर्णितैः उत्तमांगैः

उतावले हुए, आप के भयानक विकराल दन्तों वाले मुख में प्रवेश कर रहे हैं । कोई दांतों के बीच चिपके हुए दिखाई देते हैं, चूरचूर हुए शिरों साथ ।

११. २८ यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥

यथा नदीनां बहवो (अ)म्बुवेगाः
समुद्रम् एवा (अ)भिमुखा द्रवन्ति – –
तथा तवा (अ)मी नरलोकवीरा
विशन्ति वक्त्राण्य् अभिविज्ज्वलन्ति – –

यथा नदीनाम् बहवः अम्बुवेगाः समुद्रम् एव अभिमुखाः द्रवन्ति
तथा तव अमी नरलोकवीराः विशन्ति वक्त्राणि अभिविज्ज्वलन्ति

जिस प्रकार नदियों की अनेक प्रचण्ड धाराएं एक मात्र समुद्र की ओर दौड़ती हैं, वैसे ही ये मनुष्य लोक के वीर पुरुष प्रवेश कर रहे हैं आपके मुखों में, धधकती लपटों वाले ।

११. २९ यथा प्रदीप्तं ज्वलनं पतंगा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका–
स्तवापि वक्त्राणि समृद्धवेगाः ॥

यथा प्रदीप्तं ज्वलनं पतंगा
विशन्ति नाशाय समृद्धवेगाः
तथै (ए)व नाशाय विशन्ति लोकास्
तवा (अ)पि वक्त्राणि समृद्धवेगाः

यथा प्रदीप्तम् ज्वलनम् पतंगा विशन्ति नाशाय समृद्धवेगाः
तथा एव नाशाय विशन्ति लोकाः तव अपि वक्त्राणि समृद्धवेगाः

जैसे पतंगे धधकती लौ में द्रुतगति से प्रवेश करते हैं, नष्ट होने के लिए, उसी प्रकार ये लोग भी, एक मात्र नष्ट होने के लिए, आप के मुखों में प्रवेश करते हैं; बढ़ते हुए वेग से ।

११.३० लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥

लेलिह्यसे ग्रसमानः समन्ताल्
लोकान् समग्रान् वदनैर् ज्वलद्भिः
तेजोभिर् आपूर्य जगत् समग्रम्
भासस् तवो (उ)ग्राः प्रतपन्ति, विष्णो

लेलिह्यसे ग्रसमानः समन्तात् लोकान् समग्रान् वदनैः ज्वलद्भिः
तेजोभिः आपूर्य जगत् समग्रम् भासः तव उग्राः प्रतपन्ति विष्णो

अपने जलते हुए मुखों द्वारा सम्पूर्ण लोकों को निगलते हुए, आप (उन्हें) सब ओर से चाट रहे हैं। सम्पूर्ण जगत् को अपने तेज से भरकर आप का उग्र प्रकाश, (उसे) पूर्णतः तपा रहा है, हे विष्णो ।

११.३१ आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥

आख्याहि मे को भवान् उग्ररूपो
नमो (अ)स्तु ते देववरप्, प्रसीद - -
विज्ञातुम् इच्छामि भवन्तम् आद्यं
न हिप् प्रजानामि तवप् प्रवृतितम्

आख्याहि मे कः भवान् उग्ररूपः नमः अस्तु ते देववर प्रसीद
विज्ञातुम् इच्छामि भवन्तम् आद्यम् न हि प्रजानामि तव प्रवृत्तिम्

मुझे बतलाइए आप भयंकर रूपवाले कौन हैं ? आप को नमस्कार हैं । हे देववर ! प्रसन्न होइए । मैं जानना चाहता हूं, आप के आदि रूप को । सच में, मैं नहीजानता, आप की चेष्टाओं को ।

११.३२ श्रीभगवानुवाच-
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥

कालो (अ)स्मि लोकक् क्षयकृत् प्रवृद्धो
लोकान् समाहर्तुम् इहप् प्रवृत्तः
ऋते (अ)पि त्वाम् न भविष्यन्ति सर्वे
ये (अ)वस्थिताः प्रत्य् अनीकेषु योधाः

कालः अस्मि लोकक्षयकृत् प्रवृद्धः लोकान् समाहर्तुम इह प्रवृत्तः
ऋते अपि त्वाम् न भविष्यन्ति सर्वे ये अवस्थिताः प्रत्यनीकेषु योधाः

श्रीभगवान् उवाच -
मैं विशाल काल हूं । लोकों का नाश करने वाला ।
लोकों का संहार करने के लिए, यहां प्रकट हुआ हूं ।
बिना तेरे (युद्ध किए) भी, भविष्य में नहीं होंगे-
ये सब, जो प्रतिद्वंद्वी सेनाओं में खड़े हैं, योद्धागण ।

११.३३ तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥

तस्मात् त्वम् उत्तिष्ठ, यशो लभस्व, - -
जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम्
मयै (ए)वै (ए)ते निहताः पूर्वम् एव, - -
निमित्तमात्रं भव, सव्यसाचिन्

तस्मात् त्वम् उत्तिष्ठ यशः लभस्व जित्वा शत्रून् भुंक्ष्व राज्यम् समृद्धम्
मया एव एते निहताः पूर्वम् एव निमित्तमात्रम् भव सव्यसाचिन्

अतएव तू उठ, यश प्राप्त कर । शत्रुओं को जीत कर
धन-धान्य से सम्पन्न राज्य को भोग । ये तो मेरे
ही द्वारा, पहले ही मार डाले गए हैं । तू निमित्तमात्र
बन, सव्यसाची ।

११.३४ द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥

द्रोणं च भीष्मं च जयद्रथं च,- -
कर्णंतथा (अ)न्यान् अपि योधवीरान्
मया हतान्स् त्वं जहि, मा व्यथिष्ठा,
युध्यस्व, जेतासि रणे सपत्नान्

द्रोणम् च भीष्मम् च जयद्रथम् च कर्णम् तथा अन्यान् अपि योधवीरान्
मया हतान् त्वम् जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान्

द्रोण और भीष्म और जयद्रथ और कर्ण, इस प्रकार अन्य योद्धाओं को भी, (जो) मेरे द्वारा मारे जा चुके हैं, तू मार डाल । दुःखी मत हो । युद्ध कर । तू जीत लेगा रण में, शत्रुओं को ।

११.३५ संजय उवाच-
एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥

एतच् छ्रुत्वा वचनं केशवस्य, - -
कृताञ्जलिर् वेपमानः किरीटी
नमस्कृत्वा भूय एवा (आ)ह कृष्णं,
सगद्गदं भीतभीतः प्रणम्य - -

एतत् श्रुत्वा वचनम् केशवस्य कृताञ्जलिः वेपमानः किरीटी
नमस्कृत्वा भूयः एव आह कृष्णम् सगद्गदम् भीतभीतः प्रणम्य

संजय उवाच -
केशव के ये वचन सुनकर, हाथ जोड़ कांपते हुए किरीटधारी (अर्जुन) ने नमस्कार करके कृष्ण को ही फिर कहा, - रुद्ध कण्ठ से, भयभीत हुए, प्रणाम करके-

११. ३६ अर्जुन उवाच-
स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ॥

स्थाने, हृषीकेश, तवप् प्रकीर्त्या
जगत् प्रहृष्यत्य् अनुरज्यते च - -
रक्षांसि भीतानि दिशो द्रवन्ति - -
सर्वे नमस्यन्ति च सिद्धसंघाः

स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च
रक्षांसि भीतानि दिशः द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः

अर्जुन उवाच -
यह उचित है, हृषीकेश ! कि संसार आपके गुणों का कीर्तन करके आनन्द मनाता है, और प्रसन्न होता है। राक्षस भयभीत हुए हर दिशा में भाग रहे हैं और, सब (आप को) नमस्कार कर रहें हैं, सिद्धों के समुदाय ।

११. ३७ कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥

कस्माच् च ते न नमेरन्, महात्मन्
गीरयसे ब्रह्मणो (अ)प्य् आदिकर्त्रे
अनन्त देवेश जगन्निवास, - -
त्वम् अक्षरं सद् असत् तत्परं यत्

कस्मात् च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणः अपि आदिकर्त्रे
अनन्त देवेश जगन्निवास त्वम् अक्षरम् सत् असत् तत्परम् यत्

और क्यों न वे नमस्कार करें, हे महात्मन् ! आप को । जो ब्रह्मा से भी श्रेष्ठ हैं, आदिकर्ता हैं । हे अनन्त ! हे देवेश ! हे जगन्निवास ! आप अविनाशी हैं, सत् हैं, असत् हैं; और जो इन से परे है, (आप हैं) ।

११. ३८ त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥

त्वम् आदिदेवः पुरुषः पुराणस्
त्वम् अस्य विश्वस्य परं निधानम्
वेत्ता (अ)सि वेद्यं च परं च धाम, - -
त्वया ततं विश्वम् अनन्तरूप - -

त्वम् आदिदेवः पुरुषः पुराणः त्वम् अस्य विश्वस्य परम् निधानम्
वेत्ता असि वेद्यम् च परम् च धाम त्वया ततम् विश्वम् अनन्तरूप

आप आदिदेव हैं । पुरुष पुरातन हैं । इस विश्व के सर्वोपरि आश्रय आप हैं । आप ज्ञाता हैं, ज्ञेय हैं और परम धाम हैं । विश्व आप से व्याप्त है, हे अनन्तरूप !

११. ३९ वायुर्यमोऽग्निर्वरुणः शशांकः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥

वायुर् यमो (अ)ग्निर् वरुणः शशांकः
प्रजापतिस् त्वं प्रपितामहश् च - -
नमो नमस् ते (अ)स्तु सहस्रकृत्वः
पुनश् च भूयो (अ)पि नमो नमस् ते

वायुः यमः अग्निः वरुणः शशांकः प्रजापतिः त्वम् प्रपितामहः च
नमः नमः ते अस्तु सहस्रकृत्वः पुनः च भूयः अपि नमः नमः ते

आप वायु , यम, अग्नि, वरुण, चन्द्र और प्रजापति हैं । आप पितामह (ब्रह्मा के भी पिता) हैं, आप को नमस्कार है, सहस्रों बार नमस्कार है । और फिर नमस्कार है, फिर नमस्कार है, आप को ।

११.४० नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ॥

नमः पुरस्ताद् अथ पृष्ठतस् ते
नमो (अ)स्तु ते सर्वत एव, सर्व - -
अनन्तवीर्या (अ)मितविक्रमस् त्वं
सर्वसमाप्नोषि ततो (अ)सि सर्वः

नमः पुरस्तात् अथ पृष्ठतः ते नमः अस्तु ते सर्वतः एव सर्व
अनन्तवीर्य अमितविक्रमः त्वम् सर्वम् समाप्नोषि ततः असि सर्वः

अब आप को आगे की ओर से नमस्कार है, पीछे की ओर से, और सब ओर से भी नमस्कार है, हे सर्वरूप। हे अनन्तवीर्य, आप की शक्ति असीम है, आप सब में व्याप्त हैं, अतः आप ही सब-कुछ हैं[१] -

११.४१ सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥

सखे (इ)ति मत्वा प्रसभं यद् उक्तं
हे कृष्ण, हे यादव, हे सखे (इ)ति - -
अजानता महिमानं तवे (इ)दं
मया प्रमादात् प्रणयेन वा (अ)पि - -

सखा इति मत्वा प्रसभम् यत् उक्तम् हे कृष्ण हे यादव हे सखे इति
अजानता महिमानम् तव इदम् मया प्रमादात् प्रणयेन वा अपि

"सखा" ऐसा मानकर, दुराग्रहपूर्वक जो मैंने कहा "हे-कृष्ण" "हे यादव" "हे सखे", यह आपकी इस महिमा को न जानते हुए, मेरे द्वारा असावधानी, अथवा स्नेह से ही, (कहा गया)

१. यह भाव बारबार देहराया गया है

११.४२ यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥

यच् चा (अ)वहासार्थम् असत्कृतो (अ)सि - -
विहारशय्यासनभोजनेषु - -
एको (अ)थवा (अ)प्य् अच्युत, तत्समक्षं,
तत् क्षामये त्वाम् अहम् अप्रमेयम्

यत् च अवहासार्थम् असत्कृतः असि विहारशय्यासनभोजनेषु
एकः अथवा अपि अच्युत तत्समक्षम् तत् क्षामये त्वाम् अहम् अप्रमेयम्

और, जो हासपरिहास में आप का असम्मान हुआ है,- आमोद-प्रमोद में, विश्राम करते, बैठते, भोजन करते अकेले अथवा किसी के सामने,- हे अच्युत, उसके लिए मैं आप से क्षमा की विनती करता हूं, हे अमित-अपार !

११.४३ पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ॥

पिता (अ)सि लोकस्य चराचरस्य - -
त्वम् अस्य, पूज्यश्च गुरुर् गरीयान्
न त्वत् समो (अ)स्त्य् अभ्यधिकः कुतो (अ)न्यो,
लोकत्रये (अ)प्य् अप्प्रतिमप्प्रभाव - -

पिता असि लोकस्य चराचरस्य त्वम् अस्य पूज्यः च गुरुः गरीयान्
न त्वत्समः अस्ति अभ्यधिकः कुतः अन्यः लोकत्रये अपि अप्रतिमप्रभाव

आप पिता हैं, इस चर और अचर जगत् के । आप इसके पूज्य हैं, गुरु हैं और उससे भी बढ़कर हैं । आप के समान कोई नहीं है । फिर दूसरा, और बढ़कर कहां से होगा, तीनों लोकों में भी । हे अनुपम प्रभाववाले ।

११.४४ तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥

तस्मात् प्रणम्यप् प्रणिधाय कायं
प्रसादये त्वाम् अहम् ईशम् ईड्यम्
पिते (इ)व पुत्रस्य सखे (इ)व सख्युः
प्रियः प्रियाया (अ)र्हसि देव सोढुम्

तस्मात् प्रणम्य प्रणिधाय कायम् प्रसादये त्वाम् अहम् ईशम् ईड्यम्
पिता इव पुत्रस्य सखा इव सख्युः प्रियः प्रियायाः अर्हसि देव सोढुम्

इसलिए साष्टांग दण्डवत् करके, शरीर झुकाकर, मैं आप वन्दनीय ईश्वर को, प्रसन्न होने की प्रार्थना करता हूं । जैसे पिता पुत्र के, मित्र मित्र के, प्रेमी प्रिया के, उसी प्रकार हे देव । आप मेरे (व्यवहार) सहन कीजिए ।

११.४५ अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥

अदृष्टपूर्वंहृषितो (अ)स्मि दृष्ट्वा
भयेन चप् प्रव्यथितं मनो मे
तद् एव मे दर्शय देव, रूपं,
प्रसीद, देवेश, जगन्निवास - -

अदृष्टपूर्वम् हृषितः अस्मि दृष्ट्वा भयेन च प्रव्यथितम् मनः मे
तत् एव मे दर्शय देव रूपम् प्रसीद देवेश जगन्निवास

पहले न देखे हुए (विश्व रूप) को देखकर मैं प्रसन्न हूं ; पर भय से मेरा मन व्यथित है । हे देव ! मुझे उस (पहले) रूप को ही दिखलाइए । प्रसन्न होइए । हे देवेश, हे जगन्निवास ।

११.४६ किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥

किरीटिनं गदिनं चक्रहस्तम्
इच्छामि त्वां द्रष्टुम् अहं तथै (ए)व - -
तेनै (ए)व रूपेण चतुर्भुजेन - -
सहस्रबाहो, भव विश्वमूर्ते

किरीटिनम् गदिनम् चक्रहस्तम् इच्छामि त्वाम् द्रष्टुम् अहम् तथा एव तेन एव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते

मैं देखना चाहता हूँ आपको, उसी प्रकार (पहले रूप में) मुकुट धारण किए, गदा लिए, हाथ में चक्र भी वही चतुर्भुज रूप हो जाइए । हे सहस्रबाहो, हे विश्वमूर्ते ।

११.४७ श्रीभगवानुवाच-
मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥

मया प्रसन्नेन तवा (अ)र्जुने (इ)दं
रूपं परं दर्शितम् आत्मयोगात्
तेजोमयं विश्वम् अनन्तम् आद्यं
यन् मे त्वदन्येन न दृष्टपूर्वम्

मया प्रसन्नेन तव अर्जुन इदम् रूपम् परम् दर्शितम् आत्मयोगात् तेजोमयम् विश्वम् अनन्तम् आद्यम् यत् मे त्वदन्येन न दृष्टपूर्वम्

श्री भगवान् उवाच -
मैंने प्रसन्न होकर तुझे, अर्जुन ! यह परम श्रेष्ठ रूप दिखलाया है अपने योगबल से - तेजोमय, विश्वव्यापी, अनन्त, (और) आदि का । जो मेरा रूप तूने देखा है, पहले किसी ने नहीं (देखा) ।

११.४८ न वेदयज्ञाध्ययनैर्न दानै-
न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥

न वेदयज्ञाध्ययनैर्, न दानैर्
न चक् क्रियाभिर् न तपोभिर् उग्रैः
एवं रूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन, कुरुप्प्रवीर – –

न वेदयज्ञाध्ययनैः न दानैः न च क्रियाभिः न तपोभिः उग्रैः
एवं रूपः शक्यः अहम् नृलोके द्रष्टुम् त्वदन्येन कुरुप्रवीर

न वेद पढ़कर, न यज्ञ करके, न अध्ययन द्वारा, न दान देकर, न क्रियाओं द्वारा, और न भीषण तप करके, सम्भव है मनुष्य लोक में मुझे इस रूप में देखना किसी का, तेरे अतिरिक्त, कुरुप्रवीर !

११.४९ मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरम् ईदृङ् ममे (इ)दम्
व्यपेतभीः प्रीतमनाः पुनस् त्वं
तद् एव मे रूपम् इदं प्रपश्य – –

मा ते व्यथा मा च विमूढभावः दृष्ट्वा रूपम् घोरम् ईदृक् मम इदम्
व्यपेतभीः प्रीतमनाः पुनः त्वम् तत् एव मे रूपम् इदम् प्रपश्य

तू व्याकुल मत हो, और भ्रम में मत पड़- मेरे ऐसे, इस भयंकर रूप को देख कर। भय रहित हो, प्रसन्न मन से मेरा यह वही रूप तू देख।

११.५० संजय उवाच–
इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥

इत्य् अर्जुनं वासुदेवस् तथो (उ)क्त्वा,
स्वकं रूपं दर्शयामास भूयः
आश्वासयामास च भीतम् एनं
भूत्वा पुनः सौम्यवपुर् महात्मा

इति अर्जुनम् वासुदेवः तथा उक्त्वा स्वकम् रूपम् दर्शयामास भूयः
आश्वासयामास च भीतम् एनम् भूत्वा पुनः सौम्यवपुः महात्मा

संजय उवाच–
इस प्रकार अर्जुन को ऐसा कह कर वासुदेव ने फिर अपना (पहलेवाला) रूप दिखलाया । और, धीरज बँधाया उस भयभीत हुए को, फिर शान्त स्वरूप होकर, महात्मा ने ।

अर्जुन उवाच–
११.५१ **दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।**
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥

दृष्ट्वे (इ)दं मानुषं रूपं
तव सौम्यं जनार्दन - -
इदानीम् अस्मि संवृत्तः
सचेताः प्रकृतिं गतः

दृष्ट्वा इदम् मानुषम् रूपम् तव सौम्यम् जनार्दन
इदानीम् अस्मि संवृत्तः सचेताः प्रकृतिम् गतः

अर्जुन उवाच–
आपके इस मानवीय सौम्य रूप को देख कर, हे जनार्दन ! मैं अब सचेत हो गया हूं, सामान्य स्थिति में आ गया हूं ।

११.५२ श्रीभगवानुवाच-
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥

सुदुर् दर्शम् इदं रूपं
दृष्टवान् असि यन् मम - -
देवा अप्य् अस्य रूपस्य - -
नित्यं दर्शनकांक्षिणः

सुदुर्दर्शम् इदम् रूपम् दृष्टवानसि यत् मम
देवाः अपि अस्य रूपस्य नित्यम् दर्शनकांक्षिणः

श्री भगवान् उवाच-
अति कठिन है, मेरे इस स्वरूप को देखना, जिसे तूने देखा है- देवता लोग भी इस स्वरूप के दर्शन को, सदैव इच्छुक रहते हैं ।

११.५३ नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

ना (अ)हं वेदैर् न तपसा
न दानेन न चे (इ)ज्यया
शक्य एवं विधो द्रष्टुं,
दृष्टवान् असि मां यथा

न अहम् वेदैः न तपसा न दानेन न च इज्यया
शक्यः एवंविधः द्रष्टुम् दृष्टवान् असि माम् यथा

न वेद पढ़ने से, न तप करने से, न दान देने से और न यज्ञ करने से सम्भव है, इस प्रकार देखना, जैसा तूने मुझे देखा है ।

**११.५४ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥**

भक्त्या त्व् अनन्यया शक्य - -
अहम् एवं विधो (अ)र्जुन - -
ज्ञातुं द्रष्टुं च तत्त्वेन - -
प्रवेष्टुं च, परंतप - -

भक्त्या तु अनन्यया शक्यः अहम् एवंविधः अर्जुन
ज्ञातुम् द्रष्टुम् च तत्त्वेन प्रवेष्टुम् च परंतप

परन्तु, अर्जुन । अनन्य भक्ति द्वारा संभव है, इस प्रकार यथार्थ रूप मे मुझे जानना, देखना और मुझ में समा जाना । परंतप ।

**११.५५ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥**

मत्कर्मकृन् मत्परमो
मद्भक्तः संग वर्जितः
निर्वैरः सर्वभूतेषु - -
यः स माम् एति, पाण्डव - -

मत्कर्मकृत् मत्परमः मद्भक्तः संगवर्जितः
निर्वैरः सर्वभूतेषु यः सः माम् एति पाण्डव

जो मेरे निमित्त काम करता है, मैं जिसके लिए सर्वश्रेष्ठ हूं, जो मेरा भक्त है. आसक्ति से मुक्त है, सम्पूर्ण प्राणियों के प्रति द्वेष रहित है, वह मुझे पा जाता है; पाण्डव !

श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः
समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे
हरे राम हरे राम राम राम हरे हरे

परिचय-१२

अध्याय ९ में परम गोपनीय राजविद्या का ज्ञान देकर भगवान् अर्जुन से कहते हैं - "तू निश्चित रूप से जान, मेरा भक्त, जो भी हो, जैसा भी हो, कभी नष्ट नहीं होता।"

अध्याय ११ में विश्वरूप दर्शाने के बाद भगवान् फिर कहते हैं - "मुझे इस प्रकार देख लेना कदापि सम्भव नहीं है- न वेद पढ़ने से, न तप करने से और न यज्ञ करने से ही। परन्तु, अर्जुन, अनन्य भक्ति द्वारा यह सम्भव है - यथार्थ रूप से मुझे जानना, देखना और मुझ में समा जाना"।

अध्याय १२ में ऐसी भक्ति की विधियों का वर्णन है- नाम है: "भक्ति योग"।

श्रीमद्भगवद् गीता

अथ द्वादशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे भक्तियोगः)

अर्जुन उवाच–

**१२.१ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥**

एवं सततयुक्ता ये
भक्तास् त्वां पर्युपासते
ये चा (अ)प्य् अक्षरम् अव्यक्तं,
तेषाम् के योगवित्तमाः

एवम् सततयुक्ताः ये भक्ताः त्वाम् पर्युपासते
ये च अपि अक्षरम् अव्यक्तम् तेषाम् के योगवित्तमाः

अर्जुन उवाच–
इस प्रकार जो भक्त गण सदैव लीन हुए आप की उपासना करते हैं, और (वे)जो अप्रत्यक्ष अविनाशी की ही (उपासना करते हैं), उनमें से कौन योग-(ज्ञान) श्रेष्ठ हैं ।

१२.२ **श्रीभगवानुवाच-**
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥

मय्य् आवेश्य मनो ये मां
नित्ययुक्ता उपासते
श्रद्धया परयो (उ)पेतास्
ते मे युक्ततमा मताः

मयि आवेश्य मनः ये माम् नित्ययुक्ताः उपासते
श्रद्धया परया उपेताः ते मे युक्ततमाः मताः

श्री भगवान् उवाच-
जो मुझमें मन स्थिर करके नित्य लीन हुए मेरी उपासना करते हैं, परम श्रद्धा से युक्त-वे योग में लीन रहने वालों में श्रेष्ठ हैं, मेरे विचार में ।

१२.३ **ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।**
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥

ये त्व् अक्षरम् अनिर्देश्यम्
अव्यक्तम् पर्युपासते
सर्वत्रगम् अचिन्त्यं च - -
कूटस्थम् अचलं ध्रुवम्

ये तु अक्षरम् अनिर्देश्यम् अव्यक्तम् पर्युपासते
सर्वत्रगम् अचिन्त्यम् च कूटस्थम् अचलम् ध्रुवम्

परन्तु, जो अविनाशी, अनिर्वचनीय, अप्रत्यक्ष, सर्वव्यापी, अकल्पनीय, और दृढ-स्थिर अचल, अटल की उपासना करते हैं, (और)

१२.४ **संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।**
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥

संनियम्ये (इ)न्द्रियग्रामं,
सर्वत्र समबुद्धयः
ते प्राप्नुवन्ति माम् एव, --
सर्वभूतहिते रताः

संनियम्य इन्द्रियग्रामम् सर्वत्र समबुद्धयः
ते प्राप्नुवन्ति माम् एव सर्वभूतहिते रताः

जो सम्पूर्ण इन्द्रियों को वश में करके, सर्वत्र सम बुद्धि रखते हैं, वे भी मुझे प्राप्त कर लेते हैं–प्राणिमात्र के कल्याण में लीन, (रहते हुए) (पर)

१२.५ **क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।**
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

क्लेशो (अ)धिकतरस् तेषाम्
अव्यक्तासक्तचेतसाम्
अव्यक्ता हि गतिर् दुःखं
देहवद्भिर् अवाप्यते

क्लेशः अधिकतरः तेषाम् अव्यक्तासक्तचेतसाम्
अव्यक्ता हि गतिः दुःखम् देहवद्भिः अवाप्यते

उनको अधिक कष्ट होता है जिनका चित्त अप्रत्यक्ष में लगा है । वास्तव में, अप्रत्यक्ष की राह कठिन है, देहधारी द्वारा पा लेना ।

१२.६ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥

ये तु सर्वाणि कर्माणि – –
मयि संन्यस्य, मत्पराः
अनन्येनै (ए)व योगेन – –
मां ध्यायन्त उपासते

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः
अनन्येन एव योगेन माम् ध्यायन्तः उपासते

सच में, जो समस्त कर्मों को मुझ पर छोड़कर, मुझ में दत्तचित्त हुए, एकनिष्ठ योग द्वारा मेरा ही चिंतन करते हुए, उपासना करते हैं --

१२.७ तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥

तेषाम् अहं समुद्धर्ता
मृत्युसंसारसागरात्
भवामि न चिरात्, पार्थ, – –
मय्य् आवेशितचेतसाम्

तेषाम् अहम् समुद्धर्ता मृत्युसंसारसागरात्
भवामि न चिरात् पार्थ मयि आवेशितचेतसाम्

उनका मैं, मृत्युमय संसार सागर से, बिना विलम्ब उद्धार करता हूं, पार्थ । मुझ में जिनका चित्त स्थिर है ।

**१२.८ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥**

मय्य् एव मन आधत्स्व, - -
मयि बुद्धिं निवेशय - -
निवसिष्यसि मय्य् एव - -
अत ऊर्ध्वं न संशयः

मयि एव मनः आधत्स्व मयि बुद्धिम् निवेशय
निवसिष्यसि मयि एव अतः ऊर्ध्वम् न संशयः

(अपना) मन केवल मुझ में लगा । (अपनी) बुद्धि मुझ में स्थिर कर । तदुपरान्त तू मुझ में ही निवास करेगा, इसमें संशय नहीं ।

**१२.९ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥**

अथ चित्तं समाधातुं
न शक्नोषि मयि स्थिरम्
अभ्यासयोगेन ततो
माम् इच्छा (आ)प्तुं, धनंजय - -

अथ चित्तम् समाधातुम् न शक्नोषि मयि स्थिरम्
अभ्यासयोगेन ततः माम् इच्छ आप्तुम् धनंजय

यदि तू अपना मन मुझ में नहीं लगा सकता, स्थिरता से, तो अभ्यास योग द्वारा मुझे पाने की इच्छा कर, धनंजय ।

१२.१० अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥

अभ्यासे (अ)प्य् असमर्थो (अ)सि, - -
मत्कर्मपरमो भव - -
मदर्थम् अपि कर्माणि - -
कुर्वन् सिद्धिम् अवाप्स्यसि - -

अभ्यासे अपि असमर्थः असि मत्कर्मपरमः भव
मदर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि

यदि अभ्यास में भी तू असमर्थ है तो मेरे लिए किए कर्म ही, तेरे लिए सर्वोपरि हों । मेरे लिए कर्म करते हुए भी, तू सिद्धि को प्राप्त होगा ।

१२.११ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥

अथै (ए)तद् अप्य् अशक्तो (अ)सि - -
कर्तुं मद्योगम् आश्रितः
सर्व कर्म फलत्त्यागं
ततः कुरु यतात्मवान्

अथ एतत् अपि अशक्तः असि कर्तुम् मद्योगम् आश्रितः
सर्वकर्मफलत्यागम् ततः कुरुयतात्मवान्

यदि यह भी करने में तू असमर्थ है, तो मेरे योग का आश्रय लेते हुए, सब कर्म-फल त्याग दे, अपने को वश में किए हुए ।

१२.१२ श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥

श्रेयो हि ज्ञानम् अभ्यासाज्
ज्ञानाद् ध्यानं विशिष्यते
ध्यानात् कर्मफलत्यागस्
त्यागाच् छान्तिर् अनन्तरम्

श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् विशिष्यते
ध्यानात् कर्मफलत्यागः त्यागात् शान्तिः अनन्तरम्

वास्तव में ज्ञान श्रेष्ठ है- अभ्यास से । ज्ञान से - ध्यान उत्कृष्ट है, (और) ध्यान से, कर्मफलत्याग । (ऐसे) त्याग से, तत्काल शान्ति (मिलती है) ।

१२.१३ अद्वेष्टा सर्वभूतानां मैत्रः करूण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥

अद्द्वेष्टा सर्वभूतानां
मैत्रः करूण एव च - -
निर्ममो निरहंकारः
समदुःखसुखः क्षमी

अद्वेष्टा सर्वभूतानाम् मैत्रः करुणः एव च
निर्ममः निरहंकारः समदुःखसुखः क्षामी

जो सब जड़-चेतनादि के प्रति द्वेषरहित, हितैषी और दयालु भी है, ममत्व रहित, अहंकार रहित, दुःख सुख में समान, क्षमावान् है, --

१२.१४ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥

संतुष्टः सततं योगी
यतात्मा दृढनिश्चयः
मय्य् अर्पितमनोबुद्धिर्
यो मद्भक्तः स मे प्रियः

संतुष्टः सततम् योगी यतात्मा दृढनिश्चयः
मयि अर्पितमनोबुद्धिः यः मद्भक्तः सः मे प्रियः

निरन्तर संतोषी है जो योगी, जिसने अपने को वश में किया है, जिसका निश्चय दृढ है, जिसने मन और बुद्धि को मुझ में लगा दिया है, वह मेरा भक्त, मुझे प्रिय है ।

१२.१५ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥

यस्मान् नो (उ)द्विजते लोको,
लोकान् नो (उ)द्विजते च यः
हर्षामर्ष भयोद्वेगैर्
मुक्तो, यः स च मे प्रियः

यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः
हर्षामर्षभयोद्वेगैः मुक्तः यः सः च मे प्रियः

जिससे संसार को कष्ट नहींहोता और जो (स्वयं) संसार से व्याकुल नहीं, और जो हर्ष, क्रोध, और भय की आकुलता से मुक्त है, वह मुझे प्रिय है ।

**१२.१६ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥**

अनपेक्षः शुचिर् दक्ष – –
उदासीनो गतव्व्यथः
सर्वारम्भपरित्त्यागी,
यो मद्भक्तः स मे प्रियः

अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः
सर्वारम्भपरित्यागी यः मद् भक्तः सः मे प्रियः

जिसे कोई चाह नहीं,जो पवित्र है, कार्यकुशल है, विरक्त है, जिसका दुःखदर्द दूर हो गया है, जिसने सब (सकाम) कार्यारम्भ छोड़ दिए हैं, वह मेरा भक्त मुझे प्रिय है ।

**१२.१७ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥**

यो न हृष्यति नद् द्वेष्टि – –
न शोचति न कांक्षति – –
शुभाशुभपरित्त्यागी
भक्तिमान्, यः स मे प्रियः

यः न हृष्यति न द्वेष्टि न शोचति न कांक्षति
शुभाशुभपरित्यागी भक्तिमान् यः सः मे प्रियः

जो न हर्षित होता है, न द्वेष करता है, न शोक करता है, न लालसा, जिसने शुभ अशुभ को त्याग दिया है, जो भक्तिमय है, वह मुझे प्रिय है ।

**१२.१८ समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः संग विवर्जितः ॥**

समः शत्रौ च मित्रे च, - -
तथा मानापमानयोः
शीतोष्णसुखदुःखेषु - -
समः, संग विवर्जितः

समः शत्रौ च मित्रे च तथा मानापमानयोः
शीतोष्णसुखदुःखेषु समः संग विवर्जितः

शत्रु और मित्र में एक भाव (रखनेवाला) और उसी प्रकार मान और अपमान में, सर्दी में, गर्मी में, सुख में और दुःख में, एक समान, आसक्ति से मुक्त, --

**१२.१९ तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥**

तुल्यनिन्दास्तुतिर् मौनी,
संतुष्टो येन केनचित्
अनिकेतः स्थिरमतिर्
भक्तिमान् मे प्रियो नरः

तुल्यनिन्दास्तुतिः मौनी संतुष्टः येन केनचित्
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियः नरः

जिसे निन्दा और स्तुति एक सी हैं, जिसने मौन धारण किया है, जो, जो कुछ मिल जाए उसमें संतुष्ट है, जो एक स्थान से बंधा नहीं, जिसकी बुद्धि स्थिर है, जो भक्तिमय है, वह पुरुष मुझे प्रिय है ।

**१२.२० ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥**

ये तु धर्म्यामृतम् इदं
यथोक्तं पर्युपासते
श्रद्धधाना मत्परमा
भक्तास् ते (अ)तीव मे प्रियाः

ये तु धर्म्यामृतम् इदम् यथा उक्तम् पर्युपासते
श्रद्दधानाः मत्परमाः भक्ताः ते अतीव मे प्रियाः

वास्तव में, जो धर्मप्राप्य इस अमृत (ज्ञान) की, उक्त कथनानुसार[१] उपासना करते हैं,- श्रद्धा से परिपूर्ण, मुझे सर्वोपरि जानते हुए,- वे भक्त लोग मुझे अत्यन्त प्रिय हैं।

श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः समाप्तः

१. जैसा ऊपर श्लोक १३-१९ में कहा है

परिचय-१३

अध्याय ७ में भगवान् ने कहा कि मैं तुझे ज्ञान की बात विज्ञान सहित बतलाऊंगा। यह बात अध्याय ७, ८ और ९ में क्रमशः बतलाई गई। पर यह क्रम अध्याय १०. ११ और १२ में टूट गया। अब अध्याय १३ में इसे फिर आरम्भ करते हैं। यह ज्ञान वार्ता की धारा आगे पन्द्रहवें अध्याय तक चलती है - प्रत्येक अध्याय मानों इस ज्ञान का एक विभाग है।

अध्याय ७ में भगवान् ने अपनी दो प्रकार की प्रकृति की बात कही - जड़ात्मिका और चैतन्यात्मिका। चैतन्यात्मिका श्रेष्ठ है, प्राणियों का जीवन है। इसे यहां 'पुरुष कहा है। यह 'पुरुष' और (जड़ात्मिका) प्रकृति दोनों अनादि हैं। सत्त्व, रज और तम तीन प्रकृति के ही गुण हैं।

अध्याय ११ में विश्व रूप दर्शन के द्वारा अर्जुन ने प्रत्यक्ष अनुभव किया कि परमेश्वर सम्पूर्ण ब्रह्माण्ड में व्याप्त है। अब क्षेत्र क्षेत्रज्ञ विचार द्वारा बतलाते हैं कि मनुष्य के शरीर में भी वही परमेश्वर-पुरुष -निवास करता है। जो कुछ भी उत्पन्न होता है, वह क्षेत्र क्षेत्रज्ञ के संयोग से है।

अध्याय १३ का नाम है - "क्षेत्र क्षेत्रज्ञ विभाग योग"।

श्रीमद्भगवद् गीता

अथ त्रयोदशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगः)

१३.० * अर्जुन उवाच-

प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥

प्रकृतिं पुरुषं चै (ए)व, - -
क्षेत्रं क्षेत्रज्ञम् एव च - -
एतद् वेदितुम् इच्छामि - -,
ज्ञानं ज्ञेयं च, केशव - -

प्रकृतिं पुरुषं च एव क्षेत्रम् क्षेत्रज्ञम् एव च
एतत् वेदितुम् इच्छामि ज्ञानं ज्ञेयं च केशव

अर्जुन उवाच-
प्रकृति और पुरुष भी, क्षेत्र और क्षेत्रज्ञ भी, ज्ञान और ज्ञेय, मैं ये जानना चाहता हूं, केशव !

* यह श्लोक कई गीता-संस्करणों में नही दिया रहता । इसे मिला कर कुल ७०१ श्लोक हो जाते हैं जब कि गीता में कुल ७०० श्लोक ही माने जाते हैं । अतः यह गणना में नहीलिया जाता ।

१३.१ श्री भगवानुवाच-
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥

इदं शरीरं, कौन्तेय, - -
क्षेत्रम् इत्य् (अ)भिधीयते
एतद् यो वेत्ति तं प्राहुः
क्षेत्रज्ञ इति तद्विदः

इदम् शरीरम् कौन्तेय क्षेत्रम् इति अभिधीयते
एतत् यः वेत्ति तम् प्राहुः क्षेत्रज्ञः इति तत् विदः

श्री भगवान् उवाच-
यह शरीर, कौन्तेय, क्षेत्र है, ऐसा कहा जाता है ।
जो इसे जानता है उसे, क्षेत्रज्ञ,- ऐसा कहते हैं,
(क्षेत्र-क्षेत्रज्ञ विषयक ज्ञान को) जानने वाले ।

१३.२ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥

क्षेत्रज्ञं चा (अ)पि मां विद्धि - -
सर्वक्क्षेत्रेषु, भारत - -
क्षेत्रक्क्षेत्रज्ञयोर् ज्ञानं
यत् तज् ज्ञानं मतं मम - -

क्षेत्रज्ञम् च अपि माम् विद्धि सर्वक्षेत्रेषु भारत
क्षेत्रक्षेत्रज्ञयोः ज्ञानम् यत् तत् ज्ञानम् मतम् मम

और तू मुझे ही क्षेत्रज्ञ समझ, समस्त क्षेत्रों में,
भारत ! क्षेत्र क्षेत्रज्ञ का जो ज्ञान है, वही ज्ञान है,
मेरे मत में ।

१३.३ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥

तत् क्षेत्रं यच् च यादृक् च, - -
यद्विकारि यतश् च यत्
स च यो यत्प्रभावश् च, - -
तत् समासेन मे शृणु- -

तत् क्षेत्रम् यत् च यादृक् च यद्विकारि यतः च यत्
सः च यः यत्प्रभावः च तत् समासेन मे शृणु

वह क्षेत्र क्या है, और किस प्रकार का है, और उसके रूपान्तर क्या हैं, और वह कहाँ से (उत्पन्न) है; और, वह (क्षेत्रज्ञ) क्या है, और, उसका प्रभाव क्या है, यह (सब) तू मुझसे, संक्षेप में सुन ।

१३.४ ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥

ऋषिभिर् बहुधा गीतं
छन्दोभिर् विविधैः पृथक्
ब्रह्मसूत्रपदैश् चै (ए)व - -
हेतुमद्भिर् विनिश्चितैः

ऋषिभिः बहुधा गीतम् छन्दोभिः विविधैः पृथक्
ब्रह्मसूत्रपदैः च एव हेतुमद्भिः विनिश्चितैः

ऋषियों ने (इसे) अनेक प्रकार से गाया है - विविध छन्दों द्वारा, भिन्न भिन्न रीति से और ब्रह्मसूत्र के पदों में भी, जो तर्क संगत हैं, निर्णायक ।

**१३.५ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥**

महाभूतान्य् अहंकारो,
बुद्धिर् अव्यक्तम् एव च - -
इन्द्रियाणि दशै (ए)कं च, - -
पञ्च चे (इ)न्द्रियगोचराः

महाभूतानि अहंकारः बुद्धिः अव्यक्तम् एव च
इन्द्रियाणि दश एकम् च पञ्च च इन्द्रियगोचराः

(पंच) महाभूत, अहंकार, बुद्धि और अव्यक्त (प्रकृति) भी, इन्द्रियां दस और एक, (मन) और इन्द्रियों के पांच विषय;

**१३.६ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥**

इच्छा द्वेषः सुखं दुःखं,
संघातश् चेतना धृतिः
एतत् क्षेत्रं समासेन - -
सविकारम् उदाहृतम्

इच्छा द्वेषः सुखम् दुःखम् संघातः चेतना धृतिः
एतत् क्षेत्रम् समासेन सविकारम् उदाहृतम्

इच्छा, द्वेष, सुख, दुख, संघटित शरीर, चेतना, धैर्य, ये (सब) संक्षेप में, क्षेत्र कहलाते हैं-विकारों सहित ।

**१३.७ अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥**

अमानित्वम् अदम्भित्वम्
अहिंसा क्षान्तिर् आर्जवम्
आचार्योपासनं शौचं
स्थैर्यम् आत्मविनिग्रहः

अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिः आर्जवम्
आचार्योपासनम् शौचम् स्थैर्यम् आत्मविनिग्रहः

"अमानित्व",[१] दम्भहीनता, अहिंसा, क्षमाभाव, सरलता, आचार्य की सेवा, शुद्धता, स्थिरता, आत्मसंयम -

**१३.८ इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनम् ॥**

इन्द्रियार्थेषु वैराग्यम्
अनहंकार एव च - -
जन्ममृत्युजरा व्याधि- -
दुःखदोषानुदर्शनम्

इन्द्रियार्थेषु वैराग्यम् अनहंकारः एव च
जन्म मृत्यु जराव्याधि दुःखदोषानुदर्शनम्

इन्द्रियों के विषयों में उदासीनता, और अहंकार का अभाव भी, जन्म-मरण, जरा, व्याधि और दुःख के दोष (ही) देखना-

१. दूसरों से सम्मानित होने की अभिलाषा का अभाव।

१३.९ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥

असक्तिर् अनभिष्वंगः
पुत्रदारगृहादिषु - -
नित्यं च समचित्तत्वम्
इष्टानिष्टोपपत्तिषु - -

असक्तिः अनभिष्वंगः पुत्रदारगृहादिषु
नित्यम् च समचित्ततत्वम् इष्टानिष्टोपपत्तिषु

अनासक्ति, पुत्र, पत्नी और घर आदि में लिप्त न रहना, और प्रिय और अप्रिय घटनाओं में, निरन्तर समचित्तता,

१३.१० मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वं अरतिर्जनसंसदि ॥

मयि चा (अ)नन्ययांगेन - -
भक्तिर् अव्यभिचारिणी
विविक्तदेशासेवित्वम्
अरतिर् जनसंसदि - -

मयि च अनन्ययोगेन भक्तिः अव्यभिचारिणी
विविक्तदेशसेवित्वम् अरतिः जनसंसदि

और, मुझ में एकनिष्ठ योग द्वारा भक्ति, जो भटके नहीं, एकान्त स्थान का सेवन, जन समूह से अरुचि-

१३.११ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥

अध्यात्मज्ञाननित्यत्वं
तत्त्वज्ञानार्थ दर्शनम्
एतज् ज्ञानम् इति प्रोक्तम्
अज्ञानं यद् अतो (अ)न्यथा

अध्यात्मज्ञाननित्यत्वम् तत्त्वज्ञानार्थदर्शनम्
एतत् ज्ञानम् इति प्रोक्तम् अज्ञानम् यत् अतः अन्यथा

अध्यात्म ज्ञान में स्थिरता, तत्त्वज्ञान के विषय की अनुभूति, –यही (सब) ज्ञान है, ऐसा कहते हैं। जो अज्ञान है, इसके विपरीत है ।

१३.१२ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

ज्ञेयं यत् तत् प्रवक्ष्यामि, – –
यज् ज्ञात्वा (अ)मृतम् अश्नुते
अनादिमत् परं ब्रह्म, – –
न सत् तन् ना (अ)सद् उच्यते

ज्ञेयम् यत् तत् प्रवक्ष्यामि यत् ज्ञात्वा अमृतम् अश्नुते
अनादिमत् परम् ब्रह्म न सत् तत् न असत् उच्यते

जो जानने योग्य है, वह मैं बतलाऊंगा, जिसे जान कर, प्राप्त होता है अमरत्व, –अनादि, सर्वोपरि ब्रह्म, जो न सत् , न असत् कहलाता है ।

१३.१३ सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥

सर्वतः पाणिपादं तत्,
सर्वतो (अ)क्षिशिरोमुखम्
सर्वतः श्रुतिमल् लोके,
सर्वम् आवृत्य तिष्ठति - -

सर्वतः पाणिपादम् तत् सर्वतः अक्षिशिरोमुखम्
सर्वतः श्रुतिमत् लोके सर्वम् आवृत्य तिष्ठति

सब कहीं उसके हाथ पैर हैं, सर्वत्र नेत्र, सिर और मुख हैं, सब ओर कान हैं, वह जगत् में रहता है; सब को ढके हुए,

१३.१४ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥

सर्वेन्द्रिय गुणाभासं,
सर्वेन्द्रियविवर्जितम्
असक्तं सर्वभृच् चै (ए)व, - -
निर्गुणं गुणभोक्तृ च - -

सर्वेन्द्रियगुणाभासम् सर्वेन्द्रियविवर्जितम्
असक्तम् सर्वभृत् च एव निर्गुणम् गुणभोक्तृ च

उसमें सब इन्द्रियों के गुणों की झलक मिलती है, वह सब इन्द्रियों से रहित है, अलिप्त है, पर सब का भरण-पोषण करता है, और, निर्गुण होते हुए भी गुणों का भोक्ता है,

१३.१५ बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

बहिर् अन्तश् च भूतानाम्
अचरं चरम् एव च--
सूक्ष्मतत्वात् तद् अविज्ञेयं,
दूरस्थं चा (अ)न्तिके च तत्

बहिः अन्तः च भूतानाम् अचरम् चरम् एव च
सूक्ष्मत्वात् तत् अविज्ञेयम् दूरस्थम् च अन्तिके च तत्

जड़-चेतनादि के बाहर और भीतर है, चर और अचर भी है, सूक्ष्म होने से, वह ठीक-ठीक जाना नहीं जाता, दूर स्थित है, और निकट भी,– वह ।

१३.१६ अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥

अविभक्तं च भूतेषु --
विभक्तम् इव च स्थितम्
भूतभर्तृ च तज् ज्ञेयं,
ग्रसिष्णुप् प्रभविष्णु च --

अविभक्तम् च भूतेषु विभक्तम् इव च स्थितम्
भूतभर्तृ च तत् ज्ञेयम् ग्रसिष्णु प्रभविष्णु च

और (वह) अविभाजित है, फिर भी जड़-चेतनादि में मानों विभाजित हुआ रहता है । और, उसे प्राणियों का पालन-पोषण करने वाला जानना चाहिए,–भक्षण करने वाला और उत्पन्न करने वाला भी ।

१३.१७ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥

ज्योतिषाम् अपि तज् ज्योतिस्
तमसः परम् उच्यते
ज्ञानं ज्ञेयं ज्ञानगम्यं,
हृदि सर्वस्य विष्ठितम्

ज्योतिषाम् अपि तत् ज्योतिः तमसः परम् उच्यते
ज्ञानम् ज्ञेयम् ज्ञानगम्यम् हृदि सर्वस्य विष्ठितम्

वह ज्योतियों की भी ज्योति है, अन्धकार से वह परे कहा जाता है । वह ज्ञान है, ज्ञेय है और ज्ञान से ही प्राप्य है । सब के हृदय में वह विराजमान है ।

१३.१८ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥

इतिक् क्षेत्रं तथा ज्ञानं
ज्ञेयं चो (उ)क्तं समासतः
मद्भक्त एतद् विज्ञाय,
मद्भावायो (उ)पपद्यते

इति क्षेत्रम् तथा ज्ञानम् ज्ञेयम् च उक्तम् समासतः
मद्भक्तः एतत् विज्ञाय मद्भावाय उपपद्यते

इस प्रकार क्षेत्र और ज्ञान और ज्ञेय को, संक्षेप में बतलाया है । मेरा भक्त इसे जानकर, मेरी स्थिति को पहुंचने के योग्य होता है ।

**१३.१९ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥**

प्रकृतिं पुरूषं चै (ए)व - -
विद्ध्य् अनादी उभाव् अपि - -
विकारांश् च गुणांश् चै (ए)व - -
विद्धिप् प्रकृतिसंभवान्

प्रकृतिम् पुरुषम् च एव विद्धि अनादी उभौ अपि
विकारान् च गुणान् च एव विद्धि प्रकृतिसंभवान्

प्रकृति और पुरूष भी, तू समझ, दोनों अनादि ही हैं । और, विकार[२] और गुणों[३] को भी, प्रकृति से उत्पन्न हुआ जान । (पुरूष क्या है ? देखिए श्लोक १३.२२)

**१३.२० कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥**

कार्य करण कर्तृत्वे
हेतुः प्रकृतिर् उच्यते
पुरुषः सुखदुःखानां
भोक्तृत्वे हेतुर् उच्यते

कार्यकरणकर्तृत्वे हेतुः प्रकृतिः उच्यते
पुरुषः सुखदुःखानाम् भोक्तृत्वे हेतुः उच्यते

कार्य[४], और करण[५] को उत्पन्न करने में, प्रकृति, कारण कही जाती है । सुख दुःख भोगने में पुरूष[६] कारण कहा जाता है ।

२. विकार क्या है, श्लोक १३.५ से ६ में इनकी गणना की है.
३. सत्त्व रज तम तीन गुण हैं ।
४. पंच महाभूत - आकाश, वायु अग्नि जल और पृथ्वी और उनके विषय - शब्द स्पर्श रूप रस और गन्ध- इन दसों का तथा इनके संघात रूप शरीर का वाचक "कार्य" शब्द है अथवा, जो कुछ उत्पन्न हुआ है "कार्य" कहलाता है ।
५. बुद्धि, अहंकार, मन, पाँचों ज्ञानेन्द्रियाँ और पांचों कर्मेन्द्रियां - इन तेरह का वाचक करण है ।
६. प्रकृति जड़ है, पुरूष असंग है । दोनो में भोक्तापन की सम्भावना नहीं । पर दोनों के संग से पुरूष में भोक्तापन का आभास है - अतः उसे कारण कहा है ।

**१३.२१ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ।
कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥**

पुरुषः प्रकृतिस्थो हि – –
भुंक्ते प्रकृतिजान् गुणान्
कारणं गुणसंगो (अ)स्य – –
सद् असद् योनिजन्मसु – –

पुरुषः प्रकृतिस्थः हि भुंक्ते प्रकृतिजान् गुणान्
कारणम् गुणसंगः अस्य सदसद्योनिजन्मसु

वास्तव में, प्रकृति में स्थित पुरुष, प्रकृति से उत्पन्न गुणों को भोगता है । गुणों में आसक्ति, कारण है– इस (पुरुष) के अच्छी और बुरी योनियों में जन्म लेने का ।

**१३.२२ उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥**

उपद्द्रष्टा (अ)नुमन्ता च, – –
भर्ता भोक्ता महेश्वरः
परमात्मे (इ)ति चा (अ)प्यु उक्तो,
देहे (अ)स्मिन् पुरुषः परः

उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः
परमात्मा इति च अपि उक्तः देहे अस्मिन् पुरुषः परः

सर्वसाक्षी, अनुमति देने वाला और पालन-पोषण करने वाला, भोक्ता महेश्वर, और ऐसे जो "परमात्मा" भी कहलाता है, (वही) इस शरीर में सर्वो परि पुरुष[७] है ।

७ श्लोक १९ से २२ में "पुरुष" का वर्णन है । अध्याय ७ में भगवान् ने अपनी दो प्रकार की प्रकृति का वर्णन किया है । एक निम्नश्रेणी की है, दूसरी श्रेष्ठ है जो प्राणियों का जीवन है । इसी प्रकृति को यहां श्लोक १९, २० और २१ में "पुरुष" कहा है । श्लोक २२ में वर्णित "परमात्मा" ही "पुरुष" है ।

१३.२३ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥

य एवं वेत्ति पुरुषं
प्रकृतिं च गुणैः सह - -
सर्वथा वर्तमानो (अ)पि - -
न स भूयो (अ)भिजायते

यः एवम् वेत्ति पुरुषम् प्रकृतिम् च गुणैः सह
सर्वथा वर्तमानः अपि न सः भूयः अभिजायते

जो इस प्रकार जानता है पुरुष को, और, प्रकृति को गुणों सहित, वह, हर प्रकार का व्यवहार करते हुए भी, फिर जन्म नहीं लेता ।

१३.२४ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥

ध्यानेना (आ)त्मनि पश्यन्ति - -
केचिद् आत्मानम् आत्मना
अन्ये सांख्येन योगेन, - -
कर्मयोगेन चा (अ)परे

ध्यानेन आत्मनि पश्यन्ति केचित् आत्मानम् आत्मना
अन्ये सांख्येन योगेन कर्मयोगेन च अपरे

कुछ लोग ध्यान द्वारा अपने में देखते हैं, अपने को, अपने से; और, कोई सांख्य योग द्वारा, और कोई दूसरे, कर्म योग द्वारा ।

१३. २५ अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥

अन्ये त्व् एवम् अजानन्तः
श्रुत्वा (अ)न्येभ्य उपासते
ते (अ)पि चा (अ)तितरन्त्य् एव - -
मृत्युं श्रुतिपरायणाः

अन्ये तु एवम् अजानन्तः श्रुत्वा अन्येभ्यः उपासते
ते अपि च अतितरन्ति एव मृत्युम् श्रुतिपरायणाः

और दूसरे, जो वास्तव में इससे अनजान हैं, औरों से सुन कर उपासना करते हैं, और, वे भी मृत्यु (सागर) को पार कर जाते हैं - सुने हुए पर श्रद्धा रखकर ।

१३. २६ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥

यावत् संजायते किंचित्
सत्त्वं स्थावरजंगमम्
क्षेत्रक्षेत्रज्ञ संयोगात्
तद् विद्धि भरतर्षभ - -

यावत् संजायते किंचित् सत्त्वम् स्थावरजंगमम्
क्षेत्रक्षेत्रज्ञसंयोगात् तत् विद्धि भरतर्षभ

जो कुछ भी उत्पन्न होता है,-कोई भी वस्तु , प्राणी, जड़-जंगम, -वह क्षेत्र क्षेत्रज्ञ के संयोग से ही है, ऐसा तू समझ, भरतर्षभ ।

१३. २७ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥

समं सर्वेषु भूतेषु – –
तिष्ठन्तं, परमेश्वरम्
विनश्यत्स्व् अविनश्यन्तं,
यः पश्यति स पश्यति – –

समम् सर्वेषु भूतेषु तिष्ठन्तम् परमेश्वरम्
विनश्यत्सु अविनश्यन्तम् यः पश्यति सः पश्यति

एक समान सब प्राणियों में स्थित परमेश्वर,- नाशवानों में अविनाशी, को जो देखता है, वही (ठीक ठीक) देखता है ।

१३. २८ समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥

समं पश्यन् हि सर्वत्र – –
समवस्थितम् ईश्वरम्
न हिनस्त्य् आत्मना (आ)त्मानं,
ततो याति परां गतिम्

समम् पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्
न हिनस्ति आत्मना आत्मानम् ततः याति पराम् गतिम्

वास्तव में, एक समान जो देखता है, सब स्थानों में एक से स्थित ईश्वर को, वह अपने द्वारा अपना अनिष्ट नहीं करता, और, इस प्रकार परम गति को पा जाता है ।

१३. २५ अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥

अन्ये त्व् एवम् अजानन्तः
श्रुत्वा (अ)न्येभ्य उपासते
ते (अ)पि चा (अ)तितरन्त्य् एव - -
मृत्युं श्रुतिपरायणाः

अन्ये तु एवम् अजानन्तः श्रुत्वा अन्येभ्यः उपासते
ते अपि च अतितरन्ति एव मृत्युम् श्रुतिपरायणाः

और दूसरे, जो वास्तव में इससे अनजान हैं, औरों से सुन कर उपासना करते हैं, और, वे भी मृत्यु (सागर) को पार कर जाते हैं - सुने हुए पर श्रद्धा रखकर।

१३. २६ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥

यावत् संजायते किंचित्
सत्त्वं स्थावरजंगमम्
क्षेत्रक्षेत्रज्ञ संयोगात्
तद् विद्धि भरतर्षभ - -

यावत् संजायते किंचित् सत्त्वम् स्थावरजंगमम्
क्षेत्रक्षेत्रज्ञसंयोगात् तत् विद्धि भरतर्षभ

जो कुछ भी उत्पन्न होता है,-कोई भी वस्तु , प्राणी, जड़-जंगम, -वह क्षेत्र क्षेत्रज्ञ के संयोग से ही है, ऐसा तू समझ, भरतर्षभ !

१३. २७ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥

समं सर्वेषु भूतेषु - -
तिष्ठन्तं, परमेश्वरम्
विनश्यत्स्व् अविनश्यन्तं,
यः पश्यति स पश्यति - -

समम् सर्वेषु भूतेषु तिष्ठन्तम् परमेश्वरम्
विनश्यत्सु अविनश्यन्तम् यः पश्यति सः पश्यति

एक समान सब प्राणियों में स्थित परमेश्वर,- नाशवानों में अविनाशी, को जो देखता है, वही (ठीक ठीक) देखता है ।

१३. २८ समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥

समं पश्यन् हि सर्वत्र - -
समवस्थितम् ईश्वरम्
न हिनस्त्य् आत्मना (आ)त्मानं,
ततो याति परां गतिम्

समम् पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्
न हिनस्ति आत्मना आत्मानम् ततः याति पराम् गतिम्

वास्तव में, एक समान जो देखता है, सब स्थानों में एक से स्थित ईश्वर को, वह अपने द्वारा अपना अनिष्ट नहीं करता, और, इस प्रकार परम गति को पा जाता है ।

१३. २९ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥

प्रकृत्यै (ए)व च कर्माणि - -
क्रियमाणानि सर्वशः
यः पश्यति, तथा (आ)त्मानम्
अकर्तारं स पश्यति - -

प्रकृत्या एव च कर्माणि क्रियमाणानि सर्वशः
यः पश्यति तथा आत्मानम् अकर्तारम् सः पश्यति

और, प्रकृति द्वारा ही सब कहीं कर्म किए जा रहे हैं, ऐसा जो देखता है, और अपने को अकर्ता (मानता-है), वही (ठीक ठीक) देखता है ।

१३. ३० यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥

यदा भूतपृथग्भावम्
एकस्थम् अनुपश्यति - -
तत एव च विस्तारं,
ब्रह्म संपद्यते तदा

यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति
ततः एव च विस्तारम् ब्रह्म संपद्यते तदा

जब वह जड़-चेतनादि के भिन्न-भिन्न अस्तित्वों को एक ही में स्थित देखता है और उसी (एक) से (इनके) विस्तार को, तब वह ब्रह्म को प्राप्त कर लेता है ।

१३.३१ **अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।**
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥

अनादित्वान् निर्गुणत्वात्
परमात्मा (अ)यम् अव्ययः
शरीरस्थो (अ)पि, कौन्तेय, - -
न करोति न लिप्यते

अनादित्वात् निर्गुणत्वात् परमात्मा अयम् अव्ययः
शरीरस्थः अपि कौन्तेय न करोति न लिप्यते

अनादि और निर्गुण होने के कारण, यह परमात्मा अविनाशी, शरीर में स्थित होते हुए भी, कौन्तेय । न कुछ करता है, न लिप्त होता है ।

१३.३२ **यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।**
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥

यथा सर्वगतं सौक्ष्म्याद्
आकाशं नो (उ)पलिप्यते
सर्वत्रा (अ)वस्थितो देहे
तथा (आ)त्मा नो (उ)पलिप्यते

यथा सर्वगतम् सौक्ष्म्यात् आकाशम् न उपलिप्यते
सर्वत्र अवस्थितः देहे तथा आत्मा न उपलिप्यते

सूक्ष्म होने के कारण जैसे सर्वव्यापी आकाश पर कोई प्रभाव नहीं पड़ता, वैसे ही शरीर में हर कहीं स्थित होते हुए भी, (परम्) आत्मा लिप्त नहीं होता ।

१३.३३ **यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।**
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥

यथा प्रकाशयत्य् एकः
कृत्स्नं लोकम् इमं रविः
क्षेत्रं क्षेत्री तथा कृत्स्नं
प्रकाशयति, भारत - -

यथा प्रकाशयति एकः कृत्स्नम् लोकम् इमम् रविः
क्षेत्रम् क्षेत्री तथा कृत्स्नम् प्रकाशयति भारत

जैसे एक सूर्य इस सम्पूर्ण जगत् को प्रकाशित करता है उसी प्रकार क्षेत्र का स्वामी, सम्पूर्ण क्षेत्र को प्रकाशित करता है, भारत !

१३.३४ **क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।**
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥

क्षेत्रक्षेत्रज्ञयोर् एवम्
अन्तरं, ज्ञानचक्षुषा
भूतप्प्रकृतिमोक्षं च, - -
ये विदुर् यान्ति ते परम्

क्षेत्रक्षेत्रज्ञयोः एवम् अन्तरम् ज्ञानचक्षुषा
भूतप्रकृतिमोक्षम् च ये विदुः यान्ति ते परम्

इस प्रकार जो ज्ञान चक्षु द्वारा क्षेत्र और क्षेत्रज्ञ के भेद को, और प्रकृति (के बन्धन) से प्राणियों की मुक्ति होने को जानते हैं, वे सर्वोपरि (ब्रह्म) को पा जाते हैं ।

श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः
समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय-१४

अध्याय १३ में प्रकृति और पुरुष क्या हैं बतलाते हुए भगवान् ने कहा सत्त्व, रज और तम प्रकृति के गुण हैं।

ये गुण प्रकृति से ही उत्पन्न हैं और देह धारी को शरीर में बांध कर रखते हैं।

कौन गुण कब प्रबल हो जाता है, उसका क्या प्रभाव है, इत्यादि बातों की व्याख्या अध्याय १४ में की गई है। यह भी बतलाया गया है कि इन तीन गुणों को कैसे पार किया जा सकता है और उसका फल क्या है।

अध्याय १४ का नाम है "गुणत्रय विभाग योग"।

श्रीमद्भगवद् गीता

अथ चतुर्दशोऽध्यायः

(श्री कृष्णार्जुनसंवादे गुणत्रयविभागयोगः)

१४.१ **श्री भगवानुवाच–**
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥

परं भूयः प्रवक्ष्यामि – –
ज्ञानानां ज्ञानम् उत्तमम्
यज् ज्ञात्वा मुनयः सर्वे
परां सिद्धिम् इतो गताः

परम् भूयः प्रवक्ष्यामि ज्ञानानाम् ज्ञानम् उत्तमम्
यत् ज्ञात्वा मुनयः सर्वे पराम् सिद्धिम् इतः गताः

श्रीभगवान् उवाच–
मैं फिर से बतलाऊंगा उस ज्ञान को जो सब ज्ञानों में श्रेष्ठ है, जिसे जान कर यहां से, समस्त मुनि लोग परम सिद्धि को पहुँचे हैं ।

**१४.२ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥**

इदं ज्ञानम् उपाश्रित्य - -
मम साधर्म्यम् आगताः
सर्गे (अ)पि नो (उ)पजायन्ते,
प्रलये न व्यथन्ति च - -

इदम् ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः
सर्गे अपि न उपजायन्ते प्रलये न व्यथन्ति च

इस ज्ञान का सहारा लेकर मेरे स्वरूप को प्राप्त हुए (लोग), उत्पत्ति काल में भी जन्म नहीं लेते, और प्रलय काल में, दुःखी नहीं होते ।

**१४.३ मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥**

मम योनिर् महद् ब्रह्म, - -
तस्मिन् गर्भं दधाम्य् अहम्
संभवः सर्वभूतानां
ततो भवति भारत - -

मम योनिः महत् ब्रह्म तस्मिन् गर्भम् दधामि अहम्
संभवः सर्वभूतानाम् ततः भवति भारत

विशाल अव्यक्त प्रकृति मेरी योनि है, मैं उसमें गर्भ स्थापित करता हूं । सब जड़-चेतनादि की तब, उत्पत्ति होती है, भारत !

**१४.४ सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥**

सर्वयोनिषु, कौन्तेय, – –
मूर्तयः संभवन्ति याः
तासां ब्रह्म महद् योनिर्
अहं बीजप् प्रदः पिता

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः
तासाम् ब्रह्म महत् योनिः अहम् बीजप्रदः पिता

सब योनियों में, कौन्तेय । जो भी मूर्ति–आकार उत्पन्न होते हैं, उनका गर्भस्थल, विशाल अव्यक्त प्रकृति है, मैं बीज डालने वाला पिता हूं ।

**१४.५ सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥**

सत्त्वं रजस् तम इति – –
गुणाः प्रकृति संभवाः
निबध्नन्ति महाबाहो,
देहे देहिनम् अव्ययम्

सत्त्वम् रजः तमः इति गुणाः प्रकृतिसंभवाः
निबध्नन्ति महाबाहो, देहे देहिनम् अव्ययम्

सत्त्व, रज, और तम, ऐसे प्रकृति से उत्पन्न (तीन) गुण हैं । हे महाबाहो । वे शरीर में जकड़ कर रखते हैं, देहधारी को – जो अक्षय है ।

१४.६ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥

तत्र सत्त्वं, निर्मलत्वात्,
प्रकाशकम् अनामयम्
सुखसंगेन बध्नाति, - -
ज्ञानसंगेन चा (अ)नघ - -

तत्र सत्त्वम् निर्मलत्वात् प्रकाशकम् अनामयम्
सुखसंगेन बध्नाति ज्ञानसंगेन च अनघ

इनमें, सत्त्वगुण, निर्मल होने के कारण प्रकाश देने वाला और आरोग्यकर है । यह (देहधारी को) बांध लेता है - सुख और ज्ञान की आसक्ति के साथ, अनघ !

१४.७ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनम् ॥

रजो रागात्मकं विद्धि, - -
तृष्णासंग समुद्भवम्
तन् निबध्नाति, कौन्तेय, - -
कर्मसंगेन देहिनम्

रजः रागात्मकम् विद्धि तृष्णासंगसमुद्भवम्
तत् निबध्नाति कौन्तेय कर्मसंगेन देहिनम्

रजोगुण, तू समझ, अनुराग और वासनामय है, तृष्णा और आसक्ति का स्रोत है । वह बांध लेता है कौन्तेय ! देहधारी को, कर्म की आसक्ति के साथ ।

१४.८ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥

तमस् त्व् अज्ञानजं विद्धि, – –
मोहनम् सर्व देहिनाम्
प्रमादालस्य निद्राभिस्
तन् निबध्नाति, भारत – –

तमः तु अज्ञानजम् विद्धि मोहनम् सर्वदेहिनाम्
प्रमादालस्यनिद्राभिः तत् निबध्नाति भारत

परन्तु तमोगुण को, तू अज्ञान से उत्पन्न हुआ समझ, जो सब देहधारियों को मोह में डालने वाला है; (और), उसे (देहधारी को) प्रमाद, आलस और निद्रा से बांधता है, भारत ।

१४.९ सत्त्वं सुखे संजयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥

सत्त्वं सुखे संजयति, – –
रजः कर्मणि, भारत – –
ज्ञानम् आवृत्य तु तमः
प्रमादे संजयत्य् उत – –

सत्त्वम् सुखे संजयति रजः कर्मणि भारत
ज्ञानम् आवृत्य तु तमः प्रमादे संजयति उत

सत्त्वगुण (देहधारी को) सुख में लगाता है, रजोगुण कर्म में, भारत । परन्तु, तमोगुण, ज्ञान को ढक कर भ्रम-भ्रान्ति में आसक्ति उत्पन्न कराता है । सच ।

**१४.१० रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥**

रजस् तमश् चा (अ)भिभूय - -
सत्त्वं भवति, भारत - -
रजः सत्त्वं तमश् चै (ए)व, - -
तमः सत्त्वं रजस् तथा

रजः तमः च अभिभूय सत्त्वम् भवति भारत
रजः सत्त्वम् तमः च एव तमः सत्त्वम् रजः तथा

रज और तम को पराजित करके सत्त्वगुण प्रबल होता है, भारत । और रजोगुण, सत्त्व और तम को । उसी प्रकार, तमोगुण, सत्त्व और रज को, (पराजित करके) ।

**१४.११ सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥**

सर्वद्द्वारेषु देहे (अ)स्मिन्
प्रकाश उपजायते
ज्ञानं यदा तदा विद्याद्
विवृद्धं सत्त्वम् इत्य् उत - -

सर्वद्वारेषु देहे अस्मिन् प्रकाशः उपजायते
ज्ञानम् यदा तदा विद्यात् विवृद्धम् सत्त्वम् इति उत

इस देह के सब द्वारों में, ज्ञान का प्रकाश, जब फूट पड़ता है, तब ऐसा जानना चाहिए कि सत्त्वगुण की सचमुच, वृद्धि हुई है ।

१४.१२ लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥

लोभः प्रवृत्तिर्- आरम्भः
कर्मणाम् अशमः स्पृहा
रजस्य् एतानि जायन्ते
विवृद्धे भरतर्षभ - -

लोभः प्रवृत्तिः आरम्भः कर्मणाम् अशमः स्पृहा
रजसि एतानि जायन्ते विवृद्धे भरतर्षभ

लोभ, संसार में अनुरक्ति, कर्मों को आरम्भ करने की इच्छा, अशान्ति और लालसा - ये उत्पन्न होते हैं, बढ़े हुए रजोगुण में, भरतर्षभ ।

१४.१३ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥

अप्रकाशो (अ)प्रवृत्तिश्च, - -
प्रमादो मोह एव च - -
तमस्य् एतानि जायन्ते
विवृद्धे, कुरुनन्दन - -

अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च
तमसि एतानि जायन्ते विवृद्धे कुरुनन्दन

अज्ञान, किसी भी काम को करने की अनिच्छा, असावधानी और मोह भी, ये उत्पन्न होते हैं, बढ़े हुए तमोगुण में, कुरुनन्दन ।

**१४.१४ यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥**

यदा सत्त्वे प्रवृद्धे तु – –
प्रलयं याति देहभृत्
तदो (अ)त्तमविदां लोकान्
अमलान् प्रतिपद्यते

यदा सत्त्वे प्रवृद्धे तु प्रलयम् याति देहभृत्
तदा उत्तमविदाम् लोकान् अमलान् प्रतिपद्यते

वास्तव में, बढ़े हुए सत्त्वगुण में, जब देहधारी विलय को प्राप्त होता है, तब वह, उनके निर्मल लोकों को पा जाता है,–जो सर्वोच्च को जानते हैं ।

**१४.१५ रजसि प्रलयं गत्वा कर्मसंगिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥**

रजसिप् प्रलयं गत्वा
कर्मसंगिषु जायते
तथा प्रलीनस् तमसि, – –
मूढयोनिषु जायते

रजसि प्रलयम् गत्वा कर्मसंगिषु जायते
तथा प्रलीनः तमसि मूढयोनिषु जायते

रजोगुण में विलय को प्राप्त होकर (वह) उनके बीच जन्म लेता है जो कर्म में आसक्त हैं । और इसी प्रकार, तमोगुण में विलय को प्राप्त हुआ, मूढ-योनियों में जन्म लेता है ।

१४.१६ कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥

कर्मणः सुकृतस्या (आ)हुः
सात्त्विकं निर्मलं फलम्
रजसस् तु फलं दुःखम्
अज्ञानं तमसः फलम्

कर्मणः सुकृतस्य आहुः सात्त्विकम् निर्मलम् फलम्
रजसः तु फलम् दुःखम् अज्ञानम् तमसः फलम्

कहते हैं, सत्कर्म का फल सात्त्विक और निर्मल है, रजोगुण का फल, वास्तव में, दुःख है, (और) अज्ञान, तमोगुण का फल है ।

१४.१७ सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥

सत्त्वात् संजायते ज्ञानं,
रजसो लोभ एव च - -
प्रमादमोहौ तमसो
भवतो (अ)ज्ञानम् एव च - -

सत्त्वात् संजायते ज्ञानम् रजसः लोभः एव च
प्रमादमोहौ तमसः भवतः अज्ञानम् एव च

सत्त्वगुण से ज्ञान उत्पन्न होता है और रजोगुण से एकमात्र लोभ । भ्रम-भ्रांति और मोह, तमोगुण से आते हैं, और अज्ञान भी ।

१४.१८ ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

ऊर्ध्वंगच्छन्ति सत्त्वस्था,
मध्ये तिष्ठन्ति राजसाः
जघन्यगुणवृत्तिस्था
अधो गच्छन्ति तामसाः

ऊर्ध्वम् गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः
जघन्यगुणवृत्तिस्थाः अधः गच्छन्ति तामसाः

वे ऊपर की ओर उठते हैं, जो सत्त्व गुण में स्थित हैं; बीच में वे रहते हैं, जो रजोगुण वाले हैं, और निकृष्ट गुण वृति वाले, अधोगति को जाते हैं, तामसी ।

१४.१९ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥

ना (अ)न्यं गुणेभ्यः कर्तारं
यदा द्रष्टा (अ)नुपश्यति - -
गुणेभ्यश् च परं वेत्ति, - -
मद्भावं सो (अ)धिगच्छति - -

न अन्यम् गुणेभ्यः कर्तारम् यदा द्रष्टा अनुपश्यति
गुणेभ्यः च परम् वेत्ति मद्भावम् सः अधिगच्छति

(तीनों) गुणों के अतिरिक्त और कोई कर्त्ता नहीं है, जब देखने वाला इस (बात) का अनुभव करता है और जानता है (उसे), जो गुणों से परे है, (तब) वह मेरे स्वरूप को प्राप्त हो जाता है ।

१४.२० गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥

गुणान् एतान् अतीत्यत् त्रीन्
देही देहसमुद्भवान्
जन्म मृत्यु जरा दुःखैर्
विमुक्तो (अ)मृतम् अश्नुते

गुणान् एतान् अतीत्य त्रीन् देही देहसमुद्भवान्
जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते

देह को उत्पन्न करने वाले इन तीन गुणोंको, देहधारी जब पार कर लेता है, वह, जन्म, मृत्यु, वृद्धावस्था और दुखों से मुक्त हुआ, अमरत्व को प्राप्त करता है ।

१४.२१ अर्जुन उवाच-
कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥

कैर्लिंगैस् त्रीन् गुणान् एतान्
अतीतो भवतिप्, प्रभो
किमाचारः कथं चै (ए)तांस्
त्रीन् गुणान् अतिवर्तते

कैः लिंगैः त्रीन् गुणान् एतान् अतीतः भवति प्रभो
किमाचारः कथम् च एतान् त्रीन् गुणान् अतिवर्तते

अर्जुन उवाच-

हे प्रभो ! उसके लक्षण क्या हैं, जिसने इन तीनों गुणों को पार किया है; उसका आचरण क्या है, और वह कैसे इन तीनों गुणों को लांघ जाता है ?[1]

१. त्रिगुणातीत के लक्षण के सम्बन्ध में यहाँ से अध्यायान्त तक का प्रकरण लगभग वैसा ही है जो स्थितप्रज्ञ (२.५५) या प्रियभक्त (१२.१२) का है।

१४.२२ श्रीभगवानुवाच–
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥

प्रकाशं च प्रवृत्तिं च – –
मोहम् एव च, पाण्डव – –
न द्वेष्टि संप्रवृत्तानि, – –
न निवृत्तानि कांक्षति – –

प्रकाशम् च प्रवृतिम् च मोहम् एव च पाण्डव
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति

श्री भगवान् उवाच–
हे पाण्डव ! प्रकाश (सत्त्व), प्रवृत्ति (रज), और मोह (तम) के भी प्राप्त होने पर जो न उनसे द्वेष करता है (और) उनके दूर हो जाने पर, न आकांक्षा;

१४.२३ उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेंगतें ॥

उदासीनवद् आसीनो
गुणैर् यो न विचाल्यते
गुणा वर्तन्त इत्य् एव – –
यो (अ)वतिष्ठति नें (इ)गते

उदासीनवत् आसीनः गुणैः यः न विचाल्यते
गुणाः वर्तन्ते इति एव यः अवतिष्ठति न इंगते

तटस्थ सा स्थित हुआ, जो गुणों द्वारा विचलित नहीं होता, (यह मानते हुए कि) गुणों का चक्र इसी प्रकार चलता है,– दृढ स्थिर रहता है, डगमगाता नहीं ;

१४.२४ समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥

समदुःखसुखः स्वस्थः
समलोष्टाश्मकाञ्चनः
तुल्यप् प्रियाप्रियो धीरस्
तुल्यनिन्दात्मसंस्तुतिः

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः
तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः

जो सुख दुःख में एक सा है, अपने आप में स्थित है, जिसके लिए मिट्टी, पत्थर और स्वर्ण एक समान हैं, जिसके लिए प्रिय और अप्रिय एक बराबर हैं, जो धैर्यवान् है, निन्दा और आत्मप्रशंसा जिसके लिए एक ही हैं;-

१४.२५ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥

मानापमानयोस् तुल्यस्
तुल्यो मित्रारिपक्षयोः
सर्वारम्भपरित्यागी
गुणातीतः स उच्यते

मानापमानयोः तुल्यः तुल्यः मित्रारिपक्षयोः
सर्वारम्भपरित्यागी गुणातीतः सः उच्यते

जो मान और अपमान में एक सा रहता है, जिसके लिए मित्र और शत्रु पक्ष एक से हैं, जिसने सब (सकाम) कार्यारम्भ छोड़ दिए हैं, उसे, "गुणों से परे चला गया" कहते हैं।

१४.२६ मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥

मां च यो (अ)व्यभिचारेण – –
भक्तियोगेन सेवते
स गुणान् समतीत्यै (ए)तान्
ब्रह्मभूयाय कल्पते

माम् च यः अव्यभिचारेण भक्तियोगेन सेवते
सः गुणान् समतीत्य एतान् ब्रह्मभूयाय कल्पते

और, जो एकनिष्ठ भक्ति-योग से मेरी आराधना करता है, वह इन गुणों को पूर्णतः पार कर के, ब्रह्म रूप होने के योग्य होता है।

१४.२७ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥

ब्रह्मणो हिप् प्रतिष्ठा (अ)हम्
अमृतस्या (अ)व्ययस्य च – –
शाश्वतस्य च धर्मस्य, – –
सुखस्यै (ऐ)कान्तिकस्य च – –

ब्रह्मणः हि प्रतिष्ठा अहम् अमृतस्य अव्ययस्य च
शाश्वतस्य च धर्मस्य सुखस्य ऐकान्तिकस्य च

वास्तव में मैं (निवास) स्थान हूं – ब्रह्म का, अमरत्व और अविनाशी का, और सदैव बने रहने वाले धर्म का, और अनन्त सुख का।

श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः
समाप्तः ।

परिचय-१५

अध्याय १३ में क्षेत्र-क्षेत्रज्ञ ज्ञान के अन्तर्गत प्रकृति और पुरुष का वर्णन किया है। प्रकृति जड़ है। पुरुष अकर्ता है, तटस्थ रहता है पर दोनो के संयोग से पुरुष में भोक्तापन का आभास होता है। यह द्वैत-ज्ञान, सांख्यमतानुसार है।

अध्याय १४ में प्रकृति के उन गुणों की व्याख्या है जो देहधारी को शरीर में बांध कर रखते हैं।

अब १५वें अध्याय में अद्वैत मतानुसार ईश्वर की सर्वव्यापकता का पुनः निरूपण करते हैं। यह क्षर से परे है, अक्षर से भी श्रेष्ठ है। इसे वेद में "पुरुषोत्तम" कहा है।

अध्याय १५ का नाम है "पुरुषोत्तम योग"[१] ।

१. अध्यात्म विषयक संपूर्ण प्रक्रिया का, इस अध्याय में, अद्वितीय वर्णन है, संक्षेप में।

श्रीमद्भगवद् गीता

अथ पञ्चदशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे पुरूषोत्तम योगः)

१५.१ **श्रीभगवानुवाच-**
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

ऊर्ध्वमूलम् अधःशाखम्
अश्वत्थं प्राहुर् अव्ययम्
छन्दांसि यस्य पर्णानि, - -
यस् तं वेद स वेदवित्

ऊर्ध्वमूलम् अधःशाखम् अश्वत्थम् प्राहुः अव्ययम्
छन्दांसि यस्य पर्णानि यः तम् वेद सः वेदवित्

श्रीभगवान् उवाच-
जिसकी जड़ें ऊपर हैं, शाखाएं नीचे हैं उस "अश्वत्थ" वृक्ष को अविनाशी कहा गया है । उसके पत्ते, वेद हैं । जो उसे जानता है, वह वेद का ज्ञाता है[१] ।

१. यह ब्रह्म वृक्ष अथवा संसार वृक्ष का वर्णन है। जड़ें ऊपर (ब्रह्म में) हैं, शाखाएं नीचे, (संसार में) । दूसरे श्लोक में जो नीचे की ओर फैली जड़ों का संकेत है, वे अमौलिक और अनेक हैं, जैसी बट वृक्ष की ।

१५.२ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि
कर्मानुबन्धीनि मनुष्यलोके ॥

अधश् चो (ऊ)र्ध्वं प्रसृतास् तस्य शाखा
गुणप्प्रवृद्धा विष्यप् प्रवालाः
अधश्च मूलान्य् अनुसंततानि, - -
कर्मानुबन्धीनि मनुष्य लोके

अधः च ऊर्ध्वम् प्रसृताः तस्य शाखाः गुणप्रवृद्धाः विषयप्रवालाः
अधः च मूलानि अनुसंततानि कर्मानुबन्धीनि मनुष्यलोके

उस (वृक्ष) की शाखाएं नीचे ऊपर फैली हैं । ये गुणों से पोषित हैं, विषय इनकी कोपलें हैं । जो जड़ें उसके नीचे की ओर फैली हैं, वे कर्मों के बन्धन हैं - मनुष्य लोक में ।

१५.३ न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूल-
मसंगशस्त्रेण दृढेन छित्त्वा ॥

न रूपम् अस्ये (इ)ह तथो (उ)पलभ्यते,
ना (अ)न्तो न चा (आ)दिर् न च संप्रतिष्ठा
अश्वत्थम् एनं सुविरूढमूलम्
असंग शस्त्रेण दृढेन छित्त्वा

न रूपम् अस्य इह तथा उपलभ्यते न अन्तः न च आदिः न च संप्रतिष्ठा
अश्वत्थम् एनम् सुविरूढमूलम् असंग शस्त्रेण दृढेन छित्त्वा

इस (वृक्ष) का, इस प्रकार का रूप, यहां उपलब्ध नहीं, न अन्त है और न आदि, और न कोई आधार है । इस अश्वत्थ को, जिसकी जड़ें अति दृढ हैं, अनासक्ति के कठोर शस्त्र से काट कर--

१५.४ ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरूषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ।।

ततः पदं तत् परिमार्गितव्यं,
यस्मिन् गता न निवर्तन्ति भूयः
तम् एव चा (आ)द्यं पुरूषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी

ततः पदम् तत् परिमार्गितव्यम् यस्मिन् गताः न निवर्तन्ति भूयः
तम् एव च आद्यम् पुरूषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी

तब, उस स्थान को भली प्रकार ढूंढना चाहिए, जहां पहुंचकर, फिर लौटना नहीं पड़ता । और, (यह कहते हुए ढूंढना चाहिए कि) मैं एकमात्र उस आदि पुरूष की शरण में जाता हूं, जहां से यह पुरातन सृष्टिचक्र चल पड़ा है ।

१५.५ निर्मानमोहा जितसंगदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ।।

निर्मानमोहा जितसंग दोषा
अध्यात्मनित्या विनिवृत्तकामाः
द्वन्द्वैर् विमुक्ताः सुखदुःखसंज्ञैर्
गच्छन्त्य् अमूढाः पदम् अव्ययं तत्

निर्मानमोहाः जितसंगदोषाः अध्यात्मनित्याः विनिवृत्तकामाः
द्वन्द्वैः विमुक्ताः सुखदुःखसंज्ञैः गच्छन्ति अमूढाः पदम् अव्ययम् तत्

मान और मोह से रहित, जिन्होंने आसक्ति दोषों को जीत लिया है, जो अध्यात्म ज्ञान[२] में सदा स्थिर हैं, जिनकी कामनाएं पूर्णतः शांत हो गई हैं, जो सुखदुःख नाम के द्वंद्वों से मुक्त हैं, वे ज्ञानीजन पहुंच जाते हैं, उस अविनाशी स्थान को ।

२. देखिए श्लोक ८.३

१५.६ न तद् भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

न तद् भासयते सूर्यो,
न शशांको न पावकः
यद् गत्वा न निवर्तन्ते
तद् धाम परमं मम – –

न तत् भासयते सूर्यः न शशांकः न पावकः
यत् गत्वा न निवर्तन्ते तत् धाम परमम् मम

न उसको सूर्य प्रकाशित करता है, न चन्द्रमा, न अग्नि । जहां जाकर लौटते नहीं, वह मेरा सर्वोत्तम धाम है ।

१५.७ ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥

ममै (ए)वां (अं)शो जीवलोके
जीवभूतः सनातनः
मनः षष्ठानी (इ)न्द्रियाणि – –
प्रकृतिस्थानि कर्षति – –

मम एव अंशः जीवलोके जीवभूतः सनातनः
मनःषष्ठानि इन्द्रियाणि प्रकृतिस्थानि कर्षति

मेरा ही अंश सनातन, जीवलोक में जीव (रूप) होकर, मन सहित छः, इन्द्रियों को, जो प्रकृति में स्थित हैं, खींचता है ।

**१५.८ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥**

शरीरं यद् अवाप्नोति - -
यच् चा (अ)प्य् उत्क्रामती (ई)श्वरः
गृहीत्वै (ए)तानि संयाति, - -
वायुर् गन्धान् इवा (आ)शयात्

शरीरम् यत् अवाप्नोति यत् च अपि उत्क्रामति ईश्वरः
गृहीत्वा एतानि संयाति वायुः गन्धान् इव आशयात्

ईश्वर (का अंश 'जीव') जब शरीर धारण करता है, और, जब उससे प्रस्थान भी करता है, तब वह इन (मन और पांचो ज्ञान इन्द्रियों) को साथ लेकर जाता है, जैसे वायु गन्ध को, उसके (पुष्प आदि) स्थान से ।

**१५.९ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥**

श्रोत्रं चक्षुः स्पर्शनं च - -
रसनं घ्राणम् एव च - -
अधिष्ठाय, मनश् चा (अ)यं
विषयान् उपसेवते

श्रोत्रम् चक्षुः स्पर्शनम् च रसनम् घ्राणम् एव च
अधिष्ठाय मनः च अयम् विषयान् उपसेवते

कान, आंख और त्वचा, जिह्वा और नासिका, और मन का भी, आधार लेकर यह (जीव) विषयों का सेवन करता है ।

१५.१० उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥

उत्क्रामन्तं स्थितं वा (अ)पि - -
भुञ्जानं वा गुणान्वितम्
विमूढा ना (अ)नुपश्यन्ति - -
पश्यन्ति ज्ञानचक्षुषः

उत्क्रामन्तम् स्थितम् वा अपि भुञ्जानम् वा गुणान्वितम्
विमूढाः न अनुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः

(शरीर से) जाते हुए अथवा ठहरे हुए, भोग करते अथवा गुणों के साथ जुड़े हुए (इस) को, मोह में पड़े लोग नहीं देखते। देखते हैं, ज्ञान नेत्रों वाले।

१५.११ यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥

यतन्तो योगिनश् चै (ए)नं
पश्यन्त्य् आत्मन्य् अवस्थितम्
यतन्तो (अ)प्य् अकृतात्मानो
नै (ए)नं पश्यन्त्य् अचेतसः

यतन्तः योगिनः च एनम् पश्यन्ति आत्मनि अवस्थितम्
यतन्तः अपि अकृतात्मानः न एनम् पश्यन्ति अचेतसः

और, प्रयत्न करते हुए योगी इसे देखते हैं - अपने में स्थित हुआ। परन्तु, जिन्होंने अपने को सुसंस्कृत नहीं किया है, वे प्रयत्न करते हुए भी इसे नहीं देखते, बुद्धिहीन हैं।

१५.१२ यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

यद् आदित्यगतं तेजो
जगद्द भासयते (अ)खिलम्
यच् चन्द्रमसि, यच् चा (अ)ग्नौ,
तत् तेजो विद्धि मामकम्

यत् आदित्यगतम् तेजः जगत् भासयते अखिलम्
यत् चन्द्रमसि यत् च अग्नौ तत् तेजः विद्धि मामकम्

जो सूर्य में स्थित तेज, अखण्ड जगत् को प्रकाशित करता है, जो चन्द्रमा में और अग्नि में है, वह तेज, तू समझ, मेरा है ।

१५.१३ गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥

गाम् आविश्य च भूतानि --
धारयाम्य् अहम् ओजसा
पुष्णामि चौ (औ)षधीः सर्वाः
सोमो भूत्वा रसात्मकः

गाम् आविश्य च भूतानि धारयामि अहम् ओजसा
पुष्णामि च औषधीः सर्वाः सोमः भूत्वा रसात्मकः

और, पृथ्वी में समाकर (समस्त) जड़-चेतनादि को, अपने बल से मैं थामे रहता हूं । और, सब वनस्पतियों का मैं पोषण करता हूं, रसमय चन्द्रमा होकर ।

**१५.१४ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥**

अहं वैश्वानरो भूत्वा,
प्राणिनां देहम् आश्रितः
प्राणापानसमायुक्तः,
पचाम्य् अन्नं चतुर्विधन्

अहम् वैश्वानरः भूत्वा प्राणिनाम् देहम् आश्रितः
प्राणापानसमायुक्तः पचामि अन्नम् चतुर्विधम्

मैं वैश्वानर (जठराग्नि) होकर, प्राणियों के शरीर में प्रविष्ट हुआ, आने जाने वाली श्वासों से मिल कर चारों प्रकार के भोजन[३] पचाता हूं ।

**१५.१५ सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥**

सर्वस्य चा (अ)हं हृदि संनिविष्टो
मत्तः स्मृतिर् ज्ञानम् अपोहनं च - -
वेदैश् च सर्वैर् अहम् एव वेद्यो
वेदान्तकृद् वेदविद् एव चा (अ)हम्

सर्वस्य च अहम् हृदि संनिविष्टः मत्तः स्मृतिः ज्ञानम् अपोहनम् च
वेदैः च सर्वैः अहम् एव वेद्यः वेदान्तकृत् वेदवित् एव च अहम्

और, सब के हृदय में, मैं बैठा हुं । स्मृति और ज्ञान मुझसे हैं और (उनका) विस्मरण भी; और, सब वेदों द्वारा जानने योग्य भी मैं हूं । वेदान्त का कर्ता और वेद जानने वाला भी मैं हूं ।

(३) भक्ष्य, चोष्य, लेह्य, और पेय ।

१५.१६ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

द्वाव् इमौ पुरुषौ लोके
क्षरश् चा (अ)क्षर एव च - -
क्षरः सर्वाणि भूतानि, - -
कूटस्थो (अ)क्षर उच्यते

द्वौ इमौ पुरुषौ लोके क्षरः च अक्षरः एव च
क्षरः सर्वाणि भूतानि कूटस्थः अक्षरः उच्यते

इस संसार में दो पुरुष हैं - क्षर और अक्षर,[४] सम्पूर्ण जड़-चेतनादि को क्षर, और जो इनमें दृढ स्थित है, उसे अक्षर कहते हैं ।

१५.१७ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

उत्तमः पुरुषस् त्व् अन्यः
परमात्मे (इ)त्य् उदाहृतः
यो लोकत्रयम् आविश्य - -
बिभर्त्य् अव्यय ईश्वरः

उत्तमः पुरुषः तु अन्यः परमात्मा इति उदाहृतः
यः लोकत्रयम् आविश्य बिभर्ति अव्ययः ईश्वरः

वास्तव में, सर्वोपरि पुरुष कोई और है - वह ऐसे 'परमात्मा' कहलाता है, जो तीनों लोकों में समाकर, उनका भरण पोषण करता है, वह अव्यय है, ईश्वर है।

४. अर्थात् नाशवान् और अविनाशी ।

**१५.१८ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरूषोत्तमः ॥**

यस्मात् क्षरम् अतीतो (अ)हम्
अक्षराद् अपि चो (उ)त्तमः
अतो (अ)स्मि लोके वेदे च - -
प्रथितः पुरूषोत्तमः

यस्मात् क्षरम् अतीतः अहम् अक्षरात् अपि च उत्तमः
अतः अस्मि लोके वेदे च प्रथितः पुरुषोत्तमः

क्योंकि मैं क्षर से परे हूं और अक्षर से भी श्रेष्ठ हूं, अतएव लोक और वेद में मुझे 'पुरूषोत्तम' कहा है ।

**१५.१९ यो मामेवमसंमूढो जानाति पुरूषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥**

यो माम् एवम् असंमूढो
जानाति पुरुषोत्तमम्
स सर्वविद् भजति मां
सर्वभावेन भारत - -

यः माम् एवम् असंमूढः जानाति पुरुषोत्तमम्
सः सर्ववित् भजति माम् सर्वभावेन भारत

जो मोहरहित पुरूष मुझे इस प्रकार 'पुरूषोत्तम' जानता है, वह सब कुछ जानता है और मुझे भजता है, सर्वभाव से, भारत ।

**१५.२० इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥**

इति गुह्यतमं शास्त्रम्
इदम् उक्तं मया (अ)नघ - -
एतद्द बुद्ध्वा बुद्धिमान् स्यात्
कृतकृत्यश् च, भारत - -

इति गुह्यतमम् शास्त्रम् इदम् उक्तम् मया अनघ
एतत् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यः च भारत

इस प्रकार यह सर्व गोपनीय शास्त्र, मैं ने कहा है, अनघ ! इसे जान कर (मनुष्य) को बुद्धिमान, और (उसके) कर्त्तव्य कर्म सम्पूर्ण, हो जाना चाहिएं हे भारत !

श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः
समाप्तः

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय-१६

अध्याय ७ में ऐसे ज्ञान का विज्ञान सहित उपदेश किया है जिससे मनुष्य पूर्ण रूप से भगवान् को जान ले। यह उपदेश करते- करते श्लोक ७.२४ में भगवान् ने उन अविवेकी लोगों का उल्लेख मात्र किया "जो मुझ अप्रत्यक्ष को प्रत्यक्ष मानते हैं"।

और फिर, अध्याय ९ में परम गोपनीय राजविद्या बतलाते हुए कहते हैं "मूढ़ लोग मेरा तिरस्कार करते हैं कि मैं मनुष्य शरीर का आश्रय लेता हूं। ऐसे लोग स्वयं राक्षसी और आसुरी वृत्ति का सहारा लिए रहते हैं।"

अध्याय १६ में दैवी और आसुरी स्वभाव वालों का विस्तार से वर्णन करते हैं- विषमताएं बतलाते हुए।

अध्याय १६ का नाम है "दैवासुर संपद् विभाग योग"।

श्रीमद्भगवद् गीता

अथ षोडशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगः)

१६.१ श्रीभगवानुवाच-
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

अभयं सत्त्वसंशुद्धिर्
ज्ञानयोगव् व्यवस्थितिः
दानं दमश् च, यज्ञश् च, - -
स्वाध्यायस् तप आर्जवम्

अभयम् सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः
दानम् दमः च यज्ञः च स्वाध्यायः तपः आर्जवम्

श्रीभगवान् उवाच-
निर्भयता, अन्तःकरण की शुद्धता, ज्ञान और योग में दृढता, दान, इन्द्रियसंयम और यज्ञ, स्वाध्याय, तप और सरलता;

१६.२ **अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।**
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥

अहिंसा सत्यम् अक्रोधस्
त्यागः शान्तिर् अपैशुनम्
दया भूतेष्व् अलोलुप्त्वं,
मार्दवं ह्रीर् अचापलम्

अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनम्
दया भूतेषु अलोलुप्त्वम् मार्दवम् ह्रीः अचापलम्

अहिंसा, सत्य, क्रोध का न होना, त्याग, शान्ति, पीठ पीछे निन्दा न करना, प्राणि मात्र में दया, लिप्सा का अभाव, मृदुता, शील संकोच, अचपलता;

१६.३ **तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।**
भवन्ति संपदं दैवीमभिजातस्य भारत ॥

तेजः क्षमा धृतिः शौचम्
अद्रोहो ना (अ)तिमानिता
भवन्ति संपदं दैवीम्
अभिजातस्य, भारत - -

तेजः क्षमा धृतिः शौचम् अद्रोहः नातिमानिता
भवन्ति संपदम् दैवीम् अभिजातस्य भारत

तेज, क्षमा, सहनशक्ति, पवित्रता, द्वेषरहित होना, अपने को अधिक न मानना, ये हैं उसकी सम्पदाएं- जो दैवी स्वभाव से उत्पन्न हुआ है, भारत !

१६.४ **दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥**

दम्भो दर्पो (अ)भिमानश् च, - -
क्रोधः पारुष्यम् एव च - -
अज्ञानं चा (अ)भिजातस्य, - -
पार्थ, संपदम् आसुरीम्

दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् एव च
अज्ञानम् च अभिजातस्य पार्थ संपदम् आसुरीम्

पाखण्ड, उद्दण्डता और घमण्ड, क्रोध और कर्कशता, और अज्ञान भी; ये हैं उसकी सम्पदाएं, पार्थ । - जो आसुरी स्वभाव से उत्पन्न हुआ है ।

१६.५ **दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥**

दैवी संपद् विमोक्षाय, - -
निबन्धाया (आ)सुरी मता
मा शुचः, संपदं दैवीम्
अभिजातो (अ)सि, पाण्डव - -

दैवी संपत् विमोक्षाय निबन्धाय आसुरी मता
मा शुचः संपदम् दैवीम् अभिजातः असि पाण्डव

दैवी सम्पदाएं, मुक्त करने के लिए हैं, आसुरी, बन्धन में डालने के लिए हैं, ऐसा माना जाता है । तू शोक मत कर । तू (तो) दैवी सम्पदाएं (ही) लेकर उत्पन्न हुआ है, पाण्डव ।

१६.६ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥

द्वौ भूतसर्गौ लोके (अ)स्मिन्,
दैव आसुर एव च - -
दैवो विस्तरशः प्रोक्त, - -
आसुरं पार्थ मे शृणु - -

द्वौ भूतसर्गौ लोके अस्मिन् दैवः आसुरः एव च
दैवः विस्तरशः प्रोक्तः आसुरम् पार्थ मे शृणु

इस लोक में दो प्रकार के प्राणी उत्पन्न होते हैं - दैवी और आसुरी भी। (ऊपर) दैवी प्राणियों का वर्णन विस्तार से किया है, (अब) आसुरी लोगों के विषय में पार्थ ! मुझसे सुन।

१६.७ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥

प्रवृत्तिं च निवृत्तिं च - -
जना न विदुर् आसुराः
न शौचं ना (अ)पि चा (आ)चारो,
न सत्यं तेषु विद्यते

प्रवृत्तिम् च निवृत्तिम् च जनाः न विदुः आसुराः
न शौचम् न अपि च आचारः न सत्यम् तेषु विद्यते

आसुरी लोग नहीं जानते क्या करना चाहिए, और (जो करते हैं, उससे) कैसे मुक्ति पांए। न उनमें पवित्रता है, और न आचरण भी, और न सत्यता।

१६.८ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥

असत्यम् अप्प्रतिष्ठं ते
जगद् आहुर् अनीश्वरम्
अपरस्परसंभूतं,
किम् अन्यत् कामहैतुकम्

असत्यम् अप्रतिष्ठम् ते जगत् आहुः अनीश्वरम्
अपरस्परसंभूतम् किम् अन्यत् कामहैतुकम्

वे कहते हैं, संसार असत्य, निराधार और बिना ईश्वर के है। एक दूसरे के संयोग से उत्पन्न हुआ है, विषयवासना के अतिरिक्त, (इसका), और क्या हेतु है;

१६.९ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥

एतां दृष्टिम् अवष्टभ्य, - -
नष्टात्मानो (अ)ल्पबुद्धयः
प्रभवन्त्य् उग्रकर्माणः,
क्षयाय जगतो (अ)हिताः

एताम् दृष्टिम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः
प्रभवन्ति उग्रकर्माणः क्षयाय जगतः अहिताः

इस दृष्टिकोण से जकड़े हुए, भ्रष्ट-लोग, अल्पबुद्धि, भयंकर कर्म करने वाले, उत्पन्न होते हैं,- संसार का नाश करने के लिए, उसके शत्रु ।

**१६.१० काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥**

कामम् आश्रित्य दुष्पूरं,
दम्भमानमदान्विताः
मोहाद् गृहीत्वा (अ)सद्ग्राहान्,
प्रवर्तन्ते (अ)शुचिव् व्रताः

कामम् आश्रित्य दुष्पूरम् दम्भमानमदान्विताः
मोहात् गृहीत्वा असद्ग्राहान् प्रवर्तन्ते अशुचिव्रताः

कभी न तृप्त होने वाली इच्छाओं का आसरा लेकर, ढोंग, घमण्ड और उन्माद से भरे हुए, मोह के कारण दुर्व्यसनों को पकड़े हुए, ये कर्म करते हैं, अशुद्ध निश्चय वाले ।

**१६.११ चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥**

चिन्ताम् अपरिमेयां च - -
प्रलयान्ताम् उपाश्रिताः
कामोपभोगपरमा,
एतावद् इति निश्चिताः

चिन्ताम् अपरिमेयाम् च प्रलयान्ताम् उपाश्रिताः
कामोपभोगपरमाः एतावत् इति निश्चिताः

अपरिमित, और मृत्यु के साथ ही अन्त होने वाली चिन्ताओं में पड़े - "भोग विलास ही सर्वोच्च है," "यही सब कुछ है", इस प्रकार से आश्वस्त हुए;

१६.१२ **आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।**
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥

आशापाशशतैर् बद्धाः,
कामक् क्रोधपरायणाः
ईहन्ते कामभोगार्थम्
अन्यायेना (अ)र्थसञ्चयान्

आशापाशशतैः बद्धाः कामक्रोधपरायणाः
ईहन्ते कामभोगार्थम् अन्यायेन अर्थसञ्चयान्

आशा की सैंकड़ों रस्सियों में बँधे, काम क्रोध में लीन, वे प्रयास करते हैं भोगविलास के लिए,- अन्याय पूर्वक, ढेर सा धन संग्रह करने का ।

१६.१३ **इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।**
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥

इदम् अद्य मया लब्धम्
इमं प्राप्स्ये मनोरथम्
इदम् अस्ती (इ)दम् अपि मे
भविष्यति पुनर् धनम्

इदम् अद्य मया लब्धम् इमम् प्राप्स्ये मनोरथम्
इदम् अस्ति इदम् अपि मे भविष्यति पुनः धनम्

"आज मैंने इसे पा लिया है । (कल) इस मनोरथ को पा लूंगा । यह धन मेरा है, और भविष्य में भी, फिर, यह मेरा होगा";

१६.१४ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥

असौ मया हतः शत्रुर्
हनिष्ये चा (अ)परान् अपि - -
ईश्वरो (अ)हम् अहं भोगी,
सिद्धो (अ)हं, बलवान् सुखी

असौ मया हतः शत्रुः हनिष्ये च अपरान् अपि
ईश्वरः अहम् अहम् भोगी सिद्धः अहम् बलवान् सुखी

"इस शत्रु को मैंने मार दिया है, और दूसरों को भी मारूंगा । मैं ईश्वर हूं, मैं भोगी हूं, मैं सिद्ध हूं,- बलवान्, सुखी ।

१६.१५ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥

आढ्यो (ऽ)भिजनवान् अस्मि, - -
को (अ)न्यो ।अ)स्ति सदृशो मया
यक्ष्ये दास्यामि मोदिष्य - -
इत्य् अज्ञानविमोहिताः

आढ्यः अभिजनवान् अस्मि कः अन्यः अस्ति सदृशः मया
यक्ष्ये दास्यामि मोदिष्ये - इति अज्ञानविमोहिताः

"मैं धनवान् हूं, कुलीन हूं । मेरे समान दूसरा कौन है; मैं यज्ञ करूंगा, दान दूंगा, आनन्द मनाऊंगा ।" इस प्रकार अज्ञान से मोहित, -

**१६.१६ अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥**

अनेकचित्तविभ्रान्ता,
मोहजालसमावृताः
प्रसक्ताः कामभोगेषु, - -
पतन्ति नरके (अ)शुचौ

अनेकचित्तविभ्रान्ताः मोहजालसमावृताः
प्रसक्ताः कामभोगेषु पतन्ति नरके अशुचौ

अनेक विचारों में भटके, मोहजाल में फंसे, विषयभोगों में डूबे, वे जा गिरते हैं, बीभत्स नरक में ।

**१६.१७ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥**

आत्मसंभाविताः स्तब्धा,
धनमानमदान्विताः
यजन्ते नामयज्ञैस् ते,
दम्भेना (अ)विधिपूर्वकम्

आत्मसंभाविताः स्तब्धाः धनमानमदान्विताः
यजन्ते नामयज्ञैः ते दम्भेन अविधिपूर्वकम्

अपने को स्वयं बड़ा मानने वाले, हठधर्मी, धन के मान और मद से भरे हुए, वे नाम मात्र के लिए यज्ञ करते हैं, दिखावे के साथ, बिना किसी विधि के ।

१६.१८ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥

अहंकारं बलं दर्पं,
कामं क्रोधं च संश्रिताः
माम् आत्मपरदेहेषु - -
प्रद् द्विषन्तो (अ)भ्यसूयकाः

अहंकारम् बलम् दर्पम् कामम् क्रोधम् च संश्रिताः
माम् आत्मपरदेहेषु प्रद्विषन्तः अभ्यसूयकाः

अहंकार, बल, घमण्ड, काम और क्रोध का सहारा लिए (ये) मुझसे, जो उनके और अन्य सबके शरीरों में (रहता) हूं, अत्यन्त द्वेष करते हैं,- छिद्रान्वेषण करने वाले ।

१६.१९ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥

तान् अहं द्विषतः क्रूरान्
संसारेषु नराधमान्
क्षिपाम्य् अजस्रम् अशुभान्
आसुरीष्व् एव योनिषु - -

तान् अहम् द्विषतः क्रूरान् संसारेषु नराधमान्
क्षिपामि अजस्रम् अशुभान् आसुरीषु एव योनिषु

मैं, उन द्वेष करने वाले, निर्दयी, संसार में नीच मनुष्यों को, निरन्तर फेंकता रहता हूं,- अमंगल कारी, आसुरी योनियों में ही ।

**१६.२० आसुरीयोनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥**

आसुरीं योनिम् आपन्ना,
मूढा जन्मनि जन्मनि - -
माम् अप्राप्यै (ए)व, कौन्तेय, - -
ततो यान्त्य् अधमां गतिम्

आसुरीम् योनिम् आपन्नाः मूढाः जन्मनि जन्मनि
माम् अप्राप्य एव कौन्तेय ततः यान्ति अधमाम् गतिम्

आसुरी योनि में गिरकर, ये मोहग्रस्त लोग जन्म जन्म में भी मुझे प्राप्त न करके कौन्तेय । और भी निकृष्ट अवस्था को पहुंच जाते हैं; (नरक में-)

**१६.२१ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥**

त्रिविधं नरकस्ये (इ)दं
द्वारं नाशनम् आत्मनः
कामः क्रोधस् तथा लोभस्
तस्माद् एतत् त्रयं त्यजेत्

त्रिविधम् नरकस्य इदम् द्वारम् नाशनम् आत्मनः
कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयम् त्यजेत्

नरक का यह द्वार तीन प्रकार का है - काम, क्रोध और लोभ - जो मनुष्य के "स्वयं" का नाश करने वाला है। अतएव, इन तीनों का त्याग करना चाहिए ।

१६.२२ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥

एतैर् विमुक्तः कौन्तेय, – –
तमो द्वारैस् त्रिभिर् नरः
आचरत्य् आत्मनः श्रेयस्
ततो याति परां गतिम्

एतैः विमुक्तः कौन्तेय तमोद्वारैः त्रिभिः नरः
आचरति आत्मनः श्रेयः ततः याति पराम् गतिम्

(नारकीय) अन्धकार के इन तीनों द्वारों से मुक्त हुआ मनुष्य, कौन्तेय । अपने कल्याण का आचरण करता है, तत्पश्चात्, सर्वोपरि अवस्था को पहुंच जाता है ।

१६.२३ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥

यः शास्त्रविधिम् उत्सृज्य, – –
वर्तते कामकारतः
न स सिद्धिम् अवाप्नोति, – –
न सुखं न परां गतिम्

यः शास्त्रविधिम् उत्सृज्य वर्तते कामकारतः
न सः सिद्धिम् अवाप्नोति न सुखम् न पराम् गतिम्

जो शास्त्र के नियम को छोड़कर, कामना के प्रोत्साहन में आकर व्यवहार करता है, वह न सिद्धि को प्राप्त होता है, न सुख को, न परम गति को ।

**१६.२४ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥**

तस्माच् छास्त्रं प्रमाणं ते,
कार्याकार्यव्‌व्यवस्थितौ
ज्ञात्वा शास्त्रविधानोक्तं,
कर्म कर्तुम् इहा (अ)र्हसि - -

तस्मात् शास्त्रम् प्रमाणम् ते कार्याकार्यव्यवस्थितौ
ज्ञात्वा शास्त्रविधानोक्तम् कर्म कर्तुम् इह अर्हसि

अतः, शास्त्र तेरा प्रमाण है, कर्तव्य और अकर्तव्य का निर्णय करने के लिए । यह जान कर कि शास्त्र के आदेश क्या हैं, तुझे इस संसार में कर्म करना चाहिए ।

श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः
समाप्तः

गीता प्रकाश

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

परिचय-१७

अध्याय ७, ८ और ९ में ज्ञान विज्ञान, ब्रह्म अक्षर और परम गोपनीय राजविद्या के वर्णन के साथ-साथ कुछ महत्त्वपूर्ण प्रासंगिक उक्तियां की गई हैं। दैवी और आसुरी स्वभाव वालों के सम्बन्ध में की गई उक्ति का विस्तृत वर्णन अध्याय १६ में हुआ। दूसरी, ऐसी उक्ति श्लोक ७.२०-२३ में है कि मनुष्य अपनी-अपनी प्रकृति से विवश हुए, कामनाओं की पूर्ति के लिए अन्य-अन्य देवताओं की शरण लेते हैं, उन-उन देवताओं के नियमों का पालन करते हैं।

मनुष्यों की प्रकृति भिन्न-भिन्न क्यों है ? यह उनकी अपनी-अपनी श्रद्धा के अनुसार है।

श्रद्धा तीन प्रकार की है जिसका अब विस्तार से वर्णन करते हैं।

अध्याय १७ का नाम है "श्रद्धात्रय विभाग योग"।

श्रीमद्भगवद् गीता

अथ सप्तदशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगः)

१७.१ अर्जुन उवाच-
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥

ये शास्त्रविधिम् उत्सृज्य, - -
यजन्ते श्रद्धया (अ)न्विताः
तेषां निष्ठा तु का, कृष्ण, - -
सत्त्वम् आहो रजस् तमः

ये शास्त्रविधिम् उत्सृज्य यजन्ते श्रद्धया अन्विताः
तेषाम् निष्ठा तु का कृष्ण सत्त्वम् आहो रजः तमः

अर्जुन उवाच-
जो शास्त्र में दी विधियों को त्याग कर, यज्ञ करते हैं, (पर) श्रद्धा से भरपूर होकर, उनकी आस्था, हे कृष्ण ! वास्तव में, कैसी है-सात्त्विकी, राजसी अथवा तामसी ?

Agamnigam Digital Preservation Foundation, Chandigarh

१७.२ **श्रीभगवानुवाच–**
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

त्रिविधा भवतिश् श्रद्धा
देहिनां सा स्वभावजा
सात्त्विकी राजसी चै (ए)व – –
तामसी चे (इ)ति तां शृणु

त्रिविधा भवति श्रद्धा देहिनाम् सा स्वभावजा
सात्त्विकी राजसी च एव तामसी च इति ताम् शृणु

श्री भगवान् उवाच–
तीन प्रकार की श्रद्धा है, जो देहधारियों के स्वभाव से उत्पन्न होती है–सात्त्विकी, राजसी और तामसी भी । और, तू उसे इस प्रकार सुन ।

१७.३ **सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।**
श्रद्धामयोऽयं पुरूषो यो यच्छ्रद्धः स एव सः ॥

सत्त्वानुरूपा सर्वस्य – –
श्रद्धा भवति, भारत – –
श्रद्धामयो (अ)यं पुरूषो,
यो यच्छ्रद्धः स एव सः

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत
श्रद्धामयः अयम् पुरुषः यः यच्छ्रद्धः सः एव सः

अपने-अपने स्वभाव के अनुसार सब की श्रद्धा होती है, भारत । यह मनुष्य श्रद्धामय है । जिसकी जैसी श्रद्धा है, वह, वास्तव में, वही है ।

१७.४ **यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।**
प्रेतान्भूतगणान्श्चान्ये यजन्ते तामसा जनाः ॥

यजन्ते सात्त्विका देवान्,
यक्षरक्षांसि राजसाः
प्रेतान् भूतगणांश् चा (अ)न्ये
यजन्ते तामसा जनाः

यजन्ते सात्त्विकाः देवान् यक्षरक्षांसि राजसाः
प्रेतान् भूतगणान् च अन्ये यजन्ते तामसाः जनाः

सात्त्विक लोग देवताओं की पूजा करते हैं । राजस लोग यक्षों और राक्षसों की । और दूसरे, तामस जन, प्रेतों और भूत गणों की पूजा करते हैं ।

१७.५ **अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।**
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥

अशास्त्रविहितं घोरं
तप्यन्ते ये तपो जनाः
दम्भाहंकारसंयुक्ताः,
कामरागबलान्विताः

अशास्त्रविहितम् घोरम् तप्यन्ते ये तपः जनाः
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः

शास्त्र में जिनका आदेश नहीं,ऐसे घोर तप जो मनुष्य करते हैं,- ढोंग और अहंकार के साथ, काम और राग के बल से युक्त,

१७.६ **कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तः शरीरस्थं तान्विद्धयासुरनिश्चयान् ॥**

कर्शयन्तः शरीरस्थं
भूतग्ग्रामम् अचेतसः
मां चै (ए)वा (अ)न्तःशरीरस्थं,
तान् विद्ध्य् आसुरनिश्चयान्

कर्शयन्तः शरीरस्थम् भूतग्रामम् अचेतसः
माम् च एव अन्तः शरीरस्थम् तान् विद्धि आसुरनिश्चयान्

(वे) बुद्धिहीन, शरीर में स्थित (पंच महा) भूतों के समुदाय को यन्त्रणा पहुंचाते हैं और मुझको भी, जो अन्तःकरण में रहता हूं । तू उनको आसुरी निश्चयवाले समझ ।

१७.७ **आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥**

आहारस् त्व् अपि सर्वस्य - -
त्रिविधो भवतिप् प्रियः
यज्ञस् तपस् तथा दानं,
तेषां भेदम् इमं शृणु - -

आहारः तु अपि सर्वस्य त्रिविधः भवति प्रियः
यज्ञः तपः तथा दानम् तेषाम् भेदम् इमम् शृणु

वास्तव में, भोजन भी जो सबको प्रिय है, तीन प्रकार का है । वैसे ही यज्ञ, तप और दान हैं । उनके ये भेद सुन, -

**१७.८ आयुः सत्त्वबलारोग्य सुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराःसात्त्विकप्रियाः ॥**

आयुः सत्त्वबलारोग्य – –
सुखप् प्रीतिविवर्धनाः
रस्याः स्निग्धाः स्थिरा हृद्या
आहाराः सात्त्विकप् प्रियाः

आयुः सत्त्व बल आरोग्य सुख प्रीतिविवर्धनाः
रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः

आयु, (बौद्धिक) शुद्धता, बल, स्वास्थ्य, सुख और प्रीति को बढाने वाले, रसदार, स्निग्ध, पौष्टिक, रुचिकर भोजन, सात्त्विक लोगों को प्रिय हैं ।

**१७.९ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षाविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥**

कट्वम्ल लवणात्युष्ण – –
तीक्ष्ण रूक्ष विदाहिनः
आहारा राजसस्ये (इ)ष्टा,
दुःखशोकामयप् प्रदाः

कटु अम्ल, लवण, अत्युष्ण, तीक्ष्ण, रूक्ष विदाहिनः
आहाराः राजसस्य इष्टाः दुःखशोकामयप्रदाः

कड़वे, खट्टे, खारे, बहुत गर्म, तीखे, रूखे और जलन पैदा करने वाले भोजन, राजस मनुष्य को वांछित हैं – दुःख-शोक और रोग के देने वाले ।

१७.१० यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥

यातयामं गतरसं
पूति पर्युषितं च यत्
उच्छिष्टम् अपि चा (अ)मेध्यं
भोजनं तामसप् प्रियम्

यातयामम् गतरसम् पूति पर्युषितम् च यत्
उच्छिष्टम् अपि च अमेध्यम् भोजनम् तामसप्रियम्

अनपका, रसहीन, दुर्गन्धयुक्त, बासी, जो जूठा और अपवित्र भी है, (ऐसा) भोजन तामस लोगों को प्रिय है ।

१७.११ अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥

अफलाकांक्षिभिर् यज्ञो
विधिदृष्टो य इज्यते
यष्टव्यम् एवे (इ)ति मनः
समाधाय, स सात्त्विकः

अफलाकांक्षिभिः यज्ञः विधिदृष्टः यः इज्यते
यष्टव्यम् एव इति मनः समाधाय सः सात्त्विकः

फल की इच्छा न करने वालों से, जो यज्ञ विधिपूर्वक किया जाता है,–मन में ऐसी धारणा करके कि यही कर्तव्य है, वह सात्त्विक है ।

१७.१२ अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥

अभिसन्धाय तु फलं,
दम्भार्थम् अपि चै (ए)व यत्
इज्यते, भरतश्रेष्ठ, - -
तं यज्ञं विद्धि राजसम्

अभिसन्धाय तु फलम् दम्भार्थम् अपि च एव यत्
इज्यते भरतश्रेष्ठ तम् यज्ञम् विद्धि राजसम्

जो वस्तुतः फल के उद्देश्य से, और अपना महत्त्व दिखाने के लिए भी, किया जाता है, हे भरतश्रेष्ठ ! उस यज्ञ को, तू राजस समझ ।

१७.१३ विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥

विधिहीनम् असृष्टान्नं,
मन्त्रहीनम् अदक्षिणम्
श्रद्धाविरहितं यज्ञं,
तामसं परिचक्षते

विधिहीनम् असृष्टान्नम् मन्त्रहीनम् अदक्षिणम्
श्रद्धाविरहितम् यज्ञम् तामसम् परिचक्षते

जिसमें विधि नहीं, अन्नदान नहीं, मंत्र नहीं, दक्षिणा नहीं, श्रद्धा नहीं, (ऐसे) यज्ञ को, तामस कहते हैं ।

१७.१४ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

देवद्‌द्विजगुरुप्‌प्राज्ञ - -
पूजनं, शौचम् आर्जवम्
ब्रह्मयर्चम् अहिंसा च, - -
शारीरं तप उच्यते

देवद्विज गुरुप्राज्ञपूजनम् शौचम् आर्जवम्
ब्रह्मचर्यम् अहिंसा च शारीरम् तपः उच्यते

देवता, ब्राह्मण, गुरु और ज्ञानी की पूजा, शुद्धता, सरलता, ब्रह्मचर्य और अहिंसा - यह शारीरिक तप कहलाता है ।

१७.१५ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

अनुद्वेगकरं वाक्यं,
सत्यं प्रियहितं च यत्
स्वाध्यायाभ्यसनं चै (ए)व, - -
वाङ्मयं तप उच्यते

अनुद्वेगकरं वाक्यम् सत्यम् प्रियहितम् च यत्
स्वाध्यायाभ्यसनम् च एव वाङ्मयं तपः उच्यते

व्याकुल न करने वाले वचन, जो सत्य, प्रिय और हितकारी हैं, और (धर्म ग्रन्थों के) स्वाध्याय का अभ्यास भी, वाणी सम्बन्धी तप कहलाता है ।

१७.१६ मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥

मनः प्रसादः सौम्यत्वं,
मौनम् आत्मविनिग्रहः
भावसंशुद्धिर् इत्य् एतत्
तपो मानसम् उच्यते

मनः प्रसादः सौम्यत्वम् मौनम् आत्मविनिग्रहः
भावसंशुद्धिः इति एतत् तपः मानसम् उच्यते

मन की प्रसन्नता, भद्रता, मौन रहना, आत्मसंयम, और इस प्रकार विचारों की पवित्रता - यह मानसिक तप कहलाता है ।

१७.१७ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकांक्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥

श्रद्धया परया तप्तं
तपस् तत् त्रिविधं नरैः
अफलाकांक्षिभिर् युक्तैः,
सात्त्विकं परिचक्षते

श्रद्धया परया तप्तम् तपः तत् त्रिविधम् नरैः
अफलाकांक्षिभिः युक्तैः सात्त्विकम् परिचक्षाते

अत्यन्त श्रद्धा से किया गया यह (उपर्युक्त) तीन प्रकार का तप, - यदि बिना फल की इच्छा से, संतुलित मनवाले पुरुषों द्वारा किया जाय, (तो) सात्त्विक कहलाता है ।

१७.१८ सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥

सत्कार मान पूजार्थं
तपो, दम्भेन चै (ए)व, यत्
क्रियते, तद् इहप् प्रोक्तं
राजसं चलम् अध्रुवम्

सत्कारमानपूजार्थम् तपः दम्भेन च एव यत्
क्रियते तत् इह प्रोक्तम् राजसम् चलम् अध्रुवम्

आदर, सम्मान और पूजा के लिए अथवा अपना महत्त्व दिखाने के लिए भी, जो तप किया जाता है, उसे यहां राजस कहते हैं - यह चंचल और अस्थिर है ।

१७.१९ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥

मूढग्ग्राहेणा (आ)त्मनो यत्
पीडया क्रियते तपः
परस्यो (उ)त्सादनार्थं वा,
तत् तामसम् उदाहृतम्

मूढग्राहेण आत्मनः यत् पीडया क्रियते तपः
परस्य उत्सादनार्थम् वा तत् तामसम् उदाहृतम्

जो तप दुराग्रह पूर्वक अपने को कष्ट देकर किया जाता है, अथवा दूसरों का विनाश करने के लिए, उसे तामस कहा गया है ।

१७.२० दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥

दातव्यम् इति यद् दानं
दीयते (अ)नुपकारिणे
देशे काले च पात्रे च, - -
तद् दानं सात्त्विकं स्मृतम्

दातव्यम् इति यत् दानम् दीयते अनुपकारिणे
देशे काले च पात्रे च तत् दानम् सात्त्विकम् स्मृतम्

"देना चाहिए," ऐसे (भाव से), जो दान दिया जाता है उसको, जिससे बदले में कुछ पाना नहीं, देश, काल और सुपात्र को देखते हुए, वह दान सात्त्विक कह कर स्मरण किया जाता है।

१७.२१ यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥

यत् तुप् प्रत्युपकारार्थं
फलम् उद्दिश्य वा पुनः
दीयते च परिक् क्लिष्टं,
तद् दानं राजसं स्मृतम्

यत् तु प्रत्युपकारार्थम् फलम् उद्दिश्य वा पुनः
दीयते च परिक्लिष्टम् तत् दानम् राजसम् स्मृतम्

वास्तव में, जो (दान) बदले में लाभ के लिए, फल के उद्देश्य से, अथवा फिर कष्ट पूर्वक दिया जाता है, वह दान राजस कहकर स्मरण किया जाता है।

**१७.२२ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥**

अदेशकाले यद् दानम्,
अपात्रेभ्यश् च, दीयते
असत्कृतम् अवज्ञातं,
तत् तामसम् उदाहृतम्

अदेशकाले यत् दानम् अपात्रेभ्यः च दीयते
असत्कृतम् अवज्ञातम् तत् तामसम् उदाहृतम्

जो दान न ठीक स्थान में, न ठीक समय में, और न ठीक पात्र को, दिया जाता है,-बिना सत्कार के, तिरस्कार पूर्वक,-वह तामस कहा जाता है ।

**१७.२३ ओम् तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥**

ओम् तत् सद् इति निर्देशो
ब्रह्मणस् त्रिविधः स्मृतः
ब्राह्मणास् तेन वेदाश् च - -
यज्ञाश् च विहिताः पुरा

ओम् तत्सत् इति निर्देशः ब्रह्मणः त्रिविधः स्मृतः
ब्राह्मणाः तेन वेदाः च यज्ञाः च विहिताः पुरा

"ओम् तत् सत्" इस प्रकार के संकेत से ब्रह्म का तीन भांति से स्मरण किया जाता है । इसी (संकेत) से, पूर्व काल में ब्राह्मणों, वेदों और यज्ञों का विधान हुआ है ।

१७.२४ तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

तस्माद् ओम् इत्य् उदाहृत्य, - -
यज्ञदानतपः क्रियाः
प्रवर्तन्ते, विधानोक्ताः,
सततं ब्रह्मवादिनाम्

तस्मात् ओम् इति उदाहृत्य यज्ञदानतपः क्रियाः
प्रवर्तन्ते विधानोक्ताः सततम् ब्रह्मवादिनाम्

अतएव "ओ३म्" ऐसा उच्चारण करके, यज्ञ, दान और तप की क्रियाएं, जो धर्मशास्त्र में कही गई हैं, सदा आरम्भ की जाती हैं, ब्रह्म वेत्ताओं द्वारा ।

१७.२५ तदित्यनभिसंधाय फलं यज्ञतपः क्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः ॥

तद् इत्य् अनभिसंधाय - -
फलं, यज्ञतपः क्रियाः
दानक्क्रियाश् च विविधाः
क्रियन्ते मोक्षकांक्षिभिः

तत् इति अनभिसंधाय फलम् यज्ञतपः क्रियाः
दानक्रियाः च विविधाः क्रियन्ते मोक्षकांक्षिभिः

"तत्" ऐसा (उच्चारण) करते हुए, फल का उद्देश्य त्यागकर, यज्ञ और तप की क्रियाएं, और दान के भिन्न-भिन्न कर्म किए जाते हैं, मोक्ष की इच्छा रखने वालों द्वारा ।

१७.२६ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥

सद्भावे साधुभावे च - -
सद् इत्य् एतद् प्रयुज्यते
प्रशस्ते कर्मणि तथा
सच्छब्दः, पार्थ युज्यते

सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते
प्रशस्ते कर्मणि तथा सत् शब्दः पार्थ युज्यते

सत्य-तत्त्व और साधुता के संदर्भ में जैसे यह "सत्" (शब्द) का प्रयोग होता है, उसी प्रकार प्रशंसनीय कार्य के लिए भी, पार्थ । "सत्" शब्द का प्रयोग होता है ।

१७.२७ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥

यज्ञे तपसि दाने च - -
स्थितिः सद् इति चो (उ)च्यते
कर्म चै (ए)व तदर्थीयं
सद् इत्य् एवा (अ)भिधीयते

यज्ञे तपसि दाने च स्थितिः सत् इति च उच्यते
कर्म च एव तदर्थीयम् सत् इति एव अभिधीयते

और इसी प्रकार यज्ञ, तप और दान में दृढता को भी "सत्" कहते हैं । और, इसी प्रकार, एकमात्र इनके निमित्त किए कर्म को भी, "सत्" का नाम दिया जाता है ।

१७.२८ **अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

अश्रद्धया हुतं दत्तं
तपस् तप्तं कृतं च यत्
असद् इत्य् उच्यते, पार्थ - -
न च तत् प्रेत्य नो इह - -

अश्रद्धया हुतम् दत्तम् तपः तप्तम् कृतम् च यत्
असत् इति उच्यते पार्थ न च तत् प्रेत्य नो इह

अश्रद्धा से किया गया जो हवन, दान, तप, और कर्म है, उसे "असत्", ऐसा कहते हैं, पार्थ । वह न वहां (परलोक में) कुछ हैं, और न यहां ।

श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः समाप्तः

परिचय-१८

अध्याय १४ में प्रकृति से उत्पन्न तीन गुण - सत्त्व, रज और तम की भगवान् ने व्याख्या की। अब अध्याय १८ में इस बात को महत्त्व दे रहे हैं कि ऐसा कहीं कोई अस्तित्व नहीं है जो इन गुणों से मुक्त हो।

और फिर, प्रत्येक मनुष्य के कर्मो का विभाजन भी इन्हीं गुणों के अनुसार है जो उसके स्वभाव से उत्पन्न होते हैं। ब्राह्मण, क्षत्रिय वैश्य और शूद्र कर्म का उल्लेख करके बलपूर्वक भगवान् कहते हैं कि अपना धर्म ही श्रेष्ठ है। "अर्जुन, तेरा क्षत्रिय स्वभाव तुझे युद्ध करने के लिए विवश कर देगा"। सम्पूर्ण गीता संवाद सुनकर अर्जुन का मोह नष्ट हुआ, वह बोल उठा, "जो आप कहेंगे, मैं करूंगा"।

यह गीता का अन्तिम अध्याय है। सम्पूर्ण गीता उपदेश को मानों दोहरा दिया है यह कहकर कि कामना से प्रेरित कर्मों के त्याग को 'संन्यास' समझो और समस्त कर्मो के फल के त्याग को 'त्याग'। इसी त्याग भाव से निरन्तर आप अपने कर्तव्य कर्म कुशलता से करते रहिए - "मुझे अर्पण करके, मोक्ष प्राप्ति के लिए"।

अध्याय १८ का नाम है "मोक्ष संन्यास योग"।

श्रीमद्भगवद् गीता

अथाष्टादशोऽध्यायः

(श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगः)

१८.१ अर्जुन उवाच–
संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥

संन्यासस्य, महाबाहो,
तत्त्वम् इच्छामि वेदितुम्
त्यागस्य च, हृषीकेश, – –
पृथक् केशिनिषूदन – –

संन्यासस्य महाबाहो तत्त्वम् इच्छामि वेदितुम्
त्यागस्य च हृषीकेश पृथक् केशिनिषूदन

अर्जुन उवाच –
हे महाबाहो । मैं जानना चाहता हूँ– "संन्यास का सार क्या है, और त्याग का" ? हे हृषीकेश । अलग-अलग करके, केशिनिषूदन ।

१८.२ श्री भगवानुवाच-
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥

काम्यानां कर्मणां न्यासं
संन्यासं कवयो विदुः
सर्व कर्म फलत् त्यागं
प्राहुस् त्यागं विचक्षणाः

काम्यानाम् कर्मणाम् न्यासम् संन्यासम् कवयः विदुः
सर्वकर्मफलत्यागम् प्राहुः त्यागम् विचक्षणाः

श्री भगवान् उवाच-
कामना से प्रेरित कर्मों के त्याग को, ज्ञानी पुरुष "संन्यास" समझते हैं । समस्त कर्मों के फल के त्याग को, बुद्धिमान् लोग "त्याग" कहते हैं ।

१८.३ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥

त्याज्यं दोषवद् इत्य् एके
कर्म प्राहुर् मनीषिणः
यज्ञदानतपः कर्म - -
न त्याज्यम् इति चा (अ)परे

त्याज्यम् दोषवत् इति एके कर्म प्राहुः मनीषिणः
यज्ञदानतपःकर्म न त्याज्यम् इति च अपरे

कुछ एक विवेकी पुरुष इस प्रकार कहते हैं, कि कर्म का त्याग करना चाहिए जैसे कोई दोष हो, और दूसरे ऐसा कहते हैं, यज्ञ दान और तप कर्म का त्याग नहीं करना चाहिए ।

१८.४ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥

निश्चयं शृणु मे तत्र - -
त्यागे, भरतसत्तम - -
त्यागो हि, पुरुषव् व्याघ्र, - -
त्रिविधः संप्रकीर्तितः

निश्चयम् शृणु मे तत्र त्यागे भरतसत्तम
त्यागः हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः

हे भरतसत्तम । त्याग के सम्बन्ध में मेरा निष्कर्ष सुन । हे पुरुषव्याघ्र । वास्तव में, त्याग तीन प्रकार का कहा गया है ।

१८.५ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥

यज्ञदानतपः कर्म - -
न त्याज्यं, कार्यम् एव तत्
यज्ञो दानं तपश्चै (ए)व - -
पावनानि मनीषिणाम्

यज्ञदानतपःकर्म न त्याज्यम् कार्यम् एव तत्
यज्ञः दानम् तपः च एव पावनानि मनीषिणाम्

यज्ञ दान और तप, ये कर्म त्यागने नहीं चाहिएं । इन्हें करना ही चाहिए । (कारण) यज्ञ दान और तप भी, बुद्धिमान् पुरुषों को पवित्र करने वाले हैं ।

१८.६ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥

एतान्य् अपि तु कर्माणि, - -
संगं त्यक्त्वा फलानि च - -
कर्तव्यानी (इ)ति मे, पार्थ, - -
निश्चितं मतम् उत्तमम्

एतानि अपि तु कर्माणि संगम् त्यक्त्वा फलानि च
कर्तव्यानि इति मे पार्थ निश्चितम् मतम् उत्तमम्

वास्तव में, इन (कर्तव्य) कर्मों को भी, फल और आसक्ति त्यागकर करना चाहिए । ऐसा, मेरा मत है, पार्थ ! निश्चित, उत्तम ।

१८.७ नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥

नियतस्य तु संन्यासः
कर्मणो नो (उ)पपद्यते
मोहात् तस्य परित् त्यागस्
तामसः परिकीर्तितः

नियतस्य तु संन्यासः कर्मणः न उपपद्यते
मोहात् तस्य परित्यागः तामसः परिकीर्तितः

वास्तव में, निर्धारित कर्म से संन्यास, उचित नहीं । मोह वश उसका त्याग, तामस कहा गया है ।

**१८.८ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥**

दुःखम् इत्य् एव यत् कर्म - -
कायक् क्लेशभयात् त्यजेत्
स कृत्वा राजसं त्यागं
नै (ए)वत् त्यागफलं लभेत्

दुःखम् इति एव यत् कर्म कायक्लेशभयात् त्यजेत्
सः कृत्वा राजसम् त्यागम् न एव त्यागफलम् लभेत्

"कर्म दुःखदायी है", इस प्रकार (समझकर), शारीरिक कष्ट के भय से, जो उसे छोड़ देता है, वह राजस त्याग करते हुए भी, त्याग के फल को नहीं पाता ।

**१८.९ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥**

कार्यम् इत्य् एव यत् कर्म - -
नियतं क्रियते (अ)र्जुन - -
संगं त्यक्त्वा फलं चै (ए)व, - -
सतत्यागः सात्त्विको मतः

कार्यम् इति एव यत् कर्म नियतम् क्रियते अर्जुन
संगम् त्यक्त्वा फलम् च एव सः त्यागः सात्त्विकः मतः

निर्धारित कर्म को भी, जो इस प्रकार किया जाता है, अर्जुन ! कि कर्तव्य है - आसक्ति और फल को भी त्यागकर, वह त्याग, सात्त्विक माना गया है ।

१८.१० न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥

न द्वेष्ट्य् अकुशलं कर्म, - -
कुशले ना (अ)नुषज्जते
त्यागी, सत्त्वसमाविष्टो,
मेधावी छिन्नसंशयः

न द्वेष्टि अकुशलम् कर्म कुशले न अनुषज्जते
त्यागी सत्त्वसमाविष्टः मेधावी छिन्नसंशयः

जो अमंगलकारी-कर्म से द्वेष नहीं करता, और मंगलकारी में अनुरक्त नहीं होता, वह त्यागी, सद्भावपूर्ण और बुद्धिमान् है, उसका संशय मिट गया है ।

१८.११ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥

न हि देहभृता शक्यं
त्यक्तुं कर्माण्य् अशेषतः
यस्तु कर्मफलत् त्यागी
सत् त्यागी (इ)त्य् अभिधीयते

न हि देहभृता शक्यम् त्यक्तुम् कर्माणि अशेषतः
यः तु कर्मफलत्यागी सः त्यागी इति अभिधीयते

वास्तव में, देहधारी द्वारा कर्मों का सम्पूर्णतः त्याग हो नहीं सकता । (इसलिए) जो सचमुच कर्म के फल का त्यागी है, वही त्यागी है, ऐसा कहा जाता है ।

१८.१२ **अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥**

अनिष्टम् इष्टं मिश्रं च, - -
त्रिविधं कर्मणः फलम्
भवत्य् अत्यागिनां प्रेत्य, - -
न तु संन्यासिनां क्वचित्

अनिष्टम् इष्टम् मिश्रम् च त्रिविधं कर्मणः फलम्
भवति अत्यागिनाम् प्रेत्य न तु संन्यासिनाम् क्वचित्

अवांछित, वांछित, और मिश्रित - यह कर्म का तीन प्रकार का फल है जो त्याग न करने वालों को, मृत्यु के उपरान्त (भी भोगना) होता है । किन्तु, त्याग करने वालों को, वास्तव में, कभी नहीं ।

१८.१३ **पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥**

पञ्चै (ए)तानि, महाबाहो,
कारणानि निबोध मे
सांख्ये कृतान्ते प्रोक्तानि, - -
सिद्धये सर्वकर्मणाम्

पञ्च एतानि महाबाहो कारणानि निबोध मे
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्

हे महाबाहो । ये पांच कारण हैं, तू मुझसे समझ ले- जो सत् युग के अन्त में (कपिल मुनि द्वारा) सांख्य शास्त्र में कहे गए हैं, सर्व कर्मों की सिद्धि के लिए;[१]

१. गीता में ऐसे और भी ऐतिहासिक निर्देश मिलते हैं।

**१८.१४ अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥**

अधिष्ठानं तथा कर्ता,
करणं च पृथग्विधम्
विविधाश् च पृथक्चेष्टा,
दैवं चै (ए)वा (अ)त्र पञ्चमम्

अधिष्ठानम् तथा कर्ता करणम् च पृथग्विधम्
विविधाः च पृथक् चेष्टाः दैवम् च एव अत्र पञ्चमम्

आधार-स्थान (शरीर), तथा कर्ता, और करण[२], जो पृथक्-पृथक् (साधन) हैं, और नाना प्रकार के अलग-अलग प्रयास और इनके साथ यहां पांचवां दैव भी ।

**१८.१५ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥**

शरीरवाङ् मनोभिर् यत्
कर्मप् प्रारभते नरः
न्याय्यं वा विपरीतं वा,
पञ्चै (ए)ते तस्य हेतवः

शरीरवाङ् मनोभिः यत् कर्म प्रारभते नरः
न्याय्यम् वा विपरीतम् वा पञ्च एते तस्य हेतवः

शरीर, वाणी अथवा मन से जो भी काम मनुष्य प्रारम्भ करता है - चाहे न्याय संगत हो अथवा विपरीत - यही पांच उसके कारण हैं ।

२. "करण" तेरह हैं। देखिए अध्याय १३ श्लोक २०। हमने यहां "साधन" को "करण" का पर्याय माना है।

१८.१६ तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥

तत्रै (ए)वं सति कर्तारम्
आत्मानं केवलं तु यः
पश्यत् अकृतबुद्धित्वान्
न स पश्यति दुर्मतिः

तत्र एवम् सति कर्तारम् आत्मानम् केवलम् तु यः
पश्यति अकृतबुद्धित्वात् न सः पश्यति दुर्मतिः

अब ऐसा होने पर भी, जो सचमुच केवल अपने को ही कर्ता मान बैठता है, (ठीक-ठीक) ज्ञान प्राप्त न होने के कारण, वह समझता नहीं, कुमति ।

१८.१७ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान् न हन्ति न निबध्यते ॥

यस्य ना (अ)हंकृतो भावो,
बुद्धिर् यस्य न लिप्यते
हत्वा (अ)पि स इमाँल् लोकान्
न हन्ति न निबध्यते

यस्य न अहंकृतः भावः बुद्धिः यस्य न लिप्यते
हत्वा अपि सः इमान् लोकान् न हन्ति न निबध्यते

"मैं कर्ता हूँ", जिसकी (ऐसी) भावना नहीं, जिसकी बुद्धि लिप्त नहीं होती, वह इन सब लोगों को मार कर भी, न मारता है, और, न बंधन में पड़ता है, (अपने कर्मों के) ।

**१८.१८ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥**

ज्ञानं ज्ञेयं परिज्ञाता,
त्रिविधा कर्मचोदना
करणं कर्म कर्ते (इ)ति, – –
त्रिविधः कर्मसंग्रहः

ज्ञानम् ज्ञेयम् परिज्ञाता त्रिविधा कर्मचोदना
करणम् कर्म कर्ता इति त्रिविधः कर्मसंग्रहः

ज्ञान, ज्ञेय, और ज्ञाता (ये) तीन प्रकार की कर्म की प्रेरणाएं हैं । ऐसे ही, साधन, क्रिया और कर्ता (मिल कर) कर्म का संघटन करते हैं ।[३]

**१८.१९ ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥**

ज्ञानं कर्म च कर्ता च, – –
त्रिधै (ए)व, गुणभेदतः
प्रोच्यते गुणसंख्याने
यथावच् छृणु तान्य् अपि – –

ज्ञानम् कर्म च कर्ता च त्रिधा एव गुणभेदतः
प्रोच्यते गुणसंख्याने यथावत् श्रृणु तानि अपि

ज्ञान और कर्म और कर्ता, गुणभेद के अनुसार गुणगणना (सांख्य) में तीन प्रकार के ही कहे गए हैं । उन को भी, ठीक ठीक सुन ।

३. देखिए अध्याय १३ श्लोक २० । यहां क्रमशः "साधन" और "क्रिया" को, "करण" और "कार्य" का पर्याय जानना चाहिए ।

१८.२० सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥

सर्वभूतेषु येनै (ए)कं
भावम् अव्ययम् ईक्षते
अविभक्तं विभक्तेषु, - -
तज् ज्ञानं विद्धि सात्त्विकम्

सर्वभूतेषु येन एकम् भावम् अव्ययम् ईक्षते
अविभक्तम् विभक्तेषु तत् ज्ञानम् विद्धि सात्त्विकम्

जिस (ज्ञान) से (मनुष्य) सम्पूर्ण प्राणियों में एक ही अविनाशी स्वरूप को अविभाजित देखता है, भिन्न भिन्न (रूपों) में, उस ज्ञान को तू सात्त्विक जान ।

१८.२१ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥

पृथक्त्वेन तु यज् ज्ञानं
नानाभावान् पृथग्विधान्
वेत्ति, सर्वेषु, भूतेषु, - -
तज् ज्ञानम् विद्धि राजसम्

पृथक्त्वेन तु यत् ज्ञानम् नानाभावान् पृथग्विधान्
वेत्ति सर्वेषु भूतेषु तत् ज्ञानम् विद्धि राजसम्

वास्तव में अलगाव के कारण, जो ज्ञान सम्पूर्ण जड़-चेतनादि में, नाना स्वरूपों को, अलग-अलग जानता है, उस ज्ञान को तू राजस जान ।

१८.२२ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥

यत् तु कृत्स्नवद् एकस्मिन्
कार्ये सक्तम् अहैतुकम्
अतत् त्त्वार्थवद् अल्पं च, - -
तत् तामसम् उदाहृतम्

यत् तु कृत्स्नवत् एकस्मिन् कार्ये सक्तम् अहैतुकम्
अतत्त्वार्थवत् अल्पम् च तत् तामसम् उदाहृतम्

जो (ज्ञान) एक ही वस्तु में आसक्त रहता है जैसे वही सब कुछ है, वह युक्तिहीन, अवास्तविक और संकीर्ण है, उसे तामस कहा जाता है ।

१८.२३ नियतं संगरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥

नियतं संगरहितम्
अरागद् द्वेषतः कृतम्
अफलप् प्रेप्सुना, कर्म - -
यत् तत् सात्त्विकम् उच्यते

नियतम् संगरहितम् अरागद्वेषतः कृतम्
अफलप्रेप्सुना कर्म यत् तत् सात्त्विकम् उच्यते

निर्धारित कर्म, जो बिना आसक्ति के, बिना राग द्वेष के किया जाता है; उसके द्वारा, जो फल की इच्छा नहीं करता, वह सात्त्विक कहलाता है ।

१८.२४ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥

यत् तु कामेप्सुना कर्म, - -
साहंकारेण वा पुनः
क्रियते, बहुलायासं,
तद् राजसम् उदाहृतम्

यत् तु कामेप्सुना कर्म साहंकारेण वा पुनः
क्रियते बहुलायासं तत् राजसम् उदाहृतम्

वास्तव में, जो कर्म भोग-विलास की इच्छा रखने वाले द्वारा, अथवा अहंकार के साथ किया जाता है,- (और) फिर जिस में बहुत परिश्रम हो, वह राजस कहा जाता है ।

१८.२५ अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥

अनुबन्धं क्षयं हिंसाम्
अनपेक्ष्य च पौरुषम्
मोहाद् आरभ्यते कर्म - -
यत् तत् तामसम् उच्यते

अनुबन्धम् क्षयम् हिंसाम् अनपेक्ष्य च पौरुषम्
मोहात् आरभ्यते कर्म यत् तत् तामसम् उच्यते

परिणाम, क्षति, हिंसा और अपनी शक्ति का ध्यान न करके, मोह वश होकर जो कर्म आरम्भ किया जाता है, वह तामस कहलाता है ।

१८.२६ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥

मुक्तसंगो (अ)नहंवादी
धृत्य् उत्साह सम् अन्वितः
सिद्ध्य् असिद्ध्योर् निर्विकारः,
कर्ता सात्त्विक उच्यते

मुक्तसंगः अनहंवादी धृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते

जो आसक्ति से मुक्त है, "अहं" पन में जिसकी आस्था नहीं, जो धैर्य और उत्साह से युक्त है, सफलता और असफलता से जिसमें कोई विकार नहीं आता, (वह) कर्ता सात्त्विक कहलाता है ।

१८.२७ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥

रागी कर्मफलप् प्रेप्सुर्
लुब्धो हिंसात्मको (अ)शुचिः
हर्ष शोकान्वितः कर्ता,
राजसः परिकीर्तितः

रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः

विषयानुरक्त, कर्मफल का इच्छुक, लोभग्रस्त, हिंसक, अपवित्र, हर्ष और शोक से प्रभावित, कर्ता, राजस कहा गया है ।

१८.२८ **अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥**

अयुक्तः प्राकृतः स्तब्धः
शठो नैष्कृतिको (अ)लसः
विषादी दीर्घसूत्री च, – –
कर्ता तामस उच्यते

अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः
विषादी दीर्घसूत्री च कर्ता तामसः उच्यते

अव्यवस्थित, संस्कारहीन, उद्दंड, कपटी, दुर्भावपूर्ण, आलसी, निराश-मन और कार्य में विलम्बी कर्ता, तामस कहलाता है ।

१८.२९ **बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥**

बुद्धेर् भेदं धृतेश् चै (ए)व – –
गुणतस् त्रिविधं शृणु – –
प्रोच्यमानम् अशेषेण – –
पृथक्त्वेन, धनंजय – –

बुद्धेः भेदम् धृतेः च एव गुणतः त्रिविधम् शृणु
प्रोच्यमानम् अशेषेण पृथक्त्वेन धनंजय

बुद्धि और धैर्य के भेद भी, गुणानुसार, तीन प्रकार के हैं । तू सुन, जैसा कहा जा रहा है, निःशेष और अलग-अलग करके, धनंजय !

**१८.३० प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥**

प्रवृत्तिं च निवृत्तिं च, - -
कार्याकार्ये, भयाभये
बन्धं मोक्षं च, या वेत्ति - -
बुद्धिः सा, पार्थ, सात्त्विकी

प्रवृत्तिम् च निवृत्तिम् च कार्याकार्ये भयाभये
बन्धम् मोक्षम् च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी

संसार में अनुरक्ति और (उससे) विरक्ति को, और कर्तव्य-अकर्तव्य, भय-अभय, बन्धन और मोक्ष को, जो बुद्धि जानती है, वह हे पार्थ ! सात्त्विकी है ।

**१८.३१ यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥**

यया धर्मम् अधर्मं च, - -
कार्यं चा (अ)कार्यम् एव च - -
अयथावत् प्रजानाति, - -
बुद्धिः सा, पार्थ, राजसी

यया धर्मम् अधर्मम् च कार्यम् च अकार्यम् एव च
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी

जिस से (मुनष्य) धर्म और अधर्म को, और कर्तव्य और अकर्तव्य को भी, अयथार्थ जानताहै, वह बुद्धि, हे पार्थ ! राजसी है ।

१८.३२ अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥

अधर्मं धर्मम् इति या
मन्यते, तमसा (आ)वृता
सर्वार्थान् विपरीतांश् च, - -
बुद्धिः सा, पार्थ, तामसी

अधर्मम् धर्मम् इति या मन्यते तमसा आवृता
सर्वार्थान् विपरीतान् च बुद्धिः सा पार्थ तामसी

इसी प्रकार जो अधर्म को धर्म मानती है, अन्धकार से घिरी हुई है, और सब वस्तुओं को उलटा (देखती है), वह बुद्धि, हे पार्थ । तामसी है ।

१८.३३ धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥

धृत्या यया धारयते
मनःप्राणेन्द्रियक् क्रियाः
योगेना (अ)व्यभिचारिण्या,
धृतिः सा, पार्थ, सात्त्विकी

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः
योगेन अव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी

जिस धृति से (पुरुष) मन, प्राण और इन्द्रियों की क्रियाओं को योग द्वारा नियंत्रित रखता है-बिना डगमगाए, वह धृति, हे पार्थ । सात्त्विकी है ।

**१८.३४ यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥**

यया तु धर्मकामार्थान्
धृत्या धारयते (अ)र्जुन – –
प्रसंगेन फलाकांक्षी,
धृतिः सा, पार्थ, राजसी

यया तु धर्मकामार्थान् धृत्या धारयते अर्जुन
प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी

वास्तव में, अर्जुन ! जिस धृति से (मनुष्य) धर्म, काम और अर्थ को दृढ़ता से पकड़े रहता है, फल की इच्छा के प्रसंग से, वह धृति, हे पार्थ ! राजसी है ।

**१८.३५ यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥**

यया स्वप्नं भयं शोकं
विषादं मदम् एवं च – –
न विमुञ्चति दुर्मेधा,
धृतिः सा, पार्थ, तामसी

यया स्वप्नम् भयम् शोकम् विषादम् मदम् एव च
न विमुञ्चति दुर्मेधाः धृतिः सा पार्थ तामसी

जिसके कारण निद्रा, भय, शोक, निराशा और घमण्ड को भी, मूढ व्यक्ति छोड़ता नहीं, वह धृति, हे पार्थ ! तामसी है ।

१८.३६ **सुखं त्विदानींत्रिविधं श्रृणु मे भरतर्षभ ।**
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥

सुखं त्व् इदानीं त्रिविधं
श्रृणु मे, भरतर्षभ - -
अभ्यासाद् रमते यत्र, - -
दुःखान्तं च निगच्छति - -

सुखम् तु इदानीम् त्रिविधम् श्रृणु मे भरतर्षभ
अभ्यासात् रमते यत्र दुःखान्तम् च निगच्छति

वास्तव में, सुख (भी) तीन प्रकार का है, जो तू अब मुझ से सुन, भरतर्षभ । अभ्यास से (मनुष्य) जिसमें रमता है और (उसके) दुःख का अन्त हो जाता है;

१८.३७ **यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।**
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥

यत् तद् अग्रे विषम् इव, - -
परिणामे (अ)मृतोपमम्
तत् सुखं सात्त्विकं प्रोक्तम्
आतमबुद्धिप्प्रसादजम्

यत् तत् अग्रे विषम् इव परिणामे अमृतोपमम्
तत् सुखं सात्त्विकम् प्रोक्तम् आतमबुद्धिप्रसादजम्

जो आरम्भ में विष जैसा, परिणाम में अमृत के समान है, वह सुख सात्त्विक कहा गया है - आध्यात्मिक बुद्धि की कृपा से उत्पन्न ।

१८.३८ विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥

विषयेन्द्रियसंयोगाद्,
यत् तद् अग्रे (अ)मृतोपमम्
परिणामे विषम् इव, - -
तत् सुखं राजसं स्मृतम्

विषयेन्द्रियसंयोगात् यत् तत् अग्रे अमृतोपमम्
परिणामे विषम् इव तत् सुखम् राजसम् स्मृतम्

वह, जो विषय और इन्द्रियों के संयोग से (मिलता है), आरम्भ में अमृत के समान, परिणाम में विष जैसा, उस सुख को राजस कह कर स्मरण किया जाता है।

१८.३९ यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥

यद् अग्रे चा (अ)नुबन्धे च - -
सुखं मोहनम् आत्मनः
निद्रालस्यप् प्रमादोत्थं,
तत् तामसम् उदाहृतम्

यत् अग्रे च अनुबन्धे च सुखम् मोहनम् आत्मनः
निद्रालस्यप्रमादोत्थम् तत् तामसम् उदाहृतम्

जो सुख, आरम्भ में, और परिणाम में भी, स्वयं (अपने) को मोह में डालने वाला है, निद्रा, आलस्य और भ्रम-भ्रांति से उत्पन्न हुआ–वह तामस कहा गया है।

१८.४० न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥

न तद् अस्ति पृथिव्यां वा,
दिवि देवेषु वा पुनः
सत्त्वं प्रकृतिजैर् मुक्तं
यद् एभिः स्यात् त्रिभिर् गुणैः

न तत् अस्ति पृथिव्याम् वा दिवि देवेषु वा पुनः
सत्त्वम् प्रकृतिजैः मुक्तम् यत् एभिः स्यात् त्रिभिः गुणैः

ऐसा कोई नहीं है— पृथ्वी पर अथवा आकाश में, और फिर देवताओं के बीच भी,— अस्तित्व, जो प्रकृति से उत्पन्न इन तीन गुणों से मुक्त हो ।

१८.४१ ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥

ब्राह्मणक् क्षत्रियविशां
शूद्राणाम् च, परंतप - -
कर्माणिप् प्रविभक्तानि - -
स्वभावप् प्रभवैर् गुणैः

ब्राह्मणक्षत्रियविशाम् शूद्राणाम् च परंतप
कर्माणि प्रविभक्तानि स्वभावप्रभवैः गुणैः

ब्राह्मण, क्षत्रिय, वैश्य और शूद्रों के कर्मों का, परंतप ! विभाजन किया गया है, गुणों के अनुसार जो उनके स्वभाव से उत्पन्न होते हैं ।

१८.४२ शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

शमो दमस्तपः शौचं,
क्षान्तिर् आर्जवम् एव च - -
ज्ञानं विज्ञानम् आस्तिक्यं,
ब्रह्मकर्मस् स्वभावजम्

शमः दमः तपः शौचम् क्षान्तिः आर्जवम् एव च
ज्ञानम् विज्ञानम् आस्तिक्यम् ब्रह्मकर्म स्वभावजम्

शान्ति, इन्द्रियसंयम, तप, शुचिता, क्षमा और सरलता भी, ज्ञान और अनुभूति, श्रद्धा-विश्वास, - ब्राह्मण के स्वाभाविक कर्म हैं ।

१८.४३ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥

शौर्यंतेजो धृतिर् दाक्ष्यं,
युद्धे चा (अ)प्य् अपलायनम्
दानम् ईश्वरभावश् च, - -
क्षात्रं कर्मस् स्वभावजम्

शौर्यम् तेजः धृतिः दाक्ष्यम् युद्धे च अपि अपलायनम्
दानम् ईश्वरभावः च क्षात्रम् कर्म स्वभावजम्

पराक्रम, तेज धीरज, दक्षता और फिर, युद्ध में पीठ न दिखाना, उदारता और प्रभुता - क्षत्रिय के स्वाभाविक कर्म हैं ।

१८.४४ **कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।**
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥

कृषिगौरक्ष्यवाणिज्यं,
वैश्यकर्मस् स्वभावजम्
परिचर्यात्मकं कर्म, - -
शूद्रस्या (अ)पिस् स्वभावजम्

कृषिगौरक्ष्यवाणिज्यम् वैश्यकर्म स्वभावजम्
परिचर्यातमकम् कर्म शूद्रस्य अपि स्वभावजम्

कृषि, गोरक्षा और व्यापार, वैश्यों के स्वाभाविक कर्म हैं । सेवा-सम्बन्धी कर्म, शूद्र के लिए ही स्वाभाविक हैं ।

१८.४५ **स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।**
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥

स्वे स्वे कर्मण्य् अभिरतः
संसिद्धिं लभते नरः
स्वकर्मनिरतः सिद्धिं
यथा विन्दति तच्छृणु - -

स्वे स्वे कर्मणि अभिरतः संसिद्धिम् लभते नरः
स्वकर्मनिरतः सिद्धिम् यथा विन्दति तत् शृणु

अपने अपने काम में लीन (हर) मनुष्य पूर्ण सिद्धि को प्राप्त करता है । अपने काम में लगा हुआ, (वह) जिस प्रकार सिद्धि को प्राप्त करता है, वह सुन ।

१८.४६ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

यतः प्रवृत्तिर् भूतानां
येन सर्वम् इदं ततम्
स्वकर्मणा तम् अभ्यर्च्य - -
सिद्धिं विन्दति मानवः

यतः प्रवृत्तिः भूतानाम् येन सर्वम् इदम् ततम्
स्वकर्मणा तम् अभ्यर्च्य सिद्धिम् विन्दति मानवः

जिससे जड़-चेतनादि की उत्पत्ति है, जिससे यह सब व्याप्त है, अपने कर्मों द्वारा उसका पूजन करके, मनुष्य सिद्धि को प्राप्त करता है ।

१८.४७ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

श्रेयान् स्वधर्मो विगुणः,
परधर्मात् स्वनुष्ठितात्
स्वभावनियतं कर्म - -
कुर्वन् ना (आ)प्नोति किल्बिषम्

श्रेयान् स्वधर्मः विगुणः परधर्मात् स्वनुष्ठितात्
स्वभावनियतम् कर्म कुर्वन् न आप्नोति किल्बिषम्

अपना धर्म गुणरहित होने पर भी श्रेष्ठ है, पराए धर्म की अपेक्षा जो कुशलता से निभाया गया है । अपने स्वभाव के अनुसार निर्धारित कर्म करते हुए, (मनुष्य) को पाप नहीं लगता ।

**१८.४८ सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥**

सहजं कर्म, कौन्तेय, - -
सदोषम् अपि नत् त्यजेत्
सर्वारम्भा हि दोषेण - -
धूमेना (अ)ग्निर् इवा (आ)वृताः

सहजम् कर्म कौन्तेय सदोषम् अपि न त्यजेत्
सर्वारम्भाः हि दोषेण धूमेन अग्निः इव आवृताः

स्वाभाविक कर्म को, कौन्तेय । दोषपूर्ण होने पर भी, त्यागना नहीं चाहिए । वास्तव में, सम्पूर्ण कार्यक्रम दोष से आच्छादित हैं, जैसे धूएं से अग्नि ।

**१८.४९ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥**

असक्तबुद्धिः सर्वत्र, - -
जितात्मा विगतस् स्पृहः
नैष्कर्म्यसिद्धिं परमां
संन्यासेना (अ)धिगच्छति - -

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः
नैष्कर्म्यसिद्धिम् परमाम् संन्यासेन अधिगच्छति

जिसकी बुद्धि सर्वत्र अनासक्त है, जिसने अपने को जीत लिया है, जिसकी इच्छाएं मिट गई हैं वह संन्यास द्वारा सर्वोपरि "नैष्कर्म्य सिद्धि" को प्राप्त होता है ।[४]

४. "नैष्कर्म्य" केवल कर्मों का अभाव नहीं, उसके लिए शब्द "अकर्म" है। फलेच्छा को त्याग कर अथवा कर्म बन्धन को तोड़ने के लिए जो कर्म किए जाते हैं वे "नैष्कर्म्य" के अंतर्गत आते हैं। ऐसे कर्म करने से मनुष्य, सिद्धि को प्राप्त होता है, जिसे "नैष्कर्म्य सिद्धि" कहा है।

**१८.५० सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥**

सिद्धिं प्राप्तो यथा ब्रह्म - -
तथा (आ)प्नोति निबोध मे
समासेनै (ए)व, कौन्तेय, - -
निष्ठा ज्ञानस्य या परा

सिद्धिम् प्राप्तः यथा ब्रह्म तथा आप्नोति निबोध मे
समासेन एव कौन्तेय निष्ठा ज्ञानस्य या परा

सिद्धि प्राप्त करके जिस प्रकार (मनुष्य) ब्रह्म को पाता है, उसे तू मुझसे केवल संक्षेप में समझ ले, कौन्तेय । जो, ज्ञान की सर्वश्रेष्ठ, अन्तिम अवस्था है ।

**१८.५१ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥**

बुद्ध्या विशुद्धया युक्तो,
धृत्या (आ)त्मानं नियम्य च - -
शब्दादीन् विषयान्स् त्यक्त्वा,
रागद् द्वेषौ व्युदस्य च - -

बुद्ध्या विशुद्धया युक्तः धृत्या आत्मानम् नियम्य च
शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च

शुद्ध बुद्धि से युक्त, और अपने को दृढ़ता से संयम में रख के, शब्द आदि विषयों को त्याग कर, और राग द्वेष को दूर हटा कर -

**१८.५२ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥**

विविक्तसेवी लघ्वाशी,
यतवाक्कायमानसः
ध्यानयोगपरो नित्यं,
वैराग्यं समुपाश्रितः

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः
ध्यानयोगपरः नित्यम् वैराग्यम् समुपाश्रितः

एकान्तसेवी, अल्पाहारी, वाणी, शरीर और मन को संयम में करके, नित्य ध्यान योग में लीन, जिसने वैराग्य की शरण ली है-

**१८.५३ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥**

अहंकारं बलं दर्पं,
कामं क्रोधं परिग्रहम्
विमुच्य निर्ममः शान्तो,
ब्रह्मभूयाय कल्पते

अहंकारम् बलम् दर्पम् कामम् क्रोधम् परिग्रहम्
विमुच्य निर्ममः शान्तः ब्रह्मभूयाय कल्पते

अहंकार, बल, घमण्ड, काम, क्रोध और (अत्यधिक धन-सामग्री के) संग्रह को त्याग कर, ममत्व रहित, शान्तिमय वह, ब्रह्मरूप होने के योग्य हो जाता है ।

**१८.५४ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥**

ब्रह्मभूतः प्रसन्नात्मा,
न शोचति न कांक्षति - -
समः सर्वेषु भूतेषु, - -
मद्भक्तिं लभते पराम्

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति
समः सर्वेषु भूतेषु मद्भक्तिम् लभते पराम्

ब्रह्मरूप हुआ, प्रसन्नचित्त, वह न शोक करता है, न आकांक्षा । सब जड़-चेतनादि में एक समान (दृष्टि रखते हुए), वह मेरी भक्ति को प्राप्त करता है - जो सर्वोपरि है ।

**१८.५५ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥**

भक्त्या माम् अभिजानाति - -
यावान् यश् चा (अ)स्मि तत्त्वतः
ततो मां तत्त्वतो ज्ञात्वा,
विशते तदनन्तरम्

भक्त्या माम् अभिजानाति यावान् यः च अस्मि तत्त्वतः
ततः माम् तत्त्वतः ज्ञात्वा विशते तत् अनन्तरम्

भक्ति द्वारा, वह मुझे भली प्रकार जान लेता है, - मैं जो और जितना हूँ, यथार्थ रूप में । तब मुझे (इस प्रकार) यथार्थ रूप में जान कर, वह तुरन्त ही उस (ब्रह्म) में प्रवेश करता है ।

१८.५६ **सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।**
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥

सर्वकर्माण्य् अपि सदा
कुर्वाणो, मद्व्यपाश्रयः
मत्प्रसादाद् अवाप्नोति - -
शाश्वतं पदम् अव्ययम्

सर्वकर्माणि अपि सदा कुर्वाणः मद्व्यपाश्रयः
मत्प्रसादात् अवाप्नोति शाश्वतम् पदम् अव्ययम्

सब कर्मों को निरन्तर करते हुए भी, मेरी शरण लेकर, (मनुष्य) मेरी कृपा से, सनातन अक्षय धाम को प्राप्त करता है ।

१८.५७ **चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।**
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥

चेतसा सर्वकर्माणि - -
मयि संन्यस्य मत्परः
बुद्धियोगम् उपाश्रित्य, - -
मच्चित्तः सततं भव - -

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः
बुद्धियोगम् उपाश्रित्य मच्चित्तः सततम् भव

मन से सब कर्मों को मुझ में अर्पण करके, मुझ में लीन हुआ, साम्य-बुद्धि का आश्रय लेकर, तू सदैव मुझ में चित्त लगाने वाला हो ।

१८.५८ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥

मच्चित्तः सर्वदुर्गाणि - -
मत्प्रसादात् तरिष् ष्यसि - -
अथ चेत् त्वम् अहंकारान्
न श्रोष्यसि, विनंक्ष्यसि - -

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि
अथ चेत् त्वम् अहंकारात् न श्रोष्यसि विनंक्ष्यसि

मुझ में चित्त लगाए हुए, तू मेरी कृपा से सब विघ्न बाधाओं को पार कर जाएगा । अब, यदि तू अहंकार के कारण नहीं सुनेगा, तो पूर्णतः नष्ट हो जाएगा ।

१८.५९ यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥

यद् अहंकारम् आश्रित्य, - -
न योत्स्य इति मन्यसे
मिथ्यै (ए)ष व्यवसायस् ते,
प्रकृतिस् त्वां नियोक्ष्यति - -

यत् अहंकारम् आश्रित्य न योत्स्ये इति मन्यसे
मिथ्या एषः व्यवसायः ते प्रकृतिः त्वाम् नियोक्ष्यति

जो अहंकार का आश्रय लेकर "मैं युद्ध नहीं करूंगा", तू इस प्रकार सोचता है, तेरा यह निश्चय व्यर्थ है । तेरी प्रकृति तुझे विवश कर देगी, (युद्ध करने के लिए) ।

१८.६० स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥

स्वभावजेन, कौन्तेय - -
निबद्धः स्वेन कर्मणा
कर्तुं ने (इ)च्छसि यन् मोहात् ,
करिष्यस्य् अवशो (अ)पि तत्

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा
कर्तुम् न इच्छसि यत् मोहात् करिष्यसि अवशः अपि तत्

कौन्तेय । अपने स्वाभाविक कर्म से बंधा हुआ, मोह के कारण जो तू करना नहीं चाहता, विवश होकर तुझे वही करना पड़ेगा ।

१८.६१ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥

ईश्वरः सर्वभूतानां
हृद्देशे (अ)र्जुन, तिष्ठति - -
भ्रामयन् सर्वभूतानि - -
यन्त्रारूढानि मायया

ईश्वरः सर्वभूतानाम् हृद्देशे अर्जुन तिष्ठति
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया

ईश्वर सब प्राणियों के हृदय स्थल में निवास करता है, अर्जुन । (और) सब प्राणियों को (ऐसे) घुमाता है, माया के द्वारा, जैसे यन्त्र चालित हों ।

**१८.६२ तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥**

तम् एव शरणं गच्छ - -
सर्वभावेन, भारत - -
तत्प्रसाद्यत् परां शान्तिं
स्थानं प्राप्स्यसि शाश्वतम्

तम् एव शरणम् गच्छ सर्वभावेन भारत
तत्प्रसादात् पराम् शान्तिम् स्थानम् प्राप्स्यसि शाश्वतम्

हे भारत । तू पूर्णरूप से एक मात्र उसीकी शरण में जा । उसकी कृपा से तू सर्वोच्च शान्ति के स्थान को पा जाएगा, जो सदा रहने वाला है ।

**१८.६३ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥**

इति ते ज्ञानम् आख्यातं
गुह्याद् गुह्यतरं मया
विमृश्यै (ए)तद् अशेषेण, - -
यथे (इ)च्छसि तथा कुरु- -

इति ते ज्ञानम् आख्यातम् गुह्यात् गुह्यतरम् मया
विमृश्य एतत् अशेषेण यथा इच्छसि तथा कुरु

इस प्रकार (यह) ज्ञान, जो गोपनीय से भी अधिक गोपनीय है, मैंने तुझे कहा है । इसका तू पूर्ण रूप से चिन्तन मनन करके, जैसी तेरी इच्छा हो, वैसा कर ।

१८.६४ **सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।**
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥

सर्वगुह्यतमं भूयः
शृणु मे परमं वचः
इष्टो (अ)सि मे दृढम् इति, - -
ततो वक्ष्यामि ते हितम्

सर्वगुह्यतमम् भूयः शृणु मे परमम् वचः
इष्टः असि मे दृढम् इति ततः वक्ष्यामि ते हितम्

फिर सुन, मेरा सर्वोपरि वचन-जो गोपनीय रहस्यों में भी सबसे अधिक गोपनीय है । ऐसे भी तू मेरा गहरा प्रिय (मित्र) है, इसलिए मैं तेरे भले की कहूंगा ।

१८.६५ **मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।**
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥

मन्मना भव, मद्भक्तो,
मद्याजी, मां नमस्कुरू - -
माम् एवै (ए)ष्यसि, सत्यं ते
प्रतिजाने, प्रियो (अ)सि मे

मन्मनाः भव मद्भक्तः मद्याजी माम् नमस्कुरु
माम् एव एष्यसि सत्यम् ते प्रतिजाने प्रियः असि मे

मुझ में मन लगा, मेरा भक्त हो, मेरे निमित्त यज्ञ कर, मुझे नमस्कार कर । तू मुझे ही आ मिलेगा । मैं तुझे सत्य वचन देता हूं (कारण), तू मुझे प्रिय है ।

१८.६६ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

सर्वधर्मान् परित्यज्य, - -
माम् एकं शरणं व्रज - -
अहं त्वा सर्वपापेभ्यो
मोक्षयिष्यामि, मा शुचः

सर्वधर्मान् परित्यज्य माम् एकम् शरणम् व्रज
अहम् त्वा सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः

सब धर्म-कर्म[५] को त्यागकर, तू एक मेरी शरण में आ जा । मैं तुझे सब पापों से मुक्त करूंगा । दुःखी मत हो ।

१८.६७ इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥

इदं ते ना (अ)तपस्काय - -
ना (अ)भक्ताय कदाचन - -
न चा (अ)शुश्रूषवे वाच्यं,
न च मां यो (अ)भ्यसूयति - -

इदम् ते न अतपस्काय न अभक्ताय कदाचन
न च अशुश्रूषवे वाच्यम् न च माम् यः अभ्यसूयति

जो तपस्वी नहीं है, भक्त नहीं है और जो सुनना नहीं चाहता, उसे यह (ज्ञान) तुझे कभी नहीं कहना चाहिए, और न उसे, जो मेरी निन्दा करता है ।

५. लोकधर्म अथवा लोकव्यवहार जो नाना सम्बन्धों के माध्यम से निर्मित है

**१८.६८ य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥**

य इमं परमं गुह्यं
मद्भक्तेष्व् अभिधास्यति – –
भक्तिं मयि परां कृत्वा
माम् एवै (ए)ष्यत्य् असंशयः

यः इमम् परमम् गुह्यम् मद्भक्तेषु अभिधास्यति
भक्तिम् मयि पराम् कृत्वा माम् एव एष्यति असंशयः

जो इस सर्वोच्च रहस्य को मेरे भक्तो में प्रकट करेगा, मुझमें परम भक्ति रखता हुआ, वह मुझे ही आ मिलेगा, इसमें संदेह नहीं ।

**१८.६९ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥**

न च तस्मान् मनुष्येषु – –
कश्चिन् मे प्रियकृत्तमः
भविता, न च मे तस्माद्
अन्यः प्रियतरो भुवि – –

न च तस्मात् मनुष्येषु कश्चित् मे प्रियकृत्तमः
भविता न च मे तस्मात् अन्यः प्रियतरः भुवि

और न उसके अतिरिक्त, मनुष्यों में कोई ऐसा है, जो मेरा सबसे अधिक प्रिय कार्य करने वाला हो, और न उसके अतिरिक्त मुझे कोई दूसरा अधिक प्रिय होगा, पृथ्वी पर ।

**१८.७० अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ।।**

अध्येष्यते च य इमं
धर्म्यं संवादम् आवयो:
ज्ञानयज्ञेन तेना (अ)हम्
इष्टः स्याम् इति मे मतिः

अध्येष्यते च यः इमम् धर्म्यम् संवादम् आवयोः
ज्ञानयज्ञेन तेन अहम् इष्टः स्याम् इति मे मतिः

और, जो हम दोनों के इस धार्मिक संवाद का अध्ययन करेगा , उसके द्वारा ज्ञान यज्ञ से, मेरी पूजा होगी ऐसा मेरा विचार है ।

**१८.७१ श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ।।**

श्रद्धावान् अनसूयश् च - -
शृणुयाद् अपि यो नरः
सो (अ)पि मुक्तः शुभाँल् लोकान्
प्राप्नुयात् पुण्यकर्मणाम्

श्रद्धावान् अनसूयः च शृणुयात् अपि यः नरः
सः अपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम्

जो श्रद्धालु और निन्दा न करने वाला मनुष्य (इसे) केवल सुनता ही है, वह भी मुक्त होकर शुभ लोकों को प्राप्त होता है - जो पुण्य कर्म करने वालों के हैं ।

१८.७२ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥

कच्चिद् एतच् छ्रुतं, पार्थ, - -
त्वयै (ए)काग्रेण चेतसा
कच्चिद् अज्ञानसंमोहः
प्रनष्टस् ते, धनंजय - -

कच्चित् एतत् श्रुतम् पार्थ त्वया एकाग्रेण चेतसा
कच्चित् अज्ञानसंमोहः प्रनष्टः ते धनंजय

हे पार्थ । क्या तू ने इसे सुना, एकाग्र चित्त से ? क्या तेरा अज्ञान (जनित) मोह, पूर्णतया नष्ट हुआ, धनंजय ?

१८.७३ अर्जुन उवाच-
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥

नष्टो मोहः स्मृतिर् लब्धा,
त्वत्प्रसादान् मया (अ)च्युत - -
स्थितो (अ)स्मि गतसन्देहः,
करिष्ये वचनं तव - -

नष्टः मोहः स्मृतिः लब्धा त्वत्प्रसादात् मया अच्युत
स्थितः अस्मि गतसन्देहः करिष्ये वचनम् तव

अर्जुन उवाच-
(मेरा) मोह नष्ट हो गया है । (भूले हुए ज्ञान की) स्मृति मैंने प्राप्त कर ली है, आप की दया से, हे अच्युत[६] । (अब) मैं स्थिर हूं । सन्देह दूर हो गया है । आप का कहा, करूंगा ।

६. गीता के आरम्भ में भी अर्जुन ने भगवान् को 'अच्युत' कह कर सम्बोधित किया है । (देखिए अध्याय १ श्लोक २१) दोनों अवसरों पर अर्जुन की मनःस्थिति की तुलना करें । (देखें गीता पाठमाला)

१८.७४ संजय उवाच-
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्‌भुतं रोमहर्षणम् ॥

इत्य् अहं वासुदेवस्य - -
पार्थस्य च महात्मनः
संवादम् इमम् अश्रौषम्
अद्‌भुतं रोमहर्षणम्

इति अहम् वासुदेवस्य पार्थस्य च महात्मनः
संवादम् इमम् अश्रौषम् अद्‌भुतम् रोमहर्षणम्

संजय उवाच-
इस प्रकार वासुदेव और महात्मा पार्थ का यह संवाद मैं ने सुना - अद्‌भुत, रोमांचकारी ;

१८.७५ व्यासप्रसादाच्छ्रुतवानेतद्‌गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥

व्यासप्प्रसादाच् छ्रुतवान्
एतद् गुह्यम् अहं परम्
योगं योगेश्वरात् कृष्णात्
साक्षात् कथयतः स्वयम्

व्यासप्रसादात् श्रुतवान् एतत् गुह्यम् अहम् परम्
योगम् योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्

व्यासजी की कृपा से, मैंने इस सर्वोपरि गोपनीय योग को सुना, साक्षात् योगेश्वर कृष्ण से, स्वयं कहते हुए ।

**१८.७६ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥**

राजन् संस्मृत्य संस्मृत्य, - -
संवादम् इमम् अद्भुतम्
केशवार्जुनयोः पुण्यं,
हृष्यामि च मुहुर्मुहुः

राजन् संस्मृत्य संस्मृत्य संवादम् इमम् अद्भुतम्
केशवार्जुनयोः पुण्यम् हृष्यामि च मुहुर्मुहुः

हे राजन् ।[७] केशव और अर्जुन के इस अद्भुत पुण्यमय संवाद को, मैं स्मरण कर-कर के हर्षित होता हूं, और बार-बार ।

**१८.७७ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन्हृष्यामि च पुनः पुनः ॥**

तच् च संस्मृत्य संस्मृत्य, - -
रूपम् अत्यद्भुतं हरेः
विस्मयो मे महान्, राजन्,
हृष्यामि च पुनः पुनः

तत् च संस्मृत्य संस्मृत्य रूपम् अति अद्भुतम् हरेः
विस्मयः मे महान् राजन् हृष्यामि च पुनः पुनः

और, हरि के उस अत्यंत चामत्कारिक रूप को स्मरण कर कर के मुझे बड़ा आश्चर्य होता है, राजन् । और मैं हर्ष से पुलकित हो जाता हूं, बार-बार ।

७. धृतराष्ट्र

१८.७८ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र योगेश्वरः कृष्णो,
यत्र पार्थो धनुर्धरः
तत्रश् श्रीर् विजयो भूतिर्
ध्रुवा नीतिर् मतिर् मम - -

यत्र योगेश्वरः कृष्णः यत्र पार्थः धनुर्धरः
तत्र श्रीः विजयः भूतिः ध्रुवा नीतिः मतिः मम

जहां योगेश्वर कृष्ण हैं, जहां धनुर्धारी पार्थ है, वहीं लक्ष्मी है, विजय है, वैभव है, अविचल नीति है- यह मेरी धारणा है ।

श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः समाप्तः

श्री कृष्णार्पणमस्तु । शुभं भवतु ।
ओम् शान्तिः शान्तिः शान्तिः

गीता व्याकरण

१. प्रस्तावना

गीता कोश में शब्द का अर्थ, पद व्याख्या और उन श्लोकों का निर्देश भी है, जहां-जहां शब्द का प्रयोग हुआ है। यहां हम पाठकों का साधारण सा परिचय संस्कृत भाषा के व्याकरण के कुछ नियमो से करा देना चाहते हैं जिससे उन्हें गीता के श्लोक समझने में सहायता मिले। संस्कृत भाषा के व्याकरण की विशेषताओं को तालिकाबद्ध रूप से समझाने का प्रयास किया गया है जो सरल और सहज प्रतीत होता है। जिस प्रकार मानचित्रों के देखने से भूगोल ज्ञान के अध्ययन में सहायता मिलती है वैसे ही ये तालिकाएं संस्कृत व्याकरण की विशेषताओंको बोधगम्य कराने में सहायक होनी चाहिए। हमारा ध्येय पाठकों को संस्कृत शब्दों की साधारण व्याकरणिक जानकारी कराना भर है, न कि उनकी व्युत्पत्ति का वर्णन करना।

हम यह मान कर चल रहे हैं कि हमारे पाठकों को हिन्दी भाषा के व्याकरण का साधारण ज्ञान है। उन्हें यह बतलाने की आवश्यकता नहीं कि संस्कृत देवनागरी लिपि में लिखी जाती है; स्वर क्या हैं ? व्यंजन क्या हैं ? इसके अतिरिक्त, संज्ञा, विषेशण सर्वनाम, क्रिया, क्रिया विशेषण, अव्ययों और प्रत्ययों के भेद भी क्या-क्या हैं ? हम केवल उन बातों का ही उल्लेख करेंगे जो संस्कृत भाषा के व्याकरण की विशेषताएं दर्शाती हैं, जिससे पाठक गीता के मूलरूप श्लोकों को और भली प्रकार समझ कर, आनन्द ले सकें।

२. *विभक्ति*

संस्कृत भाषा में सम्बन्ध-बोधक चिन्ह अलग से नहीं हैं, जैसे हिन्दी में जो नीचे चार्ट में दिखाए गए हैं। सम्बन्ध दर्शाने के लिए संस्कृत भाषा में शब्द के साथ विभक्ति लगा दी जाती है। यह शब्द के अन्त में लगा हुआ वह प्रत्यय या चिन्ह है जो यह बतलाता है कि उस शब्द का दूसरे शब्द से या क्रिया पद से क्या सम्बध है। विभक्तियाँ आठ प्रकार की हैं।

विभक्तियाँ		कारक	हिन्दी-भाषा के सम्बन्ध बोधक चिन्ह	उदाहरण एकवचन
१.	प्रथमा	कर्ता	ने	रामः
२.	द्वितीया	कर्म	को	रामम्
३.	तृतीया	करण	से, के द्वारा,	रामेण
४.	चतुर्थी	सम्प्रदान	के लिए, को	रामाय
५.	पंचमी	अपादान	से (पृथक होना), की अपेक्षा	रामात्
६.	षष्ठी*	सम्बन्ध	का, की, के; रा, री, रे	रामस्य
७.	सप्तमी	अधिकरण	में, पर	रामे
८.	सम्बोधन*	सम्बोधन	हे, ओ, अरे	(हे) राम

*क्रिया पद के साथ प्रत्यक्ष सम्बध न दिखाने के कारण सम्बन्ध और सम्बोधन कारकों को कारक नहीं माना जाता।

(क) अव्यय और नियत लिंग के शब्दों को छोड़कर, विभक्ति द्वारा शब्द का

वचन और लिंग भी दर्शाया जाता है, जैसे

शब्द	वचन			लिंग
	एक	द्वि	बहु	
राम	रामः	रामौ	रामाः	पुंल्लिंग
मति	मतिः	मती	मतयः	स्त्रीलिंग
फल	फलम्	फले	फलानि	नपुंसकलिंग

(ख) विभक्तियों के अन्य उपयोगों के लिए आगे देखिए प्रकरण (७) के अन्तर्गत।

३. *लिंग*

हिन्दी में केवल दो लिंग हैं – स्त्रीलिंग और पुंल्लिंग। संस्कृत में इन दो लिंगो के अतिरिक्त एक और लिंग है जिसे नपुंसकलिंग कहते हैं। एक ही वस्तु का बोध कराने वाला कोई शब्द पुंल्लिंग, कोई स्त्रीलिंग, कोई नपुंसकलिंग में भी होता है। जैसे तनु (स्त्रीलिंग) देह (पुंल्लिंग) और शरीरम् (नपुंसकलिंग)। सब का एक ही अर्थ है– शरीर। "दाराः" शब्द पुंल्लिंग में है, "कलत्र" नपुंसकलिंगी शब्द है जबकि दोनों का अर्थ है "स्त्री"। "देवता" शब्द स्त्रीलिंग में होते हुए भी देव (पुरुष) का अर्थ बताता है। और "मित्र" (दोस्त) नपुंसकलिंग में है। और फिर कई शब्द उभयलिंगी होते हैं जैसे 'देह'। इसका पुंल्लिंग और नपुंसकलिंग में प्रयोग होता है और भिन्न-भिन्न अर्थों में। इसी कारण संस्कृत में संज्ञाओं का लिंग जानना बड़ा कठिन हो जाता है। इसके जानने के लिए कोश और व्याकरण के अध्ययन की आवश्यक्ता पड़ती है।

लिंगों की जानकारी के लिए गीता-कोश में "शब्द" के सामने हम एक संकेत-सूचक शब्द दे रहे हैं। जैसे "गुरु" "धेनु" "बहु" यद्यपि तीनों शब्द उकारान्त हैं पर "गुरु" पुंल्लिंग, "धेनु" "स्त्रीलिंग", और "बहु" नपुंसकलिंग में है। ऐसे प्रत्येक सूचक-शब्द के लिए जो गीता में प्रयुक्त है, एक तालिका है जिसे देखने से यह पता चल जायेगा कि शब्द का लिंग क्या है। देखिए तालिका पृष्ठ ४१२ पर ।

४. वचन

हिन्दी मे केवल दो वचन हैं; एक वचन और बहुवचन। इनके अतिरिक्त संस्कृत में "द्विवचन" भी है। इससे दो का बोध होता है। प्रत्येक वचन के अनुसार विभक्ति का रूप बदल जाता है। यद्यपि हम तालिकाओं में "द्विवचन" के विभक्ति रूप दे रहें हैं, पर हमारे पाठक इन पर अभी कोई विशेष ध्यान न दें। गीता में द्विवचन का प्रयोग नहीं के बराबर है।

५. संज्ञा शब्द

शब्द स्वरान्त और व्यंजनान्त होते हैं। और इस प्रकार के हर शब्द का विभक्ति रूप अलग-अलग है जो तालिकाओं को देखने से सहज समझ में आ जायेगा, रटने की आवश्यकता नहीं। श्रीमद्भगवद्गीता में जो संज्ञा शब्द प्रयुक्त हैं, उनके संकेत- सूचक शब्द के लिए देखिए तालिका, पृष्ठ ४१२ पर। ये शब्द किस प्रकार चलाए जाते हैं, इसके लिए निम्न नम्बर की तालिकाएं देखें:-

	तालिका नम्बर		
शब्द	पुंल्लिंग	स्त्रीलिंग	नपुंसकलिंग
स्वरान्त	१	२	३
व्यंजनान्त	४ (१-४)	५	६ (१-२)

इनके अतिरिक्त कतिपय प्रयोग वाले निम्नलिखित शब्द भी हैं,
स्वरांत- ऊष्मपा (पु) चमू (स्त्री) पितृ (पु) सुधी (पु) भ्रू (स्त्री.)
व्यंजनांत- उशनस् (पु.) कामधुक् (पु) ऋत्विज् (पु) शर्मन् (पु)
भास् (स्त्री) सम्पद् (स्त्री) नामन् (नपुं) महत् (नपुं)। ऐसे शब्दों को चलाए जाने की तालिकाएं हम अलग से नहीं दे रहे हैं।

तालिका-संकेत सूचक शब्द

	लिंग		
	पुंल्लिंग	स्त्रीलिंग	नपुंसकलिंग
१. स्वरान्त			
अकारान्त	राम		फल
आकारान्त		विद्या	
इकारान्त	हरि, सखि	मति	वारि, पु॰
ईकारान्त		नदी, स्त्री	
उकारान्त	गुरु	धेनु	बहु
ऋकारान्त	धातृ	मातृ	कर्तृ
ओकारान्त	गो		
२. व्यंजनान्त			
चकारान्त		वाॅच् (वाणी)	
तकारान्त	मरुत्		जगत्
	धीमत्		नश्यत्
	ध्यायत्		
	महत्		
दकारान्त	तत्त्वविद्		
धकारान्त	युध्		
नकारान्त	अर्यमन्		अहन्
	आत्मन्		जन्मन्
	राजन्		कर्मन्
	पथिन्		
	श्वन्		
	शशिन्		
पकारान्त		अप् (नित्य बहुवचन)	
रकारान्त		गिर् (वाणी)	
वकारान्त		दिव्	
शकारान्त	ईदृश् , विश्	दिश् ,	
सकारान्त	चन्द्रमस्		मनस्
	गरीयस्		धनुस्
	पुमस्		हविस्
	विद्वस्		

विशेषण

हिन्दी में कभी तो विशेष्य के लिंग के अनुसार विशेषण बदलता है जैसे – भूरी गाय, भूरा घोड़ा, कभी नहीं जैसे लाल गाय, लाल घोड़ा। इसी प्रकार वचन के अनुसार भी परिवर्तन होता है – जैसे काला कुत्ता, काले कुत्ते। हिन्दी में विभक्ति चिन्ह का, (अलग से होने के कारण) कोई प्रभाव विशेषण-विशेष्य पर नहीं पड़ता, परन्तु, संस्कृत में विशेष्य के लिंग, वचन और विभक्ति के अनुसार ही, विशेषण भी उसी लिंग, वचन और विभक्ति में होता है – जैसे समान लिंग (पुं) श्वेतः अश्वः (स्त्री.) श्वेता वाटिका।
(नपुं) श्वेतं पुष्पम्।

समान वचन (१ वचन) चतुरा बालिका (२ वचन) चतुरे बालिके
(बहु वचन) चतुराः बालिकाः

समान विभक्ति (१) चतुरः बालः,
(२) चतुरं बालम्,
(३) चतुरेण बालेन,
(४) चतुराय बालाय,
(५)चतुरात् बालात् ,
(६) चतुरस्य बालस्य
(७) चतुरे बाले,
(८) चतुर बाल।

यह व्याख्या हम आप की साधारण जानकारी के लिए कर रहे हैं। गीता में विशेषण-विशेष्य का प्रयोग अधिक नहीं है।

तालिका नं. १

अजन्त पुंल्लिंगाः शब्दाः

अकारान्त, इकारान्त, उकारान्त, ऋकारान्त, ओकारान्त

	राम	हरि	सखि	गुरू	धातृ	गो
एकवचन						
प्र.	रामः	हरिः	सखा	गुरूः	धाता	गौः
द्वि.	रामम्	हरिम्	सखायम्	गुरूम्	धातारम्	गाम्
तृ.	रामेण	हरिणा	सख्या	गुरूणा	धात्रा	गवा
च.	रामाय	हरये	सख्ये	गुरवे	धात्रे	गवे
पं.	रामात्	हरेः	सख्युः	गुरोः	धातुः	गोः
ष.	रामस्य	हरेः	सख्युः	गुरोः	धातुः	गोः
स.	रामे	हरौ	सख्यौ	गुरौ	धातरि	गवि
संबो.	हे राम	हे हरे	हे सखे	हे गुरो	हे धातः	हे गौः
द्विवचन						
प्र.	रामौ	हरी	सखायौ	गुरू	धातारौ	गावौ
द्वि.	रामौ	हरी	सखायौ	गुरू	धातारौ	गावौ
तृ.	रामाभ्याम्	हरिभ्याम्	सखिभ्याम्	गुरूभ्याम्	धातृभ्याम्	गोभ्याम्
च.	रामाभ्याम्	हरिभ्याम्	सखिभ्याम्	गुरूभ्याम्	धातृभ्याम्	गोभ्याम्
पं.	रामाभ्याम्	हरिभ्याम्	सखिभ्याम्	गुरूभ्याम्	धातृभ्याम्	गोभ्याम्
ष.	रामयोः	हर्योः	सख्योः	गुर्वोः	धात्रोः	गवोः
स.	रामयोः	हर्योः	सख्योः	गुर्वोः	धात्रोः	गवोः
संबो.	हे रामौ	हे हरी	हे सखायौ	हे गुरू	हे धातारौ	हे गावौ
बहुवचन						
प्र.	रामाः	हरयः	सखायः	गुरवः	धातारः	गावः
द्वि.	रामान्	हरीन्	सखीन्	गुरून्	धातृन्	गाः
तृ.	रामैः	हरिभिः	सखिभिः	गुरुभिः	धातृभिः	गोभिः
च.	रामेभ्यः	हरिभ्यः	सखिभ्यः	गुरूभ्यः	धातृभ्यः	गोभ्यः
पं.	रामेभ्यः	हरिभ्यः	सखिभ्यः	गुरूभ्यः	धातृभ्यः	गोभ्यः
ष.	रामाणाम्	हरीणाम्	सखीनाम्	गुरूणाम्	धातृणाम्	गवाम्
स.	रामेषु	हरिषु	सखिषु	गुरूषु	धातृषु	गोषु
संबो.	हे रामाः	हे हरयः	हे सखायः	हे गुरवः	हे धातारः	हे गावः

अजन्त स्त्रीलिंगाः शब्दाः

तालिका नं. २

आकारान्त, इकारान्त, ईकारान्त, उकारान्त, ऋकारान्त

	विद्या	मति	नदी	स्त्री	धेनु	मातृ
एकवचन						
प्र.	विद्या	मतिः	नदी	स्त्री	धेनुः	माता
द्वि	विद्याम्	मतिम्	नदीम्	स्त्रियम्,स्त्रीम्	धेनुम्	मातरम्
तृ.	विद्यया	मत्या	नद्या	स्त्रिया	धेन्वा	मात्रा
च.	विद्यायै	मत्यै	नद्यै	स्त्रियै	धेन्वै,धेनवे	मात्रे
पं.	विद्यायाः	मत्याः,मतेः	नद्याः	स्त्रियाः	धेन्वाः,धेनोः	मातुः
ष.	विद्यायाः	मत्याः,मतेः	नद्याः	स्त्रियाः	धेन्वाः,धेनोः	मातुः
स.	विद्यायाम्	मत्याम्,मतो	नद्याम्	स्त्रियाम्	धेन्वाम् ,धेनौ	मातरि
संबो	हे विद्ये	हे मते	हे नदि	हे स्त्रि	हे धेनो	हे मातः
द्विवचन						
प्र.	विद्ये	मती	नद्यौ	स्त्रियौ	धेनू	मातरौ
द्वि.	विद्ये	मती	नद्यौ	स्त्रियौ	धेनू	मातरौ
तृ.	विद्याभ्याम्	मतिभ्याम्	नदीभ्याम्	स्त्रीभ्याम्	धेनुभ्याम्	मातृभ्याम्
च.	विद्याभ्याम्	मतिभ्याम्	नदीभ्याम्	स्त्रीभ्याम्	धेनुभ्याम्	मातृभ्याम्
पं.	विद्याभ्याम्	मतिभ्याम्	नदीभ्याम्	स्त्रीभ्याम्	धेनुभ्याम्	मातृभ्याम्
ष.	विद्ययोः	मत्योः	नद्योः	स्त्रियोः	धेन्वोः	मात्रोः
स.	विद्ययोः	मत्योः	नद्योः	स्त्रियौः	धेन्वोः	मात्रोः
संबो.	हे विद्ये	हे मती	हे नद्यौ	हे स्त्रियौ	हे धेनू	हे मातरौ
बहुवचन						
प्र.	विद्याः	मतयः	नद्यः	स्त्रियः	धेनवः	मातरः
द्वि.	विद्याः	मतीः	नदीः	स्त्रियः,स्त्रीः	धेनूः	मातॄः
तृ	विद्याभिः	मतिभिः	नदीभिः	स्त्रीभिः	धेनुभिः	मातृभिः
च.	विद्याभ्यः	मतिभ्यः	नदीभ्यः	स्त्रीभ्यः	धेनुभ्यः	मातृभ्यः
प.	विद्याभ्यः	मतिभ्यः	नदीभ्यः	स्त्रीभ्यः	धेनुभ्यः	मातृभ्यः
ष.	विद्यानाम्	मतीनाम्	नदीनाम्	स्त्रीणाम्	धेनूनाम्	मातॄणाम्
स.	विद्यासु	मतिषु	नदीषु	स्त्रीषु	धेनुषु	मातृषु
संबो.	हे विद्याः	हे मतयः	हे नद्यः	हे स्त्रियः	हे धेनवः	हे मातरः

अजन्त नपुंसकलिंगाः शब्दाः   तालिका नं. ३

अकारान्त, इकारान्त, उकारान्त, ऋकारान्त,

	फल	वारि	पूति	बहु	कर्तृ
एकवचन					
प्र.	फलम्	वारि	पूति	बहु	कर्तृ
द्वि.	फलम्	वारि	पूति	बहु	कर्तृ
तृ.	फलेन	वारिणा	पूतिना	बहुना	कर्तृणा,कर्त्रा
च.	फलाय	वारिणे	पूतिने	बहुने, बहुवे	कर्तृणे,कर्त्रे
पं.	फलात्	वारिणः	पूतिनः	बहुनः, बहोः	कर्तृणः,कर्तुः
ष.	फलस्य	वारिणः	पूतिनः	बहुनः, बहोः	कर्तृणः,कर्तुः
स.	फले	वारिणि	पूतिनि	बहुनि, बहौ	कर्तृणि,कर्तरि
सबो.	हे फल	हेवारि,हे वारे	हे पूति	हे बहु, हेबहो	हे कर्तृ, हेकर्तः
द्विवचन					
प्र.	फले	वारिणी	पूतिनी	बहुनी	कर्तृणी
द्वि.	फले	वारिणी	पूतिनी	बहुनी	कर्तृणी
तृ.	फलाभ्याम्	वारिभ्याम्	पूतिभ्याम्	बहुभ्याम्	कर्तृभ्याम्
च.	फलाभ्याम्	वारिभ्याम्	पूतिभ्याम्	बहुभ्याम्	कर्तृभ्याम्
पं.	फलाभ्याम्	वारिभ्याम्	पूतिभ्याम्	बहुभ्याम्	कर्तृभ्याम्
ष.	फलयोः	वारिणोः	पूतिनोः	बहुनोः,बह्वोः	कर्तृणोः,कर्त्रोः
स.	फलयोः	वारिणोः	पूतिनोः	बहुनोः,बह्वोः	कर्तृणोः,कर्त्रोः
सबो.	हे फले	हे वारिणी	हे पूतिनी	हे बहुनी	हे कर्तृणी
बहुवचन					
प्र.	फलानि	वारीणि	पूतीनि	बहूनि	कर्तृणि
द्वि.	फलानि	वारीणि	पूतीनि	बहूनि	कर्तृणि
तृ.	फलैः	वारिभिः	पूतिभिः	बहुभिः	कर्तृभिः
च.	फलेभ्यः	वारिभ्यः	पूतिभ्यः	बहुभ्यः	कर्तृभ्यः
पं.	फलेभ्यः	वारिभ्यः	पूतिभ्यः	बहुभ्यः	कर्तृभ्यः
ष.	फलानाम्	वारीणाम्	पूतीनाम्	बहूनाम्	कर्तृणाम्
स.	फलेषु	वारिषु	पूतिषु	बहुषु	कर्तृषु
सबो.	हे फलानि	हे वारीणि	हे पूतीनि	हे बहूनि	हे कर्तृणि

हलन्त पुंल्लिंगाः शब्दाः (१) तालिका नं. ४ (१)

तकारान्त

	मरुत्	धीमत्	भवत्	ध्यायत्	महत्
एकवचन					
प्र.	मरुत्	धीमान्	भवान्	ध्यायन्	महान्
द्वि.	मरुतम्	धीमन्तम्	भवन्तम्	ध्यायन्तम्	महान्तम्
तृ.	मरुता	धीमता	भवता	ध्यायता	महता
च.	मरुते	धीमते	भवते	ध्यायते	महते
पं.	मरुतः	धीमतः	भवतः	ध्यायतः	महतः
ष.	मरुतः	धीमतः	भवतः	ध्यायतः	महतः
स.	मरुति	धीमति	भवति	ध्यायति	महति
सबो.	हे मरुत्	हे धीमत्	हे भवन्	हे ध्यायन्	हे महन्
द्विवचन					
प्र.	मरुतौ	धीमन्तौ	भवन्तौ	ध्यायन्तौ	महान्तौ
द्वि.	मरुतौ	धीमन्तौ	भवन्तौ	ध्यायन्तौ	महान्तौ
तृ.	मरुद्भ्याम्	धीमद्भ्याम्	भवद्भ्याम्	ध्यायद्भ्याम्	महद्भ्याम्
च.	मरुद्भ्याम्	धीमद्भ्याम्	भवद्भ्याम्	ध्यायद्भ्याम्	महद्भ्याम्
पं.	मरुद्भ्याम्	धीमद्भ्याम्	भवद्भ्याम्	ध्यायद्भ्याम्	महद्भ्याम्
ष.	मरुतोः	धीमतोः	भवतोः	ध्यायतोः	महतोः
स.	मरुतोः	धीमतोः	भवतोः	ध्यायतोः	महतोः
सबो.	हे मरुतौ	हे धीमन्तौ	हे भवन्तौ	हे ध्यायन्तौ	हे महान्तौ
बहुवचन					
प्र.	मरुतः	धीमन्तः	भवन्तः	ध्यायन्तः	महान्तः
द्वि.	मरुतः	धीमतः	भवतः	ध्यायतः	महतः
तृ.	मरुद्भिः	धीमद्भिः	भवद्भिः	ध्यायद्भिः	महद्भिः
च.	मरुद्भ्यः	धीमद्भ्यः	भवद्भ्यः	ध्यायद्भ्यः	महद्भ्यः
पं.	मरुद्भ्यः	धीमद्भ्यः	भवद्भ्यः	ध्यायद्भ्यः	महद्भ्यः
ष.	मरुताम्	धीमताम्	भवताम्	ध्यायताम्	महताम्
स.	मरुत्सु	धीमत्सु	भवत्सु	ध्यायत्सु	महत्सु
सबो.	हे मरुतः	हे धीमन्तः	हे भवन्तः	हे ध्यायन्तः	हे महान्तः

हलन्त पुंल्लिंगाः शब्दाः (२) तालिका नं. ४ (२)

नकारान्त

	अर्यमन्	आत्मन्	पथिन्	राजन्	शशिन्	श्वन्
एकवचन						
प्र.	अर्यमा	आत्मा	पन्थाः	राजा	शशी	श्वा
द्वि.	अर्यमणम्	आत्मानम्	पन्थानम्	राजानम्	शशिनम्	श्वानम्
तृ.	अर्यम्णा	आत्मना	पथा	राज्ञा	शशिना	शुना
च.	अर्यम्णे	आत्मने	पथे	राज्ञे	शशिने	शुने
प.	अर्यम्णः	आत्मनः	पथः	राज्ञः	शशिनः	शुनः
ष.	अर्यम्णः	आत्मनः	पथः	राज्ञः	शशिनः	शुनः
स.	अर्यम्णि	आत्मनि	पथि	राज्ञि, राजनि	शशिन्	शुनि
सबो.	हे अर्यमन्	हे आत्मन्	हे पथिन्	हे राजन्	हे शशिन्	हे श्वन्
द्विवचन						
प्र.	अर्यमणौ	आत्मानौ	पन्थानौ	राजानौ	शशिनौ	श्वानौ
द्वि.	अर्यमणौ	आत्मानौ	पन्थानौ	राजानौ	शशिनौ	श्वानौ
तृ.	अर्यमभ्याम्	आत्मभ्याम्	पथिभ्याम्	राजभ्याम्	शशिभ्याम्	श्वभ्या
च.	अर्यमभ्याम्	आत्मभ्याम्	पथिभ्याम्	राजभ्याम्	शशिभ्या	श्वभ्याम्
पं.	अर्यमभ्याम्	आत्मभ्याम्	पथिभ्याम्	राजभ्याम्	शशिभ्याम्	श्वभ्याम्
ष.	अर्यम्णोः	आत्मनोः	पथोः	राज्ञोः	शशिनोः	शुनोः
स.	अर्यम्णोः	आत्मनोः	पथोः	राज्ञोः	शशिनोः	शुनोः
सबो.	हे अर्यमणौं	हे आत्मानौ	हे पन्थौ	हे राजानौ	हे शशिनौ	हे श्वानौ
बहुवचन						
प्र.	अर्यमणः	आत्मानः	पन्थानः	राजानः	शशिनः	श्वानः
द्वि.	अर्यमणः	आत्मनः	पथः	राज्ञः	शशिनः	शुनः
तृ.	अर्यमभिः	आत्मभिः	पथिभिः	राजभिः:	शशिभिः	श्वभिः
च.	अर्यमभ्यः	आत्मभ्यः	पथिभ्यः	राजभ्यः	शशिभ्यः	श्वभ्यः
पं.	अर्यमभ्यः	आत्मभ्यः	पथिभ्यः	राजभ्यः	शशिभ्यः	श्वभ्यः
ष.	अर्यम्णाम्	आत्मानाम्	पथाम्	राज्ञाम्	शशिनाम्	शुनाम्
स.	अर्यमसु	आत्मसु	पथिषु	राजसु	शशिषु	श्वसु
सबो.	हे अर्यमणः	हे आत्मानः	हे पन्थानः	हे राजानः	हे शशिनः	हे श्वानः

हलन्त पुंल्लिंगाः शब्दाः (३) तालिका नं. ४ (३)

दकारान्त, धकारान्त, शकारान्त,

	तत्त्वविद्	युध्	ईदृश्	विश्
एकवचन				
प्र.	तत्त्ववित्-द्	युत्-द्	ईदृक्-ग्	विट् विड्
द्वि.	तत्त्वविदम्	युधम्	ईदृशम्	विशम्
तृ.	तत्त्वविदा	युधा	ईदृशा	विशा
च.	तत्त्वविदे	युधे	ईदृशे	विशे
पं.	तत्त्वविदः	युधः	ईदृशः	विशः
ष.	तत्त्वविदः	युधः	ईदृशः	विशः
स.	तत्त्वविदि	युधि	ईदृशि	विशि
सबो.	हे तत्त्वविद्	हे युत्-द्	हे ईदृक्-ग्	हे विट् हे विड्
द्विवचन				
प्र.	तत्त्वविदौ	युधौ	ईदृशौ	विशौ
द्वि.	तत्त्वविदौ	युधौ	ईदृशौ	विशौ
तृ.	तत्त्वविद्भ्याम्	युद्भ्याम्	ईदृग्भ्याम्	विड्भ्याम्
च.	तत्त्वविद्भ्याम्	युद्भ्याम्	ईदृग्भ्याम्	विड्भ्याम्
पं.	तत्त्वविद्भ्याम्	युद्भ्याम्	ईदृग्भ्यायम्	विड्भ्याम्
ष.	तत्त्वविदोः	युधोः	ईदृशोः	विशोः
स.	तत्त्वविदोः	युधोः	ईदृशोः	विशोः
सबो.	हे तत्त्वविदौ	हे युधौ	हे ईदृशौ	हे विशौ
बहुवचन				
प्र.	तत्त्वविदः	युधः	ईदृशः	विशः
द्वि.	तत्त्वविदः	युधः	ईदृशः	विशः
तृ.	तत्त्वविद्भिः	युद्भिः	ईदृग्भः	विड्भिः
च.	तत्त्तवविद्भ्यः	युद्भ्यः	ईदृग्भ्यः	विड्भ्यः
पं.	तत्त्वविद्भ्यः	युद्भ्यः	ईदृग्भ्यः	विड्भ्यः
ष.	तत्त्वविदाम्	युधाम्	ईदृशाम्	विशाम्
स.	तत्त्ववित्सु	युत्सु	ईदृक्षु	विटत्ससु, विट्सु
सबो.	हे तत्त्वविदः	हे युधः	हे ईदृशः	हे विशः

हलन्त पुल्लिंगा : शब्दा : (४) तालिका नं. ४ (४)

सकारान्त

	गरीयस्	चन्द्रमस्	पुमस्	विद्वस्
एकवचन				
प्र.	गरीयान्	चन्द्रमाः	पुमान्	विद्वान्
द्वि.	गरीयांसम्	चन्द्रमसम्	पुमांसम्	विद्वांससम्
तृ.	गरीयसा	चन्द्रमसा	पुंसा	विदुषा
च.	गरीयसे	चन्द्रमसे	पुंसे	विदुषे
पं.	गरीयसः	चन्द्रमसः	पुंसः	विदुषः
ष.	गरीयसः	चन्द्रमसः	पुंसः	विदुषः
स.	गरीयसि	चन्द्रमसि	पुंसि	विदुषि
संबो.	हे गरीयन्	हे चन्द्रमः	हे पुमन्	हे विद्वन्
द्विवचन				
प्र.	गरीयांसौ	चन्द्रमसौ	पुमांसौ	विद्वांसौ
द्वि.	गरीयांसौ	चन्द्रमसौ	पुमांसौ	विद्वांसौ
तृ.	गरीयोभ्याम्	चन्द्रमोभ्याम्	पुंभ्याम्	विद्वद्भ्याम्
च.	गरीयोभ्याम्	चन्द्रमोभ्याम्	पुंभ्याम्	विद्वद्भ्याम्
पं.	गरीयोभ्याम्	चन्द्रमोभ्याम्	पुंभ्याम्	विद्वद्भ्याम्
ष.	गरीयसोः	चन्द्रमसोः	पुंसोः	विदुषोः
स.	गरीयसोः	चन्द्रमसोः	पुसोः	विदुषोः
संबो.	हे गरीयांसौ	हे चन्द्रमसौ	हे पुमांसौ	हे विद्वांसौ
बहुवचन				
प्र.	गरीयांसः	चन्द्रमसः	पुमांसः	विद्वांसः
द्वि.	गरीयसः	चन्द्रमसः	पुंसः	विदुषः
तृ.	गरीयोभिः	चन्द्रमोभिः	पुंभिः	विद्वद्भिः
च.	गरीयोभ्यः	चन्द्रमोभ्यः	पुंभ्यः	विद्वद्भ्यः
पं.	गरीयोभ्यः	चन्द्रमोभ्यः	पुंभ्यः	विद्वद्भ्यः
ष.	गरीयसाम्	चन्द्रमसाम्	पुंसाम्	विदुषाम्
स.	गरीयस्सु	चन्द्रमस्सु	पुंसु	विद्वत्सु
संबो.	हे गरीयांसः	हे चन्द्रमसः	हे पुमांसः	हे विद्वांसः

हलन्त स्त्रीलिंगाः शब्दाः तालिका नं. ५

चकारान्त, पकारान्त, रकारान्त, वकारान्त शकारान्त

	वाक्वाणी	आप्	गिर्	दिव्	दिश्
एकवचन					
प्र.	वाक्-वाग्		गीः	द्यौः	दिक्-ग्
द्वि.	वाचम्		गिरम्	दिवम्	दिशम्
तृ.	वाचा		गिरा	दिवा	दिशा
च.	वाचे		गिरे	दिवे	दिशे
पं.	वाचः		गिरः	दिवः	दिशः
ष.	वाचः		गिरः	दिवः	दिशः
स.	वाचि		गिरि	दिवि	दिशि
संबो.	हे वाक्-ग्		हे गीः	हे द्यौः	दिक्-ग्
द्विवचन					
प्र.	वाचौ		गिरौ	दिवौ	दिशौ
द्वि.	वाचौ		गिरौ	दिवौ	दिशौ
तृ.	वाग्भ्याम्		गीर्भ्याम्	द्युभ्याम्	दिग्भ्याम्
च.	वाग्भ्याम्		गीर्भ्याम्	द्युभ्याम्	दिग्भ्याम्
पं.	वाग्भ्याम्		गीर्भ्याम्	द्युभ्याम्	दिग्भ्याम्
ष.	वाचौः		गिरोः	दिवोः	दिशोः
स.	वाचोः		गिरोः	दिवोः	दिशोः
संबो.	हे वाचौ		हे गिरौ	हे दिवौ	हे दिशौः
बहुवचन					
प्र.	वाचः	आपः	गिरः	दिवः	दिशः
द्वि.	वाचः	आपः	गिरः	दिवः	दिशः
तृ.	वाग्भिः	अभ्दिः	गीर्भिः	द्युभिः	दिग्भिः
च.	वाग्भ्यः	अद्भ्यः	गीर्भ्यः	द्युभ्यः	दिग्भ्यः
पं.	वागभ्यः	अद्भ्यः	गीर्भ्यः	द्युभ्यः	दिग्भ्यः
ष.	वाचाम्	अपाम्	गिराम्	दिवाम्	दिशाम्
स.	वाक्षु	अप्सु	गीर्षु	द्युषु	दिक्षु
संबो.	हे वाचः	हे आपः	हे गिरः	हे दिवः	हे दिशः

हलन्त नपुंसक लिंगाः शब्दाः तालिका नं. ६ (१)

तकारान्त, नकारान्त

	जगत्	नश्यत्	अहन्	जन्मन्	कर्मन्
एकवचन					
प्र.	जगत्-द्	नश्ययय्यत्	अहः	जन्म	कर्म
द्वि.	जगत्-द्	नश्यत्	अहः	जन्म	कर्म
तृ.	जगता	नश्यता	अह्ना	जन्मना	कर्मणा
च.	जगते	नश्यते	अह्ने	जन्मने	कर्मणे
पं.	जगतः	नश्यतः	अह्नः	जन्मनः	कर्मणः
ष.	जगतः	नश्यतः	अह्नः	जन्मनः	कर्मणः
